पत्रालयद्वारा संस्कृतम्

कोविदः
KOVIDA

संस्कृतभारती
बेङ्गलूरु

प्रकाशनम् -
संस्कृतभारती
'अक्षरम्', ८ उपमार्गः, २ घट्टः
गिरिनगरम्, बेङ्गलूरु - ५६० ०८५

प्रथमं मुद्रणम् - २०१६, १०००

मुद्रणम् -
वागर्थ, न.रा कालोनि, बेङ्गलूरु - १९

ISBN 978-93-85969-03-4

KOVIDA (ENGLISH) - A book for learning Samskrit through Correspondence (English) fourth level wihich contains 12 lessons. *Publisher* - **SAMSKRITA BHARATI** - 'Aksharam', 8th Cross, II Phase, Girinagar, Bangalore - 560 085. Ph : 26721052 / 26722576 E-mail : samskritam@gmail.com

Pages - 289 + 4, First Print - March - 2016

Printed at - Vagartha. N. R. Colony B' lore - 560 019

अनुक्रमणिका

Please note the following instructions

1. Please mention the course title and your registration number in all your correspondence with us.
2. If book is lost, you can get the same by paying Rs.100. 00.
3. Any change in the address should be informed to us immediately.
4. The examinations are held on THIRD SUNDAY of February / August months. We have a few centres for examinations. We shall send the admission ticket informing the details of the date, place, time of examination etc., for the students who have to write at the centres. Where there is no centre, students will be writing the examination from their residence. Detailed instructions along with the question paper (in a sealed cover) would be sent well before the date of examination.
5. The marks card and certificate would be sent to you by ordinary post before the end of March / September.
6. Please feel free to contact us for any clarification.

SAMSKRITA BHARATI

SAMSKRIT THROUGH CORRESPONDENCE

'AKSHARAM', 8th Cross, 2nd Phase, Girinagar,

BANGALORE - 560 085

Phone : 26721052 / 26722576, E-mail : samskritam@gmail.com

ॐ

संस्कृतभारती
पत्रालयद्वारा संस्कृतम्

कोविदः - प्रथमः पाठः

।। आ नो भद्राः क्रतवो यन्तु विश्वतः ।।

May good thoughts come to us from all sides.

- ऋग्वेदः

प्रियबन्धो,

सादरं वन्दनानि । पत्रालयद्वारा संस्कृतशिक्षणं प्राप्तुं भवन्तः उत्सुकाः इति अभिनन्दामः । संस्कृतभाषा मधुरा, सरला च इति पुनर्वक्तव्यं नास्ति । प्रतिदिनं भाषाभ्यासं भवन्तः कुर्वन्तु । संस्कृतपुस्तकानि, रामायणं, महाभारतम् इत्यादिकं पठितुं प्रयत्नं च कुर्वन्तु । भाषासिद्धिः भवतां भवतु इति आशास्महे ।

१. समासः

समासपरिचयः

१. विश्वामित्रेण सह **रामलक्ष्मणौ** अरण्यं गतवन्तौ ।
Along with Vishwamitra, Rama and Lakshmana went to the forest.

२. शबरी **दशरथपुत्रस्य** रामस्य **परमभक्ता** आसीत् ।
Shabari was a staunch devotee of Rama, the son of Dasharatha.

३. बालाः **पुस्तकहस्तां** शारदां नमस्कृतवन्तः ।
Boys saluted Sharada, who has a book in hand.

४. भोः मित्र ! नूतनं **कृष्णफलकम्** आनय ।
Hey friend ! bring a new black-board.

५. **कालिदासविरचितं** काव्यं सर्वैः पठनीयम् ।
Every body must read the poem composed by Kalidasa.

६. **वीरपुरुषाः** सर्वदा **दृढचित्ताः** भवन्ति ।
Valorous men are always steadfast in their minds.

७. **हिमालयपर्वतः** अत्युन्नतः अस्ति ।
The Himalayan mountain is very lofty.

८. **गुरुदेवाय** नमः ।
Salutation to God in the form of teacher.

९. महिलाः **विशालसभाङ्गणे** चर्चां कुर्वत्यः सन्ति ।
Ladies are discussing something in the large auditorium.

१०. पाणिनिः **महावैयाकरणः** आसीत् ।
Panini was a great grammarian.

In Samskrit, simple words have the power of entering into combination with one another and forming one word that is called **समासः** or **Compound.** Printed in bold type in the above sentences are compound words. Two or more words join together to form one Compound. Compound words are called **समस्तपदानि** in Samskrit.

In the first example above, the words **'राम'** and **'लक्ष्मण'** are compounded to form one word as **रामलक्ष्मणौ** । In the second, **दशरथ** and **पुत्र** are compounded as **दशरथपुत्र** ।

Samskrit language abounds in such compound words. It is important to note that words having a specific relation can be compounded. In other words, a compound word has the power to express the relationship between the individual words.

Read the following examples.

१. दशरथ + पुत्र = दशरथपुत्रः Dasharatha's son.

२. नील + मेघ = नीलमेघः Dark cloud.

३. पञ्च + पाण्डव = पञ्चपाण्डवाः The five Pandavas.

४. राम + लक्ष्मण = रामलक्ष्मणौ Rama and Lakshmana.

५. पुस्तक + हस्त = पुस्तकहस्तः One with a book in hand.

६. उप + वृक्ष = उपवृक्षम् Near the tree.

'दशरथपुत्रः' is a compound word. It means Dasharatha's son and in a sentence form it is stated as दशरथस्य पुत्रः । This sentence is known by the name 'विग्रहवाक्य' । A 'विग्रहवाक्य' explains the relationship between the two words within the compound.

Examples :

समासः		*विग्रहवाक्यम्*
१. दशरथपुत्रः	-	दशरथस्य पुत्रः
२. नीलमेघः	-	नीलः मेघः
३. पञ्चपाण्डवाः	-	पञ्च पाण्डवाः
४. रामलक्ष्मणौ	-	रामश्च लक्ष्मणश्च
५. पुस्तकहस्तः	-	पुस्तकं हस्ते यस्य सः
६. उपवृक्षम्	-	वृक्षस्य समीपे

Printed in bold in the following verse, are compound words. How to dissolve them is also shown below.

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं **ग्रन्थकोटिभिः** ।
परोपकारः पुण्याय पापाय **परपीडनम्** ।।

श्लोकस्य अर्धः, तेन = श्लोकार्धेन
ग्रन्थानां कोटयः, ताभिः = ग्रन्थकोटिभिः
परेषाम् उपकारः = परोपकारः
परेषां पीडनम् = परपीडनम्

Pay particular attention to the compound words while reading Samskrit passages. Try to resolve them in accordance with their meaning.

२. विशेषविषयाः

तद्धितान्ताः - १

Read the following sentences.

१. **वासुदेवः** अर्जुनेन सह इन्द्रप्रस्थम् आगच्छति ।

Vaasudeva [the son of Vasudeva (Krishna)] comes to Indraprastha with Arjuna.

२. **दाशरथिः** श्रीरामः कस्य न प्रियः ?

To whom is Daasharathi [the son of Dasharatha (Rama)] not dear ?

३. **वैनतेयः** पक्षिराजः ।

The son of Vinatha (Garuda) is the king of birds.

४. **गार्गी** याज्ञवल्क्यस्य पत्नी ।

Gargi (of Garga lineage) is the wife of Yajnavalkya.

५. **पार्वती** लोकमाता ।

Uma (the daughter of Parvata) is the Mother of the Universe.

६. **शाकुन्तलः** सिंहशावकैः सह क्रीडति स्म ।

Shakuntala's son (Bharata) was playing with lion cubs.

७. **वाल्मीकिः** आदिकविः अस्ति ।

Valmiki (born of an ant-hill) is the first poet.

८. **पौत्रः** राजेशः पितामहेन सह शालां गच्छति ।

Grand son (son's son) Rajesha goes to school with the grandfather.

९. **आञ्जनेयः** लङ्कां दग्धवान् ।

Anjana's son Anjaneya burnt Lanka.

१०. नागेशः भास्करस्य **भ्रातृव्यः** अस्ति ।

Nagesha is the nephew (brother's son) of Bhaskara.

In the first sentence above **वासुदेवः** is one word for 'Vasudeva's son' and in the fifth **पार्वती** is one word for 'Parvata's daughter'. These words are called **तद्धितान्त** words.

Taddhitas

We know that the words **पठित्वा, पठितुम्, पठितव्यम्** etc. are formed by adding different affixes to the verbroot **पठ्**. The affixes like **त्वा, तुम्, तव्य** are called **कृत्प्रत्ययाः** । These are affixed to the

verbroot. Likewise certain affixes come after nominal stems. They are known as Taddhita affixes. Thus while कृत् affixes are affixed to verbroots, the तद्धित affixes are affixed to nominal stems.

Taddhitas are employed in different senses. For example - पौत्रः = पुत्रस्य पुत्रः (Son's son). Here Taddhita affix 'अ' is added to the nominal stem पुत्र making it पौत्रः । This sense can be elaborated in a sentence as पुत्रस्य अपत्यं पुमान् > पौत्रः - male issue of son. The words अपत्यं पुमान् show that it is a male offspring. Similarly, the words अपत्यं स्त्री as in the example - पार्वती = पर्वतस्य अपत्यं स्त्री, show that it is a female offspring. In this lesson you will know the अपत्यार्थकतद्धित (The affixes which mean 'offspring of')

1. By adding the affix अ, the following words are formed.
   Eg. - वसुदेवस्य अपत्यं पुमान् > वासुदेवः (Son of Vasudeva)
   Similarly -

   पराशरस्य अपत्यं पुमान् > पाराशरः
   रघोः अपत्यं पुमान् > राघवः
   भृगोः अपत्यं पुमान् > भार्गवः
   कुरोः अपत्यं पुमान् > कौरवः
   शकुन्तलायाः अपत्यं पुमान् > शाकुन्तलः
   पृथायाः अपत्यं पुमान् > पार्थः

2. The affix 'इ' is added to some words.
   Eg. - दशरथस्य अपत्यं पुमान् > दाशरथिः
   Similarly
   सत्यकः > सात्यकिः, द्रोणः > द्रौणिः, दुष्यन्तः > दौष्यन्तिः, वरुणः > वारुणिः, वल्मीकः > वाल्मीकिः

   These two affixes (अ, इ) are also used to express the sense of 'descendant of a family' or 'belonging to the gotra' (dynasty).
   Eg. - रघोः गोत्रापत्यं पुमान् = राघवः (रामः) (Here राघव means = one who belongs to रघु dynasty.)
   Similarly शूरस्य गोत्रापत्यं पुमान् = शौरिः (कृष्णः)

3. The affix एय is added to feminine bases.

   Eg. - विनतायाः अपत्यं पुमान् = वैनतेयः

   Similarly - गङ्गा > गाङ्गेयः, अञ्जना > आञ्जनेयः, राधा > राधेयः, कुन्ती > कौन्तेयः

4. The affix ई is added to express the meaning 'daughter of'

   Eg. - पर्वतस्य अपत्यं स्त्री = पार्वती

   Similarly - जनकः > जानकी, द्रुपदः > द्रौपदी

   This affix is added to express the sense 'belonging to the gotra' also.

   Eg. - गर्गस्य गोत्रापत्यं स्त्री = गार्गी

5. There are some other Taddhita affixes that give the same meaning . Some of these are shown below.

   Eg. - भ्रातुः अपत्यं पुमान् = भ्रातृव्यः (Brother's son)
   स्वसुः अपत्यं पुमान् = स्वस्त्रीयः (Sister's son)
   पितृष्वसुः अपत्यं पुमान् = पैतृष्वस्त्रीयः (Son of Paternal aunt)
   दुहितुः अपत्यं पुमान् = दौहित्रः (Daughter's son)

Note:

a) It is suggested that at this level you pay attention to the final forms of अपत्यार्थक words rather than the affixes themselves.

b) All the affixes are not common to all words. Therefore refrain from coining new words using these affixes.

c) Barring one or two, in all the examples above, the first vowel of the word has got a वृद्धि substitute when the तद्धितप्रत्यय is affixed. This feature in तद्धितान्त words is known as आदिवृद्धि.

अभ्यासाः

I. *अधः दत्ते राशौ समस्तपदानि असमस्तपदानि च सन्ति । तानि पृथक्कृत्य स्तम्भद्वये लिखत ।*

[It is important to remember that a compound (समासः) should

necessarily have two words. For example हानिः is a single word whereas मानहानिः has two words मानः and हानिः that are compounded to form one word as मानहानिः । Therefore हानिः is not a compound (असमस्तपदम्) where as मानहानिः is a compound word (समस्तपदम्)]

१. अर्थलाभः २. उद्योगः ३. वरान्वेषणम् ४. पितृभक्तिः ५. नदीप्रवाहः ६.देशसेवा ७. शुद्धता ८. वसिष्ठाश्रमः ९. गङ्गायमुने १०. वृक्षः ११. विद्या १२. गमनम् १३. पद्माकरः १४. सूचना १५. शय्या १६. कृष्णफलकम् १७. शिलाप्रतिमा १८. पदम् १९. जनः २०. धर्मः

समस्तपदानि	असमस्तपदानि
१.	१. ....
२.	२. ....
३.	३. ....
४.	४. ....
५.	५. ....
६.	६. ....
७.	७. ....
८.	८. ....
९.	९. ....
१०.	१०. ....

II. *अधस्तनश्लोके स्थितानि समस्तपदानि चिनुत ।*

जयतु जयतु देवो देवकीनन्दनोऽयम्
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ।।

१. .... २. ....
३. .... ४. ....
५. ....

III. *अधः दत्तानि पदानि उपयुज्य समस्तपदानि लिखत ।*

उदा - कोसलस्य नृपः = कोसलनृपः

१. नद्याः तीरम् - ....२.समुद्रस्य तटः ....
३. भूमेः गुणः - .... ४. काकस्य काष्ण्र्यम् - ....
५. देवानाम् इन्द्रः - .... ६. सुधायाः खण्डः - ....
७. पाण्डोः तनयः - .... ८. गुरोः पत्नी - ....
९. मित्रस्य गृहम् - .... १०. देवस्य पूजा - ....
११. दीपस्य प्रकाशः - ..... १२. कवेः रचना - ....
१३. चन्द्रस्य दर्शनम् - ......१४. जनानां समूहः - ....
१५. नागानाम् इन्द्रः - ....

IV. *उदाहरणं दृष्ट्वा अधोनिर्दिष्टानां तद्धितान्तानां विग्रहं लिखत ।*

यथा - १. सात्यकिः (सत्यक) - सत्यकस्य अपत्यं पुमान्
२. पार्वती (पर्वत) - पर्वतस्य अपत्यं स्त्री

१. द्रौणिः (द्रोण) ....
२. दौष्यन्तिः (दुष्यन्त) ....
३. वारुणिः (वरुण) ....
४. शाकुन्तलः (शकुन्तला) ....
५. गाङ्गेयः (गङ्गा) ....
६. औत्तरेयः (उत्तरा) ....
७. आञ्जनेयः (अञ्जना) ....
८. कौन्तेयः (कुन्ती) ....
९. राधेयः (राधा) ....
१०. जानकी (जनक) ....
११. आरुणिः (अरुण) ....
१२. धार्तराष्ट्रः (धृतराष्ट्र) ....

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 256) After completing the exercises check your answers.)

३. सुभाषितानि

१. आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः ।
परं परोपकारार्थं यो जीवति स जीवति ।।

पदविभागः

आत्मार्थम्, जीवलोके, अस्मिन्, कः, न, जीवति, मानवः, परम्, परोपकारार्थम्, यः, जीवति, सः, जीवति ।

अन्वयः

अस्मिन् जीवलोके आत्मार्थं कः मानवः न जीवति ? परं यः परोपकारार्थं जीवति सः जीवति ।

अन्वयार्थः

अस्मिन् = एतस्मिन्, जीवलोके = प्रपञ्चे, आत्मार्थम् = आत्मनः निमित्तं, कः मानवः = को वा मनुष्यः, न जीवति ? = जीवनं न करोति ? परं = किन्तु, यः = यः मनुष्यः, परोपकारार्थम् = अन्येषाम् उपकारार्थं, जीवति = जीवनं करोति, सः = सः मनुष्यः, जीवति = (वस्तुतः) जीवनं करोति ।

तात्पर्यम्

प्रपञ्चे विद्यमानाः सर्वे अपि मनुष्याः स्वहितं, स्वसुखं च सम्पादयन्ति । अतः आत्मनः निमित्तं सर्वः अपि जनः जीवति एव । परन्तु ये जनाः अन्येषां हितम्, अन्येषां सुखं च कामयमानाः तदर्थं जीवन्ति, तेषां जीवनमेव सार्थकं जीवनम् ! धन्यं जीवनम् ! परोपकाररहितं जीवनं तु निरर्थकमेव ।

२. पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः ।।

पदविभागः

पिबन्ति, नद्यः, स्वयम्, एव, न, अम्भः, स्वयम्, न, खादन्ति, फलानि,

वृक्षाः, न, अदन्ति, सस्यम्, खलु, वारिवाहाः, परोपकाराय, सताम्, विभूतयः ।

अन्वयः

नद्यः स्वयम् एव अम्भः न पिबन्ति । वृक्षाः स्वयं फलानि न खादन्ति । वारिवाहाः सस्यं स्वयं न अदन्ति खलु । सतां विभूतयः परोपकाराय (भवन्ति) ।

अन्वयार्थः

नद्यः = सरितः, स्वयम् एव = स्वतः, अम्भः = जलं, न पिबन्ति । वृक्षाः = तरवः, स्वयम् = स्वतः, फलानि, न खादन्ति । वारिवाहाः = मेघाः, सस्यं, न अदन्ति खलु = न खादन्ति । सतां = सत्पुरुषाणां, विभूतयः = सम्पत्तयः, परोपकाराय = परोपकारार्थं (भवन्ति) ।

*(**सूचना** - येषां शब्दानाम् अर्थः अत्यन्तं सरलः अस्ति तेषां शब्दानाम् अर्थः अन्वयार्थे न लिख्यते ।)*

तात्पर्यम्

नदीषु जलं भवति । परन्तु नद्यः स्वयमेव तत् जलं कदापि न पिबन्ति । वृक्षेषु फलानि भवन्ति । ते वृक्षाः अपि स्वयमेव तानि फलानि कदापि न खादन्ति । जलवर्षणेन सस्यानि यथा सम्यक् प्रवृद्धानि भवेयुः तथा कुर्वन्ति मेघाः । परन्तु ते स्वेन वर्धितानि सस्यानि स्वयमेव न खादन्ति । एवमेव सज्जनाः स्वसमीपे विद्यमानानां सम्पत्तीनाम् उपयोगं स्वयं न कुर्वन्ति । अपि तु परोपकारार्थमेव तासां विनियोगं कुर्वन्ति ।

४. काव्यकथा

[पूर्वपाठेषु पञ्चानां महाकाव्यानां मध्ये रघुवंशस्य शिशुपालवधस्य किरातार्जुनीयस्य च कथा ज्ञाता । 'कोविद'पाठेषु 'कुमारसम्भव'-महाकाव्यस्य, 'नैषधीयचरित'महाकाव्यस्य च कथां कथयामः । सङ्ग्रह-रूपेण अत्र कथा दीयते । विस्तरेण कथां पठितुं भवन्तः प्रयत्नं कुर्वन्तु ।]

कुमारसम्भवम्

कुमारसम्भवमहाकाव्यं कालिदासेन विरचितम् । अस्मिन् महाकाव्ये १७

सर्गाः सन्ति । लोककण्टकस्य तारकासुरस्य संहाराय शिवपार्वत्योः विवाहः, कुमारजननम्, तारकासुरस्य वधः - एते विषयाः अत्र उपवर्णिताः ।

हिमालयः पर्वतानां राजा । सः उत्तरभागे भूम्याः मानदण्डः इव शोभते । अनेकानि रत्नानि, ओषधयः च तत्र सन्ति । महापर्वते अलङ्कारवस्तूनि सम्भवन्ति । देवताः तैः वस्तुभिः एव स्व शरीरम् अलङ्कुर्वन्ति । हिमालयस्य सरोवरेषु मनोहराणि पद्मानि भवन्ति । सप्तर्षयः स्वयम् आगत्य पूजायै तानि नयन्ति ।

माननीया मेनादेवी हिमालयस्य धर्मपत्नी । मैनाकः पुत्रः । जगन्माता पार्वती पुत्री । पूर्वजन्मनि पार्वती सतीदेवी आसीत् । सा दक्षब्रह्मणः कुमारी । दक्षः कदाचित् यागम् एकम् अनुष्ठितवान् । तस्मिन् समये सः सतीदेव्याः पतिम् ईश्वरं निन्दितवान् । निन्दाम् असहमाना सतीदेवी होमाग्नौ स्वशरीरम् एव समर्पितवती । सा एव अपरजन्मनि हिमालयस्य पुत्री सञ्जाता । इमां पुत्रीं प्राप्तवान् हिमवान् निश्चयेन भाग्यवान् एव ।

बाल्ये पार्वत्याः विद्याभ्यासः निमित्तमात्रम् आसीत् । पूर्वजन्मनि ज्ञातान् विषयान् स्वयम् एव सा स्मृतवती । कालक्रमेण यौवनं प्राप्तवती । तस्याः सौन्दर्यं लोकमोहकम् अनुपमं च आसीत् ।

एकदा नारदमहर्षिः तत्र आगत्य 'इयं पार्वती हरस्य अर्धाङ्गिनी भविष्यति' इति उक्तवान् । तत् वचनं श्रुत्वा पर्वतराजः हराय स्वपुत्रीं दातुं मनसि सङ्कल्पितवान् । किन्तु सतीदेव्याः विरहेण विरक्तः हरः अरण्ये कुत्रापि तपोमग्नः आसीत् । पर्वतराजः शिवस्य सेवायै पार्वतीं नियोजितवान् । ईश्वरः तु पार्वतीं दृष्ट्वा अपि निर्विकारः स्थिरचित्तः च आसीत् । तस्मिन् एव समये दुष्टः राक्षसाधमः तारकः लोकत्रयम् अपि पीडयति स्म । इन्द्रादिदेवताः तस्मात् भीताः । प्रपञ्चं रक्षितुम् असमर्थाः च आसन् । देवताः एव तारकस्य सेवकाः अभवन् । देवाः दुःखिताः । सर्वे ब्रह्मलोकम् अगच्छन् । तत्र भक्त्या ब्रह्मदेवस्य स्तुतिम् अकुर्वन् । ततः बृहस्पतिः देवाचार्यः देवतानां दुरवस्थाम् वर्णयित्वा - "अहङ्कारी तारकः लोकान् पीडयति । तारकासुरं संहर्तुं सर्वे असमर्थाः । तं हत्वा लोकम् उद्धर्तुं भवन्तः एव समर्थाः" इति अवदत् । ब्रह्मदेवः - "अहमेव पूर्वं वरं दत्त्वा तारकासुरम् अनुगृहीतवान् ।

अतः मया तस्य वधः न कर्तव्यः । शिवपार्वत्योः पुत्रः एव तं हन्तुं समर्थः । अतः यूयं तपोमग्नस्य ईश्वरस्य चित्तम् उमादेव्याः सौन्दर्येण आक्रष्टुं प्रयत्नं कुरुत'' इति उक्तवान् । ईश्वरस्य चित्तम् आक्रष्टुं मन्मथः एव समर्थः इति इन्द्रः मन्मथं स्मृतवान् ।

प्रश्नाः

१. कुमारसम्भवमहाकाव्यं केन रचितम् ?
२. अस्मिन् काव्ये के के विषयाः उपवर्णिताः ?
३. सप्तर्षयः पूजार्थं पद्मानि कुतः नयन्ति ?
४. नारदमहर्षिः पार्वतीं दृष्ट्वा कां भविष्यद्वाणीम् उक्तवान् ?

५. श्लोकेषु अन्वयक्रमः

संस्कृतसाहित्ये श्लोकाः अधिकाः सन्ति । अतः श्लोकेषु 'अन्वयक्रमः' अवश्यं ज्ञातव्यः । अन्वयस्य लेखने सामान्यं क्रमं भवन्तः जानन्ति । 'परिचय'पाठेषु 'शिक्षा'पाठेषु च कन्नडभाषया अन्वयरचनाक्रमः प्रदर्शितः । सम्प्रति 'कोविद'पाठेषु संस्कृतेन 'अन्वयक्रमं' प्रदर्शयामः । यत्र किञ्चित् विशेषः तत्र कन्नडभाषयापि विवरणं भविष्यति ।

'रघुवंशं' महाकविना कालिदासेन विरचितं महाकाव्यम् । तत्र द्वितीयसर्गे दिलीपस्य कथा अस्ति । तां कथां स्वीकृत्य रघुवंशस्य पद्यानाम् 'अन्वयक्रमं' दर्शयामः ।

दिलीपः रघुवंशस्य चक्रेश्वरः । तस्य पत्नी सुदक्षिणा । तयोः सन्तानो नासीत् । वसिष्ठाचार्यस्य निर्देशम् अनुसृत्य तौ नन्दिन्याः धेन्वाः सेवां कृतवन्तौ । स एव कथाभागः अत्र स्वीकृतः ।

१. अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥

पदविभागः

अथ[1], प्रजानाम्[2], अधिपः[3], प्रभाते[4], जायाप्रतिग्राहितगन्धमाल्याम्[5], वनाय[6], पीतप्रतिबद्धवत्साम्[7], यशोधनः[8], धेनुम्[9], ऋषेः[10], मुमोच[11] ।

अन्वयः (Prose order)

अथ प्रभाते यशोधनः प्रजानाम् अधिपः जायाप्रतिग्राहितगन्धमाल्यां

पीतप्रतिबद्धवत्सां ऋषेः धेनुं वनाय मुमोच ।

प्रतिपदार्थः (Word-to-word meaning)

अथ = Afterwards, प्रभाते = at day break, प्रजानाम् अधिपः = The lord of the people (Dilipa), यशोधनः = who was rich in glory, (literally - fame was his wealth), मुमोच = set free, वनाय = to the forest, ऋषेः धेनुम् = the sage's cow, जाया-प्रति.....माल्याम् = to whom his wife (Sudakshina) had offered sandal paste and flower garland (and) पीत....वत्साम् = whose calf was tied up after it had drunk (milk).

Note : English being a foreign language it is not possible to maintain the prose order of Samskrita sloka while giving the word-to-word meaning. Therefore prose order is given separately and word-to-word meaning is according to the syntax in English.

तात्पर्यम्

वसिष्ठः नन्दिनीधेनोः सेवां कर्तुं सुदक्षिणादिलीपौ उक्तवान् । ततः प्रातःकाले पत्नी सुदक्षिणा नन्दिनीं गन्धेन पुष्पैः च अपूजयत् । नन्दिन्याः वत्सः क्षीरं च अपिबत् । तं वत्सं बद्ध्वा राजा दिलीपः धेनुं चरणार्थम् अरण्याय विमुक्तवान् ।

अन्वयरचना

अथ - अनन्तरम्
मुमोच - विमुक्तवान् - *क्रियापदम्*
कः मुमोच ? - अधिपः - *कर्तृपदम्*
कासाम् अधिपः ? - प्रजानाम्
पुनः कीदृशः ? - यशोधनः
कां मुमोच ? - धेनुम्
कस्य धेनुम् ? - ऋषेः
कीदृशीं धेनुम् ? - पीतप्रतिबद्धवत्साम्
पुनः कीदृशीम् ? - जायाप्रतिग्राहितगन्धमाल्याम्
कस्मै मुमोच ? - वनाय (वनं गन्तुम्)

कदा मुमोच ? - प्रभाते मुमोच

विशेषः

Word order in general was taught in the **शिक्षा** lessons. In the following lessons (word) ending, gender, case ending and number of the words in the stanzas, are also taught.

1. **Ending (अन्तः)** – The letter which comes at the end of a word base or प्रातिपदिक is the word's ending.

   Eg. - राम - राम् + अ - अकारान्तः = ending in 'अ'
   रमा - रम् + आ - आकारान्तः = ending in 'आ'
   हरि - हर् + इ - इकारान्तः = ending in 'इ'

2. **Gender (लिङ्गम्)** - The gender of a word is indicated by Mas., Fem. and Neu. If the word has the same form in all the three genders, it is indicated as 'त्रिलिङ्गक' ।

3. **Case ending (विभक्तिः)** - As we know there are seven case-endings. They are indicated as Nom., Acc., Ins., Dat., Abl., Gen., Loc., and Voc.(सम्बोधनप्रथमाविभक्तिः)

4. **Number (वचनम्)** - The three numbers are indicated as Sing., Du. and Pl. If a word has an invariable number i.e. if it is not declined in any other number except that given, it is indicated by the word 'नित्यम्'.

5. **Verbs (क्रियापदानि)** - The root, the time (tense-past, present and future) and the mood (imperative etc) and the sense of causal form of a verb are indicated. Parasmaipada, Atmanepada or Ubhayapada to which the verb belongs, is denoted respectively by Par., Atm., and Ubh. Subsequently, the person and number are also mentioned.

   Eg. - पचति - पच् par., pres., III per., sing.
   अपचम् - पच् par., pas., I per., sing.
   सहध्वे - सह Atm., pres., II per., pl.

6. **Compound (समासः)** - In a stanza where compound words occur, they are dissolved and their names are given. In the following lessons more about compounds will be taught.
   Eg. - कृष्णार्जुनौ - कृष्णश्च अर्जुनश्च - Dvandva compound.
7. **Indeclinable (अव्ययम्)** - Indeclinables are indicated as "Ind". The indeclinable ending in the affix 'क्त्वा', etc., is indicated as "Ind (affix)".
   Eg. - च Ind., प्रणम्य - Ind (affix)

In the stanza cited for अन्वयक्रम word analysis is as follows -

1. Indeclinable, 'अथ'
2. The word 'प्रजा' ending in 'आ' fem., gen., pl.
3. The word 'अधिप' ending in 'अ' mas., nom., sing.
4. The word 'प्रभात' ending in 'अ' neu., loc., sing.
5. The word 'जाया....माल्या' ending in 'आ' fem., Acc., sing.
6. The word 'वन' ending in 'अ' neu., dat., sing.
7. The word 'पीत....वत्सा' ending in 'आ' fem., Acc., sing.
8. The word 'यशोधन' ending in 'अ', mas., nom., sing.
9. The word 'धेनु' ending in 'उ', fem., Acc., sing.
10. The word 'ऋषि' ending in 'इ' mas., gen., sing.
11. The verb root 'मुच्लृ' ubh., 'लिट्' past., 3rd per., sing.

Note : Next lesson onwards, abbreviations are used for the above explanatory notes.

समासः

१. गन्धं च माल्यं च - गन्धमाल्ये - Dvandva Compound*
२. जायया प्रतिग्राहिते गन्धमाल्ये यया सा, ताम् - Bahuvrihi
३. पूर्वं पीतः पश्चात् प्रतिबद्धः पीतप्रतिबद्धः - Karmadharaya
४. पीतप्रतिबद्धो वत्सो यस्याः सा, ताम् - Bahuvrihi
५. यशः धनं यस्य सः - यशोधनः - Bahuvrihi

---

* In the following lessons you will learn the definitions of the different types of Samasa with their examples.

६. संस्कृतसाहित्यपरिचयः

नाटकम्

काव्यं द्विविधं - श्रव्यं दृश्यं चेति । रघुवंशादीनि श्रव्यकाव्यानि । शाकुन्तलादीनि दृश्यकाव्यानि । दृश्यकाव्यानां रूपकम् इति नाम । रङ्गे नटैः नटीभिश्च यत् प्रयुज्यते तत् रूपकम् । रूपके दश भेदाः सन्ति । ते - नाटकम्, प्रकरणम्, भाणः, प्रहसनम्, डिमः, व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगः चेति । नायकस्वभावभेदेन, वस्तुभेदेन, रसभेदेन, अङ्कसंख्याभेदेन च एतेषां रूपकाणां भेदः । किन्तु अधुना व्यवहारे सर्वाणि रूपकाणि 'नाटकानि' इत्येव कथ्यन्ते ।

'नाट्यशास्त्रम्' इति एकः प्राचीनग्रन्थः द्विसहस्रवर्षेभ्यः पूर्वमेव भरताचार्येण कृतः अस्ति । तस्मिन् ग्रन्थे सः नाट्यस्वरूपं नाटकलक्षणं च सम्यक् उक्तवान् । धनञ्जयः नाम पण्डितः 'दशरूपकम्' इति ग्रन्थं विलिख्य रूपकाणां परिचयं कारितवान् ।

प्रथमं कविना गद्यपद्ययुक्तः, सम्भाषणात्मकः, अभिनययोग्यः, कश्चन ग्रन्थः लिख्यते । तत्रत्या कथा रामायणादिषु प्रसिद्धा वा भवेत्, कविकल्पिता वा भवेत् । सः ग्रन्थः नटैः रङ्गे अभिनीयते । एषः अभिनयः, 'प्रयोगः' इति कथ्यते । सहृदयाः सामाजिकाः तं दृष्ट्वा आनन्दमनुभवन्ति । नाटके चतुर्विधाः अभिनयाः भवन्ति - आङ्गिकः, वाचिकः, आहार्यकः, सात्त्विकः चेति । हस्तपादनेत्रादिभिः यः अभिनयः क्रियते सः आङ्गिकः । भाषणं वाचिकः । वेषभूषणादिकम् आहार्यकः । गात्रकम्पनं, स्वेदः इत्यादयः सात्त्विकाः अभिनयाः । एतादृशैः अभिनयैः नटाः प्रेक्षकेषु नव रसान् उत्पादयन्ति ।

संस्कृतनाटकेषु प्रथमम् एकं मङ्गलपद्यं भवति । 'नान्दी' इति तस्य नाम । तदनन्तरं सूत्रधारः प्रविशति । सः नाटके अभिनेष्यमाणायाः कथायाः सूचनां ददाति । तदनन्तरं नाटकस्य प्रारम्भः भवति । संस्कृतनाटके उत्तमजनाः संस्कृतेन, नीचजनाः स्त्रियः च प्राकृतेन भाषन्ते । रङ्गे जलपानं, भोजनं, अग्निः, युद्धम् इत्यादिकं न दर्शनीयम् इति नियमः अस्ति । नाटकस्य अन्ते एकः श्लोकः भवति । प्रायः नायक एव इमं श्लोकं पठति । अस्मिन् श्लोके 'लोकाः समस्ताः सुखिनो भवन्तु' इत्येतादृशम् अर्थपूर्णं मङ्गलाशंसनं भवति । अस्य श्लोकस्य 'भरतवाक्यम्' इति नाम ।

नाटकं सङ्गीतेन युक्तम् । 'गीतं वाद्यं तथा नृत्यं त्रयं सङ्गीतमुच्यते ।' एभिः त्रिभिः युक्तं नाटकं बहु जनप्रियम् अभवत् । 'काव्येषु नाटकं रम्यम्' इत्युक्तिः प्रसिद्धा । यद्यपि लोको भिन्नरुचिः तथापि नाटकं तान् सर्वान् समाराधयति (सन्तोषयति) । संस्कृतसाहित्ये भासः, कालिदासः, शूद्रकः, हर्षः, भवभूतिः इत्यादयः प्रसिद्धाः कवयः नाटकानि रचितवन्तः ।

उदाहरणरूपेण अधः कश्चन नाटकभागः दत्तः अस्ति । एषः भागः कालिदासविरचितात् 'अभिज्ञानशाकुन्तल'नामकात् नाटकात् उद्धृतः ।

दुष्यन्तः - अयि भो महर्षिपुत्र ! किमिति आश्रमविरुद्धम् आचरति भवान् ?
[O son of a great sage ! Why do you act against the rules of the hermitage ?]

तापसी - भद्रमुख ! न खलु अयम् ऋषिकुमारः ।
[Good Sir ! He is not the son of a sage.]

राजा - (*बालकम् उपलालयन्*) अथ कोऽस्य व्यपदेशः ?
[(Fondling the boy) Then which is his family ?]

तापसी - पुरुवंशः । [The family of Puru.]

राजा - (*आत्मगतम्*) कथम् एकान्वयो नाम ! (*प्रकाशम्*) न पुनरात्मगत्या मानुषाणाम् एषः विषयः ।
[(To himself) He belongs to the same family as mine ! (Aloud) But this place is inaccessible to mortals by their own power.]

तापसी - यथा भद्रमुखो भणति । अप्सरस्सम्बन्धेन अस्य जननी अत्र देवगुरोः तपोवने प्रसूता ।
[As the good sir says. But because of her relationship with a nymph his mother gave birth to him in the pen-ance-grove belonging to the teacher of God.]

राजा - (*आत्मगतम्*) हन्त ! द्वितीयमिदम् आशाजननम् । (*प्रकाशम्*) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ?
[(To himself) Ah! This is the second ground of hope.

(Aloud) What is the name of the royal sage whose wife is the lady ?]

तापसी - कः तस्य धर्मदारपरित्यागिनः नाम सङ्कीर्तयितुं चिन्तयति ?
[Who would think of mentioning the name of the person who rejected his lawful wife ?]

राजा - (*स्वगतम्*) इयं खलु कथा मामेव लक्ष्यीकरोति !
[(To himself) This story really points to me.]

द्वितीया तापसी - (*प्रविश्य, मृण्मयूरहस्ता*) सर्वदमन ! शकुन्तलावण्यं प्रेक्षस्व ।
[(Entering, with a clay peacock in her hand) Sarvadamana ! Look at the beauty of the bird.]

बालः - कुत्र वा मम माता ? [Where is my mother ?]

उभे - नामसादृश्येन वञ्चितो मातृवत्सलः ।
[This child fond of his mother is deceived by the similarity to her name.]

राजा - (आत्मगतम्) किं वा शकुन्तलेति मातुराख्या ? सन्ति वा पुनः नामधेयसादृश्यानि ।
[(To himself) What ! His mother's name is Shakuntala ? But again names can be alike.]

प्रथमा - (*विलोक्य सोद्वेगम्*) रक्षाकरण्डकम् अस्य मणिबन्धे न दृश्यते !
[(Looking with alarm) Oh the amulet is not on his wrist.]

राजा - अलमलमावेगेन । ननु इदम् अस्य सिंहशावविमर्दात् परिभ्रष्टम् । (*आदातुम् इच्छति*)
[Do not get alarmed. It was dropped while he was struggling with the lion's cub. (Desires to pick it up)]

उभे - मा खलु इदम् अवलम्ब्य । कथम् ! गृहीतम् अनेन !
[Do not take it. How ! he has already picked it up !]

राजा - किमर्थं प्रतिषिद्धाः स्मः ? [Why am I forbidden ?]

प्रथमा - शृणोतु महाराजः । एषा अपराजिता नाम ओषधिः । अस्य

जातकर्मसमये भगवता मारीचेन दत्ता । एतां किल मातापितरौ आत्मानं च वर्जयित्वा अपरः भूमिपतितां न गृह्णाति ।

[Listen your Majesty. This is the herb Aparajita, given during his birth rites by the holy Maaricha. They say that in case it fell to the earth, no one but the parents or the boy himself may touch it.]

राजा - अथ गृह्णाति ? [If somebody takes ?]

प्रथमा - ततः तं सर्पो भूत्वा दशति ।

[It becomes a snake and bites him.]

राजा - कदाचिदस्या विक्रिया प्रत्यक्षीकृता ?

[Did you ever see it thus transformed ?]

उभे -अनेकशः । [Many times.]

राजा - (*सहर्षम् आत्मगतम्*) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि ?

[(With joy, to himself) Why then do I not welcome my hope fulfilled at last.]

द्वितीया - सुव्रते ! एहि । इमं वृत्तान्तं शकुन्तलायै निवेदयाव ।

[Suvrata ! Come let us carry this news to Shakuntala.]

७. संस्कृतग्रन्थकारपरिचयः

(In this series we will introduce the important authors of Samskrit. The language used will be very simple Samskrit. The objective of this is to help our students know about these authors and their works and more importantly, to inculcate the habit of reading Samskrit material. Dear Students ! do read the passage completely and try to follow the content. However, you need not pay much attention to minute details there of.)

वाल्मीकिः

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ।।

रामायणम् आदिकाव्यम् इति प्रसिद्धम् । इतिहासग्रन्थः इत्यपि भाव्यते एतत् । एतस्य ग्रन्थस्य रचयिता वाल्मीकिः ।

किरातकुले उत्पन्नः सः नारदस्य उपदेशात् तपः अकरोत् । तस्य शरीरम् आवृत्य वल्मीकः उत्पन्नः । ततः सः बहिः आगतः इत्यतः तस्य नाम 'वाल्मीकिः' इति जातम् इति काचित् कथा श्रूयते ।

तमसानदीं स्नानार्थं गच्छन् वाल्मीकिः व्याधेन मारितं क्रौञ्चं पश्यति । तदा शोकाकुलः सः – 'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः' इति व्याधं शपति । ततः नारदमुखात् रामस्य कथां श्रुत्वा सः रामायणं रचयति । सीतारामयोः वियोगः रामायणस्य मुख्यं कथावस्तु ।

महाभारते रामायणस्य कथा वर्णिता दृश्यते । पाणिनेः अष्टाध्याय्याम् अपि कैकेयीकौसल्यादयः शब्दाः दृश्यन्ते । अतः रामायणं महाभारतात् पाणिनेः च पूर्वम् आसीत् इति स्पष्टम् । रामायणं (तत्कर्ता वाल्मीकिः च) कदा आसीत् इति विषये मतभेदाः बहवः सन्ति । तथापि एतावत् तु वक्तुं शक्यते यत् वाल्मीकिः रामायणं क्रि. पू. पञ्चसहस्रवर्षेभ्यः पूर्वम् रचितवान् इति ।

रामायणे २४००० श्लोकाः सन्ति । रामायणस्य प्रतिसहस्रतमश्लोकस्य आदौ गायत्रीमन्त्रस्य एकैकम् अक्षरं प्राप्यते । पाठभेदादयः न भवेयुः इति उद्देशेन एवं कृतं स्यात् कविना । रामायणं सर्वासु भारतीयभाषासु बह्वीषु विदेशीयभाषासु च उपलभ्यते । एतस्मात् रामायणस्य जनप्रियता ज्ञाता भवति ।

वाल्मीकेः शैली ललिता, सरला, सुन्दरी च । श्रीरामस्य धर्मनिष्ठा, सीतायाः सौशील्यं, भरतस्य भ्रातृवात्सल्यं, लक्ष्मणस्य कर्तव्यनिष्ठा, आञ्जनेयस्य कार्यदक्षता, सुग्रीवस्य सौहार्दभावः इत्यादयः अंशाः अतिरमणीयतया चित्रिताः तेन । संस्कृतसाहित्यनिर्माणे वाल्मीकिः शकपुरुषः इत्यत्र न अतिशयोक्तिः ।

व्यासः

महाभारतस्य रचनाकारः भगवान् व्यासः । वेदानां विभागः अनेन कृतः इत्यतः वेदव्यासः इति एतस्य नाम । द्वीपे अस्य जन्म अभवत् इत्यतः 'कृष्णद्वैपायनः' इत्यपि एतस्य नाम । एतस्य पिता पराशरमुनिः माता च सत्यवती ।

महाभारतं लक्षश्लोकात्मकः विस्तृतः ग्रन्थः । व्यासः भारतकथां पुत्रं शुकं शिष्यं वैशम्पायनं च बोधितवान् । वैशम्पायनः जनमेजयं तां कथाम् अवदत् । जनमेजयेन उक्ता भारतकथा एव इदानीम् उपलभ्यते ।

रामायणे इव अत्रापि ब्रह्मा व्यासं भारतकथालेखनाय प्रोत्साहयति । व्यासः योग्यस्य लेखकस्य अभावं वदति । ततः गणेशः भारतकथा-लेखनकार्यम् अङ्गीकरोति । व्यासेन उक्तां भारतकथां सः लिखति च ।

आर्यभटः वदति – क्रि.पू. ३१०१ तमे वर्षे कलियुगस्य आरम्भः अभवत् इति । कलियुगस्य आरम्भदिने श्रीकृष्णः परं धाम गतवान् । ततः ३७ वर्षेभ्यः पूर्वं महाभारतयुद्धं प्रवृत्तम् । अतः महाभारतकालः, व्यासकालः च प्रायः एषः एव इति निर्णेतुं शक्यम् ।

महाभारते बह्व्यः उपकथाः उपलभ्यन्ते । अतः भारतकथाम् अवलम्ब्य गद्यपद्यचम्पूकाव्यादीनि बहूनि लिखितानि विविधैः कविभिः । भगवद्गीता, हरिवंशः इत्यादयः अपि महाभारते एव अन्तर्भवन्ति ।

व्यासस्य शैली अपि वाल्मीकेः इव सरला एव । महाभारतम् अपि आधिक्येन अनुष्टुप्छन्दसा एव उपनिबद्धम् अस्ति ।

कोविदः - प्रथमः पाठः

प्रश्नाः

I. *एतेषां प्रश्नानाम् उत्तराणि लिखत ।*

१. कः मनुष्यः वस्तुतः जीवति ?

२. सज्जनाः किमर्थं जीवन्ति ?

३. 'पीतप्रतिबद्धवत्साम्' - एषः किमन्तः शब्दः ?

४. हिमालयः भारतवर्षस्य कस्मिन् भागे कथं शोभते ?

५. पार्वत्याः माता का ? भ्राता च कः ?

६. रूपकेषु कति भेदाः सन्ति ?

II. *समस्तपदं लिखत ।*

१. ग्रन्थालयस्य कुञ्चिका

२. सीतायाः पुत्रः

३. दाडिमस्य बीजम्

४. कृपणस्य धनम्

५. दास्याः पुत्रः

III. *एतेषां तद्धितान्तपदानां विग्रहवाक्यं लिखत ।*

१. माद्रेयः (माद्री) २. पौत्रः (पुत्र) ३. भागिनेयः (भगिनी)

४. दैत्यः (दिति) ५. आदित्यः (अदिति) ६. सारमेयः (सरमा)

IV. *तद्धितान्तम् एकपदं लिखत ।*

१. रघुवंशे जातः । २. शूरस्य पुत्रः । ३. दुहितुः पुत्रः ।

४. विनतायाः पुत्रः । ५. गर्गवंशे उत्पन्नः । ६. पितृष्वसुः पुत्रः ।

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 256) After completing the exercises check your answers.)

कोविदः - द्वितीयः पाठः

।। महीयांसः प्रकृत्या मितभाषिणः ।।

By nature noble men speak less.

१. समासः

In the previous lesson you learnt about compound words and the sentences explaining their meanings (विग्रहवाक्यानि). You will now know about the different types of Samasa.

Samasas are broadly classified into four kinds namely १. तत्पुरुषः २. द्वन्द्वः ३. बहुव्रीहिः and ४. अव्ययीभावः । तत्पुरुष is further classified as १. तत्पुरुषः (सामान्यः) २. कर्मधारयः ३. द्विगुः ४. नञ्-प्रभृतयः । Considering कर्मधारयः and द्विगुः as independent types, we may say that Samasa is of six kinds. The table below gives the classification of Samasa.

अ. तत्पुरुषः (सामान्यः)

A Compound consisting of two words gets the designation

तत्पुरुष when the sense of the second word of the compound is generally predominant.

Eg. - देवस्य आलयः - देवालयः = Temple

Here the sense of आलयः is predominant.

Tatpurusha Samasa is of 7 kinds.

१. प्रथमातत्पुरुषः - अर्धदिनम् - अर्धं दिनस्य - half-day

२. द्वितीयातत्पुरुषः - ग्रामगतः - ग्रामं गतः - A person (mas) who has gone to the village.

३. तृतीयातत्पुरुषः - विद्यामान्यः - विद्यया मान्यः - A person honoured for his learning.

४. चतुर्थीतत्पुरुषः - देशहितम् - देशाय हितम् - (what is) good for the country.

५. पञ्चमीतत्पुरुषः - चोरभयम् - चोरात् भयम् - fear of thief.

६. षष्ठीतत्पुरुषः - देवालयः - देवस्य आलयः - The shrine of God.

७. सप्तमीतत्पुरुषः - दानशूरः - दाने शूरः - Exceedingly munificent.

In the above examples, the type of Tatpurusha Samasa is determined by the case ending of the former word in the विग्रहवाक्य। Eg. 1. ग्रामगतः - ग्रामं गतः । Here ग्रामम् is द्वितीयाविभक्तिः । Therefore ग्रामगतः is द्वितीयातत्पुरुषः । 2. चोरभयम् - चोरात् भयम् । Here चोरात् is पञ्चमीविभक्तिः, therefore चोरभयम् is पञ्चमीतत्पुरुषः ।

Read the following sentences.

१. श्रीदेवी अद्य केवलम् **अर्धदिनं** कार्यं कृतवती ।
Sridevi worked for only half a day today.

२. **कूपपतितः** बालकः कष्टेन जनैः रक्षितः ।
The boy fallen in the well, was saved by the people with difficulty.

३. **मातृसदृशी** सुभद्रा पाककलायां निपुणा अस्ति ।

Subhadra, like her mother, is an expert in the art of cookery.

४. कुत्रचित् **भूतबलिः** देवपूजायाः भागः अस्ति ।
In some rites offerings made to beings is a part of worship of gods.

५. इदानीन्तनकाले **चोरभयम्** अधिकम् अस्ति ।
Nowadays the fear of thieves is more.

६. **सङ्गीतशाला** अद्य शोभमाना अस्ति ।
The school of music is looking bright today.

७. श्रीमान् शेषण्णः **वीणावादननिपुणः** आसीत् ।
Sri Sheshanna was an expert in playing on the veena.

८. सर्वे **समुद्रतटं** बहु इच्छन्ति ।
Everybody likes the sea-shore very much.

९. **वेदपण्डितः** श्रीकण्ठमूर्तिः सर्वान् बोधितवान् ।
Srikanthamurthy, well - versed in the vedas, taught everybody.

१०. **काव्यकुशलः** कविः आशुकवितां रचितवान् ।
The poet, skilled in poetry, composed a poem instantaneously.

Now study the विग्रहवाक्यानि of the compounds in the above sentences.

१. अर्धं दिनस्य - अर्धदिनम् ।
२. कूपं पतितः - कूपपतितः ।
३. मात्रा सदृशी - मातृसदृशी ।
४. भूतेभ्यः बलिः - भूतबलिः ।
५. चोरात् भयम् - चोरभयम् ।
६. सङ्गीतस्य शाला - सङ्गीतशाला ।
७. वीणावादने निपुणः - वीणावादननिपुणः ।

८. समुद्रस्य तटः - समुद्रतटः ।

९. वेदषु पण्डितः- वेदपण्डितः ।

१०. काव्ये कुशलः - काव्यकुशलः ।

You come across many such compound words in Samskrit language. Try to identify and dissolve them (write the विग्रहवाक्य).

आ. नञ्प्रभृतयः

नञ्समास and a few others are grouped under नञ्प्रभृतयः । These are, infact, sub divisions of Tatpurusha samasa only. Important among them are the following five.

१. **नञ्समासः** - अधर्मः = न धर्मः - which is not Dharma (unrighteousness).

२. **कुसमासः** - कुपुरुषः = कुत्सितः पुरुषः - A wicked person.

३. **प्रादिसमासः** - अतिदेवः = अतिक्रान्तः देवम् - One who surpasses God.

४. **गतिसमासः** - शुक्लीकृत्य = अशुक्लं शुक्लं कृत्वा - Making it white.

५. **उपपदसमासः** - कुम्भकारः = कुम्भं करोति इति - Potmaker.
- शास्त्रज्ञः = शास्त्रं जानाति इति - One who knows Shastras.

Read the following sentences.

१. सज्जनाः **अधर्मं** न सहन्ते ।
Pious men do not tolerate injustice.

२. दिनेशः क्रीडायाम् **अपटुः** अस्ति ।
Dinesh is not good in sports.

३. जनाः **कुरूपं** न इच्छन्ति ।
People do not like ugliness.

४. **कुकृत्येन** पापं सम्भवति ।
Wrong doing results in sin.

५. सुगुणेन्द्रः तस्य विद्यालयस्य **प्राचार्यः** अस्ति ।
Sugunendra is the professor in that college.

६. **सुजनः** केनापि वैरं न करोति ।
A noble man will not have enmity with anyone.

७. संस्कृतं **सरलीकृत्य** वयं छात्रान् पाठयाम ।
Let us simplify Samskrit and teach students.

८. मातुः आदेशेन पुत्रः स्वप्रकोष्ठं **स्वच्छीकृत्य** शालां गच्छति ।
Following his mother's command the son cleans his room and goes to school.

९. पञ्जरे स्थितोऽपि सिंहः **भयङ्करः** एव ।
Though inside a cage the lion causes fear.

१०. अस्माकं शिक्षकः **शास्त्रज्ञः** अस्ति ।
Our teacher is conversant with scriptures.

Observe how the compounds in the above sentences are dissolved.

१. न धर्मः - अधर्मः
२. न पटुः - अपटुः
३. कुत्सितं रूपं - कुरूपम्
४. कुत्सितं कृत्यम् - कुकृत्यम्
५. प्रगतः आचार्यः - प्राचार्यः
६. शोभनः जनः - सुजनः
७. असरलं सरलं कृत्वा - सरलीकृत्य
८. अस्वच्छं स्वच्छं कृत्वा - स्वच्छीकृत्य
९. भयं करोति इति - भयङ्करः
१०. शास्त्रं जानाति इति - शास्त्रज्ञः

२. विशेषविषयाः

तद्धितान्ताः - २

Study these sentences -

१. ऐरावतः **ऐन्द्रः** गजः । Iravatha is Indra's elephant.

२. वयं **भारतीयाः** । We belong to Bharatha.
३. अर्जुने **शौर्यम्** अस्ति । Arjuna has bravery. [In Arjuna there is valour}
४. पुष्पे **कोमलत्वम्** अस्ति । Flower is delicate. [Delicate nature is in the flower.]
५. भाषणे **मधुरता** भवेत् ।
There should be sweetness in speech.
६. रामः **गुणी रूपवान् शक्तिमान्** च ।
Rama is virtuous, handsome and powerful.
७. सीता **गुणिनी रूपवती बुद्धिमती** च ।
Sita is virtuous, beautiful and clever.
८. पुष्पं **सुगन्धि वर्णवत् रेणुमत्** च ।
Flower is fragrant, colourful and has pollen.

In the first sentence ऐन्द्रः means 'Indra's' or 'related to Indra'. Such words are called सम्बन्धार्थक-तद्धितान्ताः । (you have already learnt about तद्धितान्त in the first lesson) Here 'अ' is a suffix added to the nominal stem इन्द्र making it ऐन्द्र । Since ऐन्द्र is an adjective it always follows the noun in gender, case and number. Meaning of these words is explained thus.

Eg. - इन्द्रस्य अयम् = ऐन्द्रः (गजः) - पुंलिङ्गम्
इन्द्रस्य इयम् = ऐन्द्री (सभा) - स्त्रीलिङ्गम्
इन्द्रस्य इदम् = ऐन्द्रम् (वनम्) - नपुंसकलिङ्गम्

In the same way, words like शिव > शैव, विष्णु > वैष्णव, समुद्र > सामुद्र are formed.

In the second sentence the suffix ईय is added to the nominal stem भारत making it भारतीय to mean "related to India". विदेशीय, मानवीय, नाटकीय are सम्बन्धार्थक-तद्धितान्त words with ईयप्रत्यय ।.
These words are also explained like ऐन्द्र.

तद्धितान्त in the third, fourth, and fifth sentences are called

भावार्थक–तद्धितान्त words. भाव means nature or an innate quality. शौर्यम् is a भाव in शूर. (The innate quality in brave is called bravery.)

Read the following sentences.

अर्जुनः शूरः । - Arjuna is brave.

अर्जुने शौर्यम् अस्ति । Arjuna has bravery.

शौर्यम् is explained as शूरस्य भावः

Likewise - कोमलस्य भावः = कोमलत्वम्

मधुरस्य भावः = मधुरता

य, त्वम्, ता are भावार्थक - तद्धित suffixes of the same meaning. These are added to adjectives to make भावार्थक-तद्धितान्त-नामपद.

When य or त्वम् is added the word formed is in नपुंसकलिङ्गम् । The suffix ता makes a word स्त्रीलिङ्गम् । धैर्यम्, धीरत्वम्, धीरता are भावार्थक-तद्धितान्त words.

The word in 6th, 7th and 8th sentences are called मत्वर्थीय-तद्धितान्ताः

These are explained thus -

गुणः अस्य अस्ति इति = गुणी (in पुंलिङ्ग)

गुणः अस्याः अस्ति इति = गुणिनी (in स्त्रीलिङ्ग)

गुणः अस्य अस्ति इति = गुणि (in नपुंसकलिङ्ग)

Similarly -

One who has		is called		or	
	बल	is called	बलवान्	or	बली
	धन	,,	धनवान्	,,	धनी
	दण्ड	,,	दण्डवान्	,,	दण्डी
	विद्या	,,	विद्यावान्		
	शक्ति	,,	शक्तिमान्		
	श्री	,,	श्रीमान्		
	धृति	,,	धृतिमान्		

If the words have अ or आ at the end वान् is added, if other

vowels are at the end मान् is added,. Only पुंलिङ्ग forms of the words are given here. स्त्रीलिङ्ग and नपुंसकलिङ्ग forms of these words are as shown in sentences 7 and 8. (बुद्धिमती and रेणुमत्)

अभ्यासाः

अ) *अधः दत्तानां समासानां विग्रहं दृष्ट्वा समासनाम लिखत ।*

उदा - अपरकायः - अपरं कायस्य - प्रथमातत्पुरुषः

समासः	विग्रहः	समासनाम
१. अर्धग्रामः	अर्धं ग्रामस्य	....
२. भूतबलिः	भूतेभ्यः बलिः	....
३. कार्यकुशलः	कार्ये कुशलः	....
४. अक्षशौण्डः	अक्षेषु शौण्डः	....
५. लोकहितम्	लोकाय हितम्	....
६. व्याघ्रभीतः	व्याघ्रात् भीतः	....
७. वृक्षमूलम्	वृक्षस्य मूलम्	....
८. नखभिन्नः	नखैः भिन्नः	....
९. गृहगतः	गृहं गतः	....
१०. वनगतः	वनं गतः	....
११. विद्याविहीनः	विद्यया विहीनः	....
१२. एकोना	एकेन ऊना	....
१३. कविरचितम्	कविना रचितम्	....
१४. गृहरक्षणम्	गृहस्य रक्षणम्	....
१५. पितृसमः	पित्रा समः	....
१६. विशेषज्ञः	विशेषं जानाति इति	....
१७. निशाकरः	निशां करोति इति	....
१८. दिनकरः	दिनं करोति इति	....
१९. प्राचार्यः	प्रगतः आचार्यः	....
२०. दीर्घीकृत्य	अदीर्घं दीर्घं कृत्वा	....

आ) *समस्तपदं लिखित्वा समासनाम निर्दिशत ।*

उदा - भगवता गीता - भगवद्गीता - तृतीयातत्पुरुषः

विग्रहः		*समासः*		*समासनाम*
१. हरिणा त्रातः	-	....	-	....
२. क्षीरेण ओदनः	-	....	-	....
३. गुडेन मिश्रः	-	....	-	....
४. मासेन अवरः	-	....	-	....
५. कूपं पतितः	-	....	-	....
६. कुत्सिता गतिः	-	....	-	....
७. गवे हितम्	-	....	-	....
८. वृकात् भीतिः	-	....	-	....
९. वेदे पण्डितः	-	....	-	....
१०. चक्रे बन्धः	-	....	-	....
११. कर्म करोति इति	-	....	-	....
१२. संशयम् आपन्नः	-	....	-	....
१३. न ब्राह्मणः	-	....	-	....
१४. जलं ददाति इति	-	....	-	....
१५. रणे धीरः	-	....	-	....

इ) *अधोनिर्दिष्टानां विग्रहवाक्यानि लिखत ।*

१. अर्धफलम् ....

२. नगरगतः ....

३. धनमान्यः ....

४. देशहितम् ....

५. व्याघ्रभयम् ....

६. नृपमन्दिरम् ....

७. रणशूरः ....

८. अनश्वः ....

९. कुरूपम् ....

१०. स्पष्टीकृत्य ....

११. भाष्यकारः ....

ई) *उदाहरणानुसारं तद्धितान्तानि पदानि लिखत ।*

तद्धितान्तरूपाणि

(i) *उदा - शूरस्य भावः - शौर्यम्, शूरता, शूरत्वम्*

१. धीरस्य भावः ....

२. वीरस्य भावः ....

३. मधुरस्य भावः ....

४. लवणस्य भावः ....

५. कठिनस्य भावः ....

६. सुन्दरस्य भावः ....

(ii) *उदा - गुणः अस्य अस्ति इति - गुणी, गुणवान्*

१. दण्डः अस्य अस्ति इति - ....

२. धनम् अस्य अस्ति इति - ....

३. बलम् अस्य अस्ति इति - ....

४. चक्रम् अस्य अस्ति इति - ....

५. शिखा अस्य अस्ति इति - ....

६. शूलम् अस्य अस्ति इति - ....

पुं. स्त्री.

(iii) *उदा - श्रीः अस्य/अस्याः अस्ति इति - श्रीमान् / श्रीमती*

१. शक्तिः अस्य/अस्याः अस्ति इति - ..../..........

२. धृतिः अस्य/अस्याः अस्ति इति - ..../..........

३. मतिः अस्य/अस्याः अस्ति इति - ..../..........

४. बुद्धिः अस्य/अस्याः अस्ति इति - ..../..........

५. कान्तिः अस्य/अस्याः अस्ति इति - ..../..........

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 257) After completing the exercises check your answers.)

३. सुभाषितानि

३. यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ।।

पदविभागः

यत्, अचेतनः, अपि, पादैः, स्पृष्टः, प्रज्वलति, सवितुः, इनकान्तः, तत्, तेजस्वी, पुरुषः, परकृतनिकृतिम्, कथम्, सहते ।

अन्वयः

इनकान्तः अचेतनः अपि सवितुः पादैः स्पृष्टः यत् प्रज्वलति, तत् तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ?

अन्वयार्थः

इनकान्तः = सूर्यकान्तमणिः, अचेतनः अपि = चेतनारहितवस्तु चेत् अपि, सवितुः = सूर्यस्य, *पादैः = किरणैः, स्पृष्टः = यदा स्पृष्टः भवति तदा, यत् = यथा, प्रज्वलति = सम्यक् ज्वलति, तत् = तथा, तेजस्वी = अभिमानी पुरुषः, परकृतनिकृतिं = अन्यैः कृतम् अपमानम्, कथं, सहते = सोढुं शक्नुयात् ?

तात्पर्यम्

लोके सामान्यः पुरुषः अपि अन्यैः कृतं स्वस्य अपमानं न सहते । स्वाभिमानी पुरुषः अन्यैः कृतम् अपमानं न सहते इति तु न वक्तव्यम् । तस्य उदाहरणम् अपि कविना दत्तं यत् सूर्यकान्तमणिः यदा सूर्यकिरणैः स्पर्शं प्राप्नोति तदा झटिति प्रज्वलति । अचेतने मणौ एव एतादृशः स्वभावः दृश्यते । सचेतनानां विषये तु वक्तव्यमेव नास्ति ।

४. अकृत्यं नैव कर्तव्यं प्राणत्यागेऽपि संस्थिते ।
न च कृत्यं परित्याज्यमेष धर्मः सनातनः ।।

पदविभागः

अकृत्यम्, न, एव, कर्तव्यम्, प्राणत्यागे, अपि, संस्थिते, न, च, कृत्यम्, परित्याज्यम्, एषः, धर्मः, सनातनः ।

---

* Here the word पादैः is used in dual sense - 'feet' and 'rays'.

अन्वयः

प्राणत्यागे संस्थिते अपि अकृत्यं न कर्तव्यम् एव, कृत्यं च न परित्याज्यम् । एषः सनातनः धर्मः ।

अन्वयार्थः

प्राणत्यागे = प्राणनाशे, संस्थिते अपि = आगते अपि, अकृत्यं = दुष्टकार्यं, न कर्तव्यम् एव = न करणीयम् एव, च = तथा च, कृत्यं = सत्कार्यं, न परित्याज्यम् = न त्यक्तव्यम्, एषः, सनातनः = चिरन्तनः, धर्मः ।

तात्पर्यम्

सामान्यतः लोके जनाः आपत्काले यत्किमपि अकार्यं कर्तुं सिद्धाः भवन्ति । किन्तु अस्माकं संस्कृतिः अस्मान् उपदिशति यत् यस्यां कस्याञ्चित् अपि परिस्थितौ मनुष्येण अकार्यं न करणीयम्, प्राण-त्यागप्रसङ्गे प्राप्ते सत्यपि अकार्यस्य चिन्तनं न युक्तम् इति । यथा अकार्यस्य करणं न युक्तं तथैव स्वस्य धर्मस्य परित्यागः अपि न युक्तः ।

४. काव्यकथा

इन्द्रेण स्मृतः मन्मथः इन्द्रसमीपम् आगतवान् । तेन सह तस्य पत्नी रतिः अपि आगता । मन्मथः करेण धनुः धृतवान् । तत् धनुः पुष्पैः निर्मितम् । मन्मथः देवेन्द्रं नमस्कृतवान्, उक्तवान् च - 'प्रभो ! किमर्थं मां भवान् स्मृतवान् ? आज्ञापयतु' इति ।

इन्द्रः सन्तुष्टः अभवत् । सः - 'लोककल्याणार्थं हरस्य पार्वत्याः च विवाहः कर्तव्यः अस्ति । हरः तपसि निमग्नः[1] । तस्य मनः आकर्षणीयम् । इदं कार्यं त्वया कर्तव्यम्' इति उक्तवान् । ततः मन्मथः वसन्तेन सह ईश्वरस्य तपोवनं गतवान् । वसन्तस्य प्रभावेण अकाले अपि वसन्तऋतुप्रभावः जातः । मलयमारुतः अवहत् । अशोकादिवृक्षेषु पुष्पाणि उत्पन्नानि । एवं सर्वत्र ऋतुप्रभावः आसीत् । तथापि जितेन्द्रियः हरः न विचलितः । तं दृष्ट्वा भीतः मन्मथः चापं[2] त्यक्तवान् ।

ततः पार्वती पूजाद्रव्याणि गृहीत्वा तत्र आगतवती । ईश्वरं नमस्कृतवती । ईश्वरः - 'अनन्यभाजं[3] पतिम् आप्नुहि' इति आशीर्वादं कृतवान् । ईश्वरेण

1. immersed, 2. the bow, 3. not devoted to any other person

अनुगृहीतां पार्वतीं दृष्ट्वा मन्मथः पुनः धैर्यं प्राप्तवान् । ततः अयमेव युक्तः कालः इति विचिन्त्य मन्मथः सम्मोहनास्त्रं धनुषि योजितवान्[4] । तदा हरः किञ्चित् लुप्तधैर्यः[5] अभवत् । चञ्चलः भूत्वा उमामुखे दृष्टिं प्रसारितवान् । तादृशं परमेश्वरं दृष्ट्वा पार्वती रोमाञ्चिता[6] बभूव । चकितः हरः चित्तविक्षोभस्य कारणं किम् इति विचिन्तितवान् । पार्श्वे अपश्यत् च । तत्र स्थितं मन्मथं वीक्ष्य हरः अतीव क्रुद्धः । समीपे स्थिताः सर्वे अपि देवाः - 'प्रभो ! क्रोधं संहर ! संहर !' इति प्रार्थितवन्तः । किन्तु तस्मिन् एव समये ईश्वरः तृतीयं नेत्रम् उद्घाटितवान् । तदा अग्निः बहिः स्फुरितः[7] । अग्निना मदनः दग्धः । भस्मीभूतः च । तपसः विघ्नः समुत्पन्नः इति तं प्रदेशम् एव परित्यज्य ईश्वरः तु अन्यत्र गतवान् । पार्वती स्वकीयं सौन्दर्यं निष्फलम् इति मत्वा लज्जया[8] निराशतया च प्रतिनिवृत्ता ।

ईश्वरेण दग्धं मन्मथं दृष्ट्वा रतिः मूर्च्छिता । किञ्चित्कालानन्तरं प्रबुद्धा[9] । पुरतः भस्मराशिं वीक्ष्य[10] सा बहु विलापं कृतवती । ततः सा वसन्तम् उद्दिश्य - "वसन्त ! मन्मथं विना कथम् अहं जीवामि ? चितां सिद्धां कुरु । अहं देहत्यागं करिष्यामि" इति उक्तवती । तदा आकाशे अशरीरवाणी श्रुता । 'रतिदेवि ! साहसं मा कुरु । तव पतिः ब्रह्मशापेन मृतः । शीघ्रम् एव पुनः जीविष्यति । मरणचिन्तां त्यक्त्वा स्वशरीरं परिरक्ष' इति । वसन्तः अपि समाधानम् उक्तवान् । रतिः कथञ्चित् समाधानं प्राप्तवती ।

प्रश्नाः

१. मन्मथस्य पत्नी का ?
२. नमस्कृतवतीं पार्वतीं हरः किमिति आशीर्वचनमुक्तवान् ?
३. रतिः किमर्थं देहत्यागं कर्तुमैच्छत् ?
४. ईश्वरः किमर्थं तं प्रदेशं परित्यज्य गतवान् ?

५. श्लोकेषु अन्वयक्रमः

२. **तस्याः** खुरन्यासपवित्रपांसुमपांसुलानां **धुरि कीर्तनीया ।**
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ।।

पदविभागः

तस्याः[1], खुरन्यासपवित्रपांसुम्[2], अपांसुलानाम्[3], धुरि[4], कीर्तनीया[5], मार्गम्[6], मनुष्येश्वरधर्मपत्नी[7], श्रुतेः[8], इव[9], अर्थम्[10], स्मृतिः[11], अन्वगच्छत्[12] ।।

अन्वयः

अपांसुलानां धुरि कीर्तनीया मनुष्येश्वरधर्मपत्नी खुरन्यासपवित्रपांसुं तस्याः मार्गं, स्मृतिः श्रुतेः अर्थम् इव अन्वगच्छत् ।

प्रतिपदार्थः

मनुष्येश्वरधर्मपत्नी = (Sudakshina) the wife of king (Dilipa), कीर्तनीया = who deserved to be eulogised, धुरि = in the fore-front, अपांसुलानाम् = of chaste women, अन्वगच्छत् = followed, तस्याः मार्गम् = her path (the path of the cow Nandini), स्मृतिः इव = like the Smriti text (following), श्रुतेः अर्थम् = the sense of the Vedas, खुर...पांसुम् = the dust on which path was made sacred by the cow placing her hooves.

तात्पर्यम्

दिलीपस्य पत्नी सुदक्षिणा न साधारणी । सा पतिव्रतानां पुरतः गणनीया । नन्दिन्याः खुरैः पवित्रा धूलिः यस्मिन् मार्गे आसीत्, तम् एव मार्गम् अनुसृत्य गतवती सा । यथा वेदैः उक्तम् एव अर्थं स्मृतयः अनुसृत्य कथयन्ति तथा इति दृष्टान्तः । चक्रवर्तिनः पत्नी अपि गोमार्गे गतवती । पतिर्दिलीपः यत्कार्यं करोति श्रद्धया स्वयमपि तत् करोति स्म सा इत्यतः धर्मपत्नी इति तस्याः विशेषणम् ।

अन्वयक्रमः

अन्वगच्छत् - अनुगतवती - *क्रियापदम्*
का अन्वगच्छत् ? - मनुष्येश्वरधर्मपत्नी
कीदृशी मनुष्येश्वरधर्मपत्नी ? - कीर्तनीया
कुत्र कीर्तनीया ? - धुरि

---

4. yoked or drew the bow-string 5. unsteady, 6. thrilled. 7. emerged, 8. with shame 9. regained consciousness.

कासां धुरि ? - अपांसुलानाम्
कम् अन्वगच्छत् ? - मार्गम्
कीदृशं मार्गम् ? - खुरन्यासपवित्रपांसुम्
कस्याः मार्गम् ? - तस्याः
कथम् अन्वगच्छत् ? - श्रुतेः अर्थं स्मृतिः इव

विशेषः

अ) पदविवरणम्

1. दकारान्तः 'तद्'शब्दः स्त्री. ष.वि. ए.व.
2. उकारान्तः 'खुरन्यास......पांसु'शब्दः पु. द्वि.वि. ए.व.
3. आकारान्तः 'अपांसुला'शब्दः स्त्री. ष.वि. ब.व.
4. रेफान्तः 'धुर्'शब्दः स्त्री. स.वि. ए.व.
5. आकारान्तः 'कीर्तनीया'शब्दः स्त्री. प्र.वि. ए.व.
6. अकारान्तः 'मार्ग'शब्दः पु. द्वि.वि. ए.व.
7. ईकारान्तः 'मनुष्येश्वरधर्मपत्नी'शब्दः स्त्री. प्र.वि. ए.व.
8. इकारान्तः 'श्रुति'शब्दः स्त्री. ष.वि ए.व.
9. अव्ययम् 'इव'
10. अकारान्तः 'अर्थ'शब्दः पु. द्वि.वि. ए.व.
11. इकारान्तः 'स्मृति'शब्दः स्त्री. प्र.वि. ए.व.
12. अनु-उपसर्गपूर्वकः 'गम्'धातुः प.प. भूतकालः(लङ्). प्र.पु. ए.व.

आ) समासः

१. खुराणां न्यासः - षष्ठीतत्पुरुषः
खुरन्यासैः पवित्राः - तृतीयातत्पुरुषः
खुरन्यासपवित्राः पांसवः यस्य सः - खुरन्यासपवित्रपांसुः - बहुव्रीहिः

२. मनुष्याणाम् ईश्वरः - षष्ठीतत्पुरुषः
मनुष्येश्वरस्य धर्मपत्नी - मनुष्येश्वरधर्मपत्नी - षष्ठीतत्पुरुषः

ततः दिलीपः सुदक्षिणाम् आश्रमं सम्प्रेष्य अनुचरानपि प्रेषितवान् ।
ततः -

**३. आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ।।**

पदविभागः

आस्वादवद्भिः[1], कवलैः[2], तृणानाम्[3], कण्डूयनैः[4], दंशनिवारणैः[5], च[6], अव्याहतैः[7], स्वैरगतैः[8], सः[9], तस्याः[10], सम्राट्[11], समाराधनतत्परः[12], अभूत्[13]

अन्वयः

सः सम्राट् आस्वादवद्भिः तृणानां कवलैः, कण्डूयनैः, दंशनिवारणैः, अव्याहतैः स्वैरगतैः च तस्याः समाराधनतत्परः अभूत् ।

प्रतिपदार्थः

सम्राट् सः = The sovereign king (Dilipa), समाराधनतत्परः अभूत् = was engaged in the service, तस्याः = of that cow, तृणानाम् कवलैः = by (offering to her) morsels of grass, आस्वादवद्भिः = that were tasty, कण्डूयनैः = by scratching (her body), दंशनिवारणैः = by keeping off the flies, and स्वैरगतैः = by (allowing her) free movement, अव्याहतैः = that was uninterrupted.

तात्पर्यम्

सुदक्षिणा आश्रमं प्रतिनिवृत्ता । सेवकाः अपि प्रत्यागच्छन् । राजा दिलीपः एकाकी धेनुं नयन् अरण्यमार्गे गतवान् । सः धेनवे तृणानि खादितुं ददाति स्म । तानि तृणानि बहु रुचिकराण्यासन् । तदा तदा राजा धेनोः शरीरस्य उपरि हस्तं प्रसार्य कण्डूयनं करोति स्म । शरीरे स्थितान् दंशान् दूरीकरोति स्म । नन्दिनी यत्र गन्तुम् इच्छति तत्रैव राजापि गच्छति स्म । तस्याः गमनस्य निषेधं न करोति स्म । एवं विविधप्रकारैः चक्रवर्ती दिलीपः तां नन्दिनीं सेवितवान् ।

अन्वयक्रमः

अभूत् = अभवत् - *क्रियापदम्*

कः अभूत् ? - सः

कीदृशः सः ? - सम्राट्
कीदृशः अभूत् ? – समाराधनतत्परः
कस्याः समाराधनतत्परः ? - तस्याः
कैः समाराधनम् ? - कवलैः
कीदृशैः कवलैः ? - आस्वादवद्भिः
केषां कवलैः ? - तृणानाम्
पुनः कैः ? - कण्डूयनैः
पुनः कैः ? - दंशनिवारणैः
पुनः कैः ? - स्वैरगतैः
कीदृशैः स्वैरगतैः ? - अव्याहतैः

विशेषः

अ) पदविवरणम्

1. तकारान्तः 'आस्वादवत्'शब्दः पु. तृ.वि. ब.व.
2. अकारान्तः 'कवल'शब्दः पु. तृ.वि. ब.व.
3. अकारान्तः 'तृण'शब्दः न. ष.वि. ब.व.
4. अकारान्तः 'कण्डूयन'शब्दः न. तृ.वि. ब.व.
5. अकारान्तः 'दंशनिवारण'शब्दः न. तृ.वि. ब.व.
6. अव्ययम् 'च'
7. अकारान्तः 'अव्याहत'शब्दः न. तृ.वि. ब.व.
8. अकारान्तः 'स्वैरगत'शब्दः न. तृ.वि. ब.व.
9. दकारान्तः 'तद्'शब्दः पु. प्र.वि. ए.व.
10. दकारान्तः 'तद्'शब्दः स्त्री. ष.वि. ए.व.
11. जकारान्तः 'सम्राज्'शब्दः पु. प्र.वि. ए.व.
12. अकारान्तः 'समाराधनतत्पर'शब्दः पु. प्र.वि. ए.व.
13. 'भू'धातुः प.प. भूतकालः(लुङ्). प्र.पु. ए.व.

आ) समासः

१. दंशानां निवारणानि - तैः - षष्ठीतत्पुरुषः

२. न व्याहतानि - अव्याहतानि - तैः - नञ्समासः
३. स्वैराणि गतानि - स्वैरगतानि - तैः - कर्मधारयः
४. तत् एव परः यस्य सः - तत्परः - बहुव्रीहिः
५. समाराधने तत्परः - समाराधनतत्परः - सप्तमीतत्पुरुषः

६. संस्कृतसाहित्यपरिचयः

गद्यकाव्यम्

काव्यं द्विविधं - गद्यं पद्यं चेति । श्लोकमयं पद्यम् । तद्भिन्नं काव्यं गद्यम् । गद् (व्यक्तायां वाचि) धातुतः 'गद्यम्' इति शब्दः निष्पन्नः । सामान्यतः प्रादेशिकभाषासु पद्यमेव काव्यमिति व्यवहारः दृश्यते । संस्कृते तु गद्यमपि काव्यमिति परिगण्यते ।

गद्यकाव्यरचनायां पद्यस्य इव अधिकाः नियमाः न सन्ति । तथापि गद्यरूपेण लिखितं सर्वमपि काव्यमिति न मन्यते । गद्यकाव्यस्य शैली रमणीया भवेत् । वर्णनं, रसपोषणं, पात्रपोषणम् इत्यादिकं सर्वम् अपि परस्परं पूरकं भवेत् । स्वेच्छया कश्चित् किञ्चित् गद्यरूपेण लिखति चेत् तत् काव्यं न भवति । गद्यकाव्यं लेखितुमपि प्रतिभा, परिश्रमः च आवश्यकः । दोषरहितं रसभरितं काव्यम् एव सहृदयानां श्लाघनं प्राप्नोति । अतः एव उक्तम् - 'गद्यं कवीनां निकषं वदन्ति' इति । गद्यकाव्यस्य रचनया एव कवेः कवित्वशक्तेः परीक्षा भवति इति तस्य वाक्यस्य अर्थः । (निकषः = सुवर्णस्य परीक्षार्थं प्रयुज्यमाना शिला ।)

गद्यकाव्ये प्रधानतया ओजोगुणः भवेत् । समासभूयस्त्वं ओजोगुणस्य लक्षणम् । समासकरणेन अल्पैः शब्दैः एव अधिकः विषयः वक्तुं शक्यते इत्येव अधिकतया समासः उपयुज्यते । कविः दण्डी एवम् उक्तवान् - 'ओजः समासभूयस्त्वम् एतत् गद्यस्य जीवितम्' इति ।

पद्यकाव्यस्य अपेक्षया गद्यकाव्ये विषयान् वर्णयितुं कवेः अधिकं स्वातन्त्र्यं विद्यते । पद्यकाव्यं श्लोकरूपेण भवति इति कारणेन तत्र नियमाः अधिकाः । नियमानां परिधौ एव कविना शब्दाः प्रयोक्तव्याः भवन्ति । गद्यकाव्यस्य एतादृशाः नियमाः न सन्ति इति कारणेन स्वस्य इच्छानुसारं

शब्दान् प्रयोक्तुं शक्नोति कविः ।

केचन गद्यकाव्यं कथा आख्यायिका च इति द्विधा विभजन्ते । कथायाः वस्तु काल्पनिकम्, आख्यायिकायाः वस्तु इतिहासप्रसिद्धश्च भवति इति ते तयोः भेदं प्रकल्पयन्ति ।

बाणभट्टेन रचितं 'कादम्बरी' नाम काव्यं कथायाः उदाहरणम् । 'हर्षचरितं' नाम काव्यम् आख्यायिकायाः उदाहरणम् ।

पद्यकाव्यस्य इव गद्यकाव्यस्यापि इतिहासः प्राचीनः । व्याकरण-महाभाष्ये पतञ्जलिना वासवदत्ता, सुमनोत्तरा, भैमरथी इत्यादयः आख्यायिकाः इति उल्लिखिताः । किन्तु एतानि गद्यकाव्यानि न कुत्रापि अद्यपर्यन्तम् उपलब्धानि ।

सद्यः उपलभ्यमानेषु गद्यकाव्येषु सुबन्धोः 'वासवदत्ता' एव प्राचीनतमं काव्यम् । एतस्याः कथा काल्पनिकी । अनन्तरकालीनेषु गद्यकाव्येषु बाणस्य कादम्बर्याः, हर्षचरितस्य च विशिष्टं स्थानम् अस्ति । बाणस्य वर्णनकौशलं तु अद्वितीयम् । तस्य लोकज्ञानं, विषयस्य सूक्ष्मावलोकन-सामर्थ्यं च महत् आसीत् इति तस्य काव्ययोः अध्ययनेन ज्ञायते। कादम्बरीकाव्यस्य वस्तु काचित् काल्पनिकी कथा । हर्षचरितम् इतिहासप्रसिद्धस्य राज्ञः हर्षवर्धनस्य विषये लिखिता आख्यायिका ।

दण्डिनः अवन्तिसुन्दरीकथा, दशकुमारचरितं, धनपालस्य तिलकमञ्जरी, वादीभसिंहस्य गद्यचिन्तामणिः इत्यादीनि अन्यानि प्रसिद्धानि गद्यकाव्यानि ।

गद्यकाव्यं कीदृशं भवति इति ज्ञापयितुम् अत्र 'हर्षचरितसङ्ग्रह'नामकात् ग्रन्थात् उद्धृतः कश्चन भागः दीयते ।

पूर्वं श्रीकण्ठजनपदे पुष्पभूतिः नाम राजा आसीत् । कदाचित् सः शैवगुरुं भैरवाचार्यं द्रष्टुं सङ्कल्पं करोति । अनन्तरम्.......

अपरेद्युश्च[१] प्रातरेव उत्थाय वाजिनम्[२] अधिरुह्य[३] कतिपयैः एव राजपुत्रैः परिवृतः भैरवाचार्यं द्रष्टुं प्रतस्थे[४] । गत्वा च किञ्चिदनन्तरं, अभिमुखम् आपतन्तं[५] भैरवाचार्यशिष्येषु अन्यतमम् अद्राक्षीत्[६] । अप्राक्षीत्[७] च -

---

१. अनन्तरदिने २. अश्वम् ३. आरुह्य ४. प्रस्थितवान् ५. आगच्छन्तम् ६. दृष्टवान् ७. पृष्टवान्

''क्व भगवान् आस्ते[८] ?'' इति । सः अकथयत् - ''अस्य जीर्णमातृगृहस्य उत्तरेण बिल्ववाटिकाम् अध्यास्ते[९]'' इति । राजा गत्वा च तं प्रदेशम् अवततार, प्रविवेश च बिल्ववाटिकाम् ।

अथ महतः कार्पटिकवृन्दस्य मध्ये, प्रातरेव स्नातम्, अनुष्ठिताग्निकार्यं, व्याघ्रचर्मणि उपविष्टम्, अबहुभाषिणं, मन्दहासिनं, सर्वोपकारिणं, कुमारब्रह्मचारिणं, धाम[१०] धर्मस्य, पत्तनं पूततायाः, शालां शीलस्य, क्षेत्रं क्षमायाः, आकरं करुणायाः, समाजं सौजन्यस्य, भगवन्तं साक्षात् इव विरूपाक्षं भैरवाचार्यं ददर्श ।

भैरवाचार्यस्तु दूरादेव राजानं दृष्ट्वा प्रत्युज्जगाम[११] । समर्पित-श्रीफलोपायनश्च गम्भीरया गिरा[१२] स्वस्तिशब्दम् अकरोत् । नरपतिः अपि दूरावनतः प्रणामं चकार । आचार्योऽपि - ''आगच्छ । अत्र उपविश'' इति शार्दूलचर्म आत्मीयम्[१३] अदर्शयत् ।

उपदर्शितप्रश्रयस्तु[१४] राजा मधुरसमयीं प्रवर्तयन् वाचं व्याजहार[१५] - ''भगवन् ! नार्हसि माम् अन्यनृपालान् इव भावयितुम् । अभूमिः अयम् उपचाराणाम् । अलम् अतियन्त्रणया[१६] । दूरस्थितोऽपि मनोरथशिष्योऽयं भवताम् । माननीयं च गुरुवत् न उल्लङ्घनमर्हति गुरोः आसनम् । आसतां[१७] च भवन्तः एव अत्र'' इति । एवं व्याहृत्य[१८] राजा परिजनोचिते वाससि[१९] निषसाद[२०] । भैरवाचार्योऽपि प्रीत्या अनतिक्रमणीयं नृपवचनम् अनुवर्तमानः पूर्ववत् तदेव व्याघ्राजिनम् अभजत ।

आसीने च सराजके परिजने शिष्यजने च, समुचितम् अर्घ्यादिकं चक्रे । क्रमेण च नृपमाधुर्यापहृतान्तःकरणः उवाच - ''तात ! अतिनम्रता एव ते कथयति गुणानां गौरवम् । सकलसम्पत्पात्रम् असि । जन्मनः प्रभृति अदत्तदृष्टिः अस्मि स्वापतेयेषु[२१] । धनैः अविक्रीतं क्वचित् शरीरकम् अस्ति । भैक्षरक्षिताः सन्ति प्राणाः । कष्टेन उपार्जितानि कतिचित् विद्यन्ते विद्याक्षराणि । भगवच्छिवभट्टारकसेवया समुपार्जिता कियत्यपि सन्निहिता

---

८. तिष्ठति (अस्ति) ९. अधिवसति १०. आश्रयस्थानम् (गृहम्) ११. स्वागती-कृतवान् १२. वचनेन १३. स्वकीयम् १४. यः विनयं दर्शितवान् सः १५. उक्तवान् १६. अनुरोधः १७. उपविशन्तु १८. उक्त्वा १९. वस्त्रस्य उपरि २०. उपविष्टवान् । २१. सम्पत्तिषु (ऐश्वर्येषु)

पुण्यकणिका । स्वीक्रियतां यदत्र उपयोगार्हम्'' इति ।

राजा तु तं प्रत्यब्रवीत् - ''भगवन् ! युष्मद्दर्शनात् उपार्जितम्[२२] एव अपरिमितं कुशलजातम्'' इति । विविधाभिश्च कथाभिः चिरं स्थित्वा गृहम् अगात् ।

अन्यस्मिन् दिवसे भैरवाचार्योऽपि राजानं द्रष्टुं ययौ । तस्मै च राजा सान्तःपुरं सपरिजनं सकोशम् आत्मानं निवेदितवान् । स च विहस्य - ''तात, क्व विभवाः । क्व च वयं वनवर्धिताः ?'' इति उक्त्वा स्थित्वा च कञ्चित्कालं जगाम ।

(गद्यं सदापि समासभूयिष्ठं सन्धिसहितं च भवति । अर्थबोधः सुलभतया भवतु इति उद्देशेन अत्र हर्षचरितसङ्ग्रहस्थः भागः स्वीकृतः, न तु मूलहर्षचरितस्थः । पठनसौकर्याय सन्धिविच्छेदः सर्वत्र कृतः अस्ति ।)

७. संस्कृतग्रन्थकारपरिचयः

व्याकरणशास्त्रज्ञाः

पाणिनिः - 'अष्टाध्यायी' इति सुविख्यातस्य व्याकरणग्रन्थस्य रचयिता पाणिनिः । अपूर्ववैज्ञानिकरीत्या रचितः ग्रन्थः एषः न केवलं व्याकरण-शास्त्रे, अपि तु समग्रे शास्त्रप्रपञ्चे एव अद्वितीयः अस्ति । शालातुरग्रामवासी पाणिनिः 'शालातुरीयः' इत्यपि उच्यते । (एषः ग्रामः इदानीं पाकिस्थाने पेशावर्जनपदे अस्ति । 'लाहुर' इति तस्य अद्यतनं नाम ।) शालातुरग्रामे पाणिनेः एका प्रतिमा आसीत् इति चीनायात्रिकः ह्युयेन्त्साङ्गः लिखति । त्रयोदश्यां तिथौ पाणिनिः स्वर्गस्थः जातः इति भाव्यते । अतः सा तिथिः वैयाकरणैः अनध्ययनत्वेन परिगण्यते । एतस्य मातुः नाम दाक्षी । पितुः नाम शलङ्कुः । एतस्य कालस्य विषये बहुधा भिन्नाभिप्रायः अस्ति । तथापि क्रि. पू. ६ शतके सः आसीत् इति भाव्यते । पाणिनेः पूर्वम् अपि बहवः व्याकरणग्रन्थाः आसन् । 'अष्टाध्यायी' यदा आगता तदा अन्ये ग्रन्थाः लुप्तप्रायाः जाताः । इदानीं ते ग्रन्थाः न उपलभ्यन्ते । समग्रः शब्दराशिः सुपरिष्कृततया संक्षेपेण च निरूपितः अस्ति अष्टाध्याय्याम् । पाणिनिः सूत्रक्रमेण व्याकरणविषयान् निरूपितवान् अस्ति । वैदिकव्याकरणम् अपि

२२. सम्पादितम् (प्राप्तम्)

अस्ति अष्टाध्याय्याम् ।

कात्यायनः - कात्यायनः वार्तिककारः । वररुचिः इति एतस्य अपरं नाम । एषः कौशाम्बीनिवासी । सोमदत्तः एतस्य पिता । एषः दाक्षिणात्यः आसीत् । भाष्यकारः पतञ्जलिः एतं 'भगवान्' इति, 'आचार्यः' इति च आदरेण निर्दिशति । एतस्य कालः क्रि.पू. ४ शतकं स्यात् इति पण्डिताः भावयन्ति ।

वार्तिकानि नाम सूत्राणां व्याख्यानरूपाणि । सूत्रेषु प्रयुक्तानां पदानां प्रयोजनचिन्तनम्, अनुक्तानां पदानां योजनं, दुरुक्तानां पदानां समीकरणं च करोति वार्तिकम् । वार्तिकानि पृथग्ग्रन्थरूपेण न उपलभ्यन्ते । महाभाष्ये (पतञ्जलिकृते) तानि सम्मिलितानि सन्ति । कात्यायनस्य वार्तिकशैली सूत्रशैलीम् एव अनुकरोति । कात्यायनेन व्याकरणस्य समृद्धिः विशेषतः वर्धिता अस्ति ।

पतञ्जलिः - 'महाभाष्यकारः' इति प्रसिद्धः अस्ति पतञ्जलिः । पाणिनिना कृतायाः अष्टाध्याय्याः विस्तृतं भाष्यम् एतेन रचितम् अस्ति इत्यतः एतस्य एतादृशं नाम । पतञ्जलिः क्रि.पू. २ शतके आसीत् इति पण्डिताः ऊहां कृतवन्तः सन्ति । एषः काश्मीरवासी आसीत् इति इतिहासकाराणाम् अभिप्रायः । ('पतञ्जलिः प्राच्यदेशीयः आसीत्' इत्यपि केचन वदन्ति ।) पाणिनिना रचितानां सूत्राणाम् अर्थनिर्णयः कृतः अस्ति पतञ्जलिना । उदाहरणप्रत्युदाहरणैः शङ्कासमाधानादिभिः च पतञ्जलिः सरलया शैल्या विषयं निरूपयति । लौकिकैः उदाहरणैः, लघुकथाभिः, विनोदवचनैः च सः विषये रोचकताम् उत्पादयति । छात्रान् बोधयतः गुरोः सम्भाषणशैली आदृता अस्ति पतञ्जलिना । शास्त्रक्षेत्रे महाभाष्यसदृशी अन्या कृतिः सुदुर्लभा एव । अतः एव भाष्यविषये एका प्रशंसोक्तिः श्रूयते - 'महाभाष्यं वा पठनीयं, महाराज्यं वा पालनीयम्' इति ।

भट्टोजिदीक्षितः - सुप्रसिद्धस्य 'सिद्धान्तकौमुदी' इत्यस्य ग्रन्थस्य रचयिता भट्टोजिदीक्षितः । एषः महाराष्ट्रदेशीयः । एतस्य पिता लक्ष्मीधरः । शब्दकौस्तुभः, प्रौढमनोरमा इत्यादयः ग्रन्थाः अपि एतेन लिखिताः । एषः क्रि.श. १६ शतकस्य उत्तरार्धे आसीत् इति विद्वद्भिः निर्णीतम् अस्ति । एतस्य सिद्धान्तकौमुदी व्याकरणलोके सुप्रसिद्धा । प्रक्रियाक्रमेण सर्वेषां पाणिनीयसूत्राणाम् अर्थः उदाहरणसहितं निरूपितः अस्ति अत्र । भाष्यादीनां

गभीराध्ययनं कृत्वा महता परिश्रमेण परिष्कृततया निरूपितः अस्ति एषः ग्रन्थः । सिद्धान्तकौमुद्यां यत् उक्तं तत् प्रमाणरूपेण अङ्गीक्रियते शास्त्रज्ञैः । 'तत्त्वबोधिनी' (ज्ञानेन्द्रसरस्वतीविरचिता) 'बालमनोरमा' (वासुदेवदीक्षित-विरचिता) इत्यादीनि सिद्धान्तकौमुद्याः व्याख्यानानि सुप्रसिद्धानि ।

नागेशभट्टः - व्याकरणशास्त्रे सुविख्यातस्य नागेशभट्टस्य अपरं नाम नागोजिभट्टः इति । शिवभट्टः एतस्य पिता । माता सतीदेवी । शृङ्गवेरपुरस्य राज्ञः रामसिंहस्य आस्थाने आसीत् एषः । क्रि.श. १६६०-१७३० एतस्य जीवितकालः इति पण्डिताः मन्यन्ते । लघुशब्देन्दुशेखरः, परिभाषेन्दु-शेखरः, लघुमञ्जूषा, परमलघुमञ्जूषा इत्यादयः ग्रन्थाः एतस्य सुप्रसिद्धाः । व्याकरणशास्त्रस्य सिद्धान्तभागः प्रक्रियाभागः च एतेन सुपरिष्कृततया निरूपितः अस्ति । एषः न केवलं व्याकरणशास्त्रे, अपि तु अलङ्कार-योग-वेदान्तादिशास्त्रेषु अपि निष्णातः आसीत् । एतेन ४५ तः अधिकाः ग्रन्थाः लिखिताः इति श्रूयते । व्याकरणशास्त्रे नागेशभट्टस्य अभिप्रायस्य विशेषमहत्त्वम् अस्ति ।

कोविदः - द्वितीयः पाठः

प्रश्नाः

I. *एतेषाम् उत्तराणि लिखत ।*

१. तेजस्वी पुरुषः कां न सहते ?

२. प्राणत्यागेऽपि संस्थिते किं न कर्तव्यम् ?

३. 'धुरि' इत्यस्य पदविवरणं लिखत ।

४. मन्मथस्य धनुः कैः निर्मितम् ?

५. शिवः क्रोधेन किं कृतवान् ?

६. गद्यकाव्ये प्रधानतया कः गुणः भवति ?

II. *एतेषां तद्धितान्तरूपाणि लिखत ।*

१. करुणायाः भावः

२. स्थूलतायाः भावः

३. विरागस्य भावः

४. विधुरस्य भावः

५. निर्भरस्य भावः

III. *एतेषां समस्तपदं लिखित्वा समासनाम निर्दिशत ।*

१. स्वर्गात् पतितः

२. कृष्णं श्रितः

३. रत्नानाम् आकरः

४. दाने शूरः

५. कुण्डलाय हिरण्यम्

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 257) After completing the exercises check your answers.)

कोविदः - तृतीयः पाठः

।। महाजनस्य सम्पर्कः कस्य नोन्नतिकारकः ।।

The company of great people brings prosperity to all.

१. समासः

कर्मधारयः

Karmadharaya is a sub-division of Tatpurusha Samasa. Threrfore here also the meaning of the second word is important just as in Tatpurusha. The compound is mainly between nouns and adjectives.

There are nine subdivisions in Karmadharaya. Here we shall deal with six important types with examples.

१. **विशेषणपूर्वपदः** (Where in the preceding word is a adjective)

नीलोत्पलम् - नीलम् उत्पलम् = blue lotus

नीलम् is an adjective to 'उत्पलम्'

२. **उपमानपूर्वपदः** (Where in the preceding word is a standard of comparison)

हिमशीतलम् - हिमम् इव शीतलम् = cool like dew

Here, a cool object is compared with dew, and the word 'हिम' (dew) the preceding word is a word of comparison.

३. **उपमानोत्तरपदः**

(Where in the succeeding (second) word is a standard of comparison.)

नरसिंहः - नरः सिंह इव man like lion

The word 'सिंह' denoting the standard of comparison is the suceeding word here.

४. **सम्भावनापूर्वपदः** (Where in the first word is a member of a certain class and the second word denotes that class. Here the latter word is जातिवाचक and the former a व्यक्तिवाचक ।)

आम्रवृक्षः = आम्र इति वृक्षः

५. **अवधारणापूर्वपदः**(Where in emphasis is laid on the first word)

विद्याधनम् - विद्या एव धनम् = Knowledge itself is wealth.

The use of the phrase 'knowledge itself' denotes the sense of certainty. Emphasis or अवधारणा is on the first word.

६. **मध्यमपदलोपी**

(Where in the middle term (word) has elided)

छायातरुः - छायाप्रधानः तरुः = shade - prominent tree.

Here, the middle word 'प्रधान' meaning 'prominent' has elided in the compound and therefore it is a मध्यमपदलोपी Karmadharaya compound.

To understand better study the Karmadharaya samasa words in the sentences below.

१. जैनमुनिः **श्वेताम्बरं** धरति ।
A Jain monk wears white robes.

२. आकाशे **नीलमेघाः** दृश्यन्ते ।
Dark clouds are seen in the sky.

३. कृष्णः **घनश्यामः** आसीत् ।
Krishna was dark (in complexion) like the cloud.

४. **हिमशीतलं** पेयं आरोग्याय न भवति ।
Ice-cold drink affects physical health.

५. जनकः **राजर्षिः** आसीत् ।
Janaka was a Royal - saint.

६. प्रमद्वरा **करकिसलयेन** पुष्पाणि अवचिनोति ।
Pramadvara is plucking flowers with her hand that is as delicate as tender shoots.

७. मम गृहस्य पुरतः **नारिकेलवृक्षः** अस्ति ।
In front of my house there is a coconut tree.

८. **गङ्गानदी** उत्तरभारते प्रवहति ।
River Ganga flows in northern India.

९. ऋषयः **तपोधनस्य** व्ययं न कर्तुम् इच्छन्ति ।
Sages do not want to spend their wealth in the form of penance.

१०. एकलव्यः द्रोणं **गुरुदेवं** मत्वा धनुर्विद्याभ्यासम् अकरोत् ।
Ekalavya worshipped Dronacharya as God in the form of Guru and practised archery.

११. अस्मिन् प्रकोष्ठे छात्राणां **द्वाविंशतिः** अस्ति ।
In this room there are twenty two students.

१२. बेङ्गलूरुनगरे सर्वत्र मार्गस्य उभयपार्श्वयोः **छायातरवः** सन्ति ।
Everywhere in Bangalore city there are shade - trees on either side of the road.

All of the above are types of Karmadharaya discussed earlier. They are dissolved as follows.

१. श्वेतम् अम्बरम् - श्वेताम्बरम्
२. नीलाः मेघाः - नीलमेघाः
३. घनः इव श्यामः - घनश्यामः
४. हिमम् इव शीतलम् - हिमशीतलम्
५. राजा ऋषिः इव - राजर्षिः
६. करः किसलयः इव, तेन - करकिसलयेन
७. नारिकेलः इति वृक्षः - नारिकेलवृक्षः
८. गङ्गा इति नदी - गङ्गानदी

९. तपः एव धनम् - तपोधनम्, तस्य - तपोधनस्य

१०. गुरुः एव देवः - गुरुदेवः, तम् - गुरुदेवम्

११. द्व्यधिका विंशतिः - द्वाविंशतिः

१२. छायाप्रधानाः तरवः - छायातरवः

विशेषः

There are two ways in which the विग्रहवाक्य of विशेषण-पूर्वपदकर्मधारय is given -

1. नीलम् उत्पलम् and
2. नीलं च तत् उत्पलं च ।

While following the second, you must keep in mind the gender and number of the विशेष्य and विशेषण that are compounded.

Study the following examples carefully.

एकवचने -

उन्नतबालकः - उन्नतश्चासौ बालकश्च (पुं) - A tall boy

उन्नतबालिका - उन्नता चासौ बालिका च (स्त्री) - A tall girl

उन्नतभवनम् - उन्नतं च तत् भवनं च (नपुं) - A tall building

बहुवचने -

उन्नतबालकाः - उन्नताश्च ते बालकाः च (पुं) - Tall boys.

उन्नतबालिकाः - उन्नताश्च ताः बालिकाश्च (स्त्री) - Tall girls.

उन्नतभवनानि - उन्नतानि च तानि भवनानि च (नपुं) - Tall buildings

Following the same method try and dissolve the other examples of विशेषणपूर्वपदकर्मधारय ।

२. विशेषविषयाः

तद्धितान्ताः - ३

१. तरप्-तमप्-प्रत्ययौ

These two affixes are added to pratipadikas to express comparative and superlative degrees respectively.

Eg. - रामकृष्णयोः कृष्णः चतुरतरः ।

(Krishna is cleverer than Rama)

बालकेषु कृष्णः चतुरतमः ।
(Krishna is the cleverest among all the boys)

Similarly -

स्त्रीषु शकुन्तला सुन्दरतमा ।
Shakuntala is the most beautiful among women.

आम्रनारङ्गयोः आम्रं मधुरतरम् ।
Between Orange and Mango, Mango is sweeter.

२. Now let us know some commonly used taddhitantas.

पितुः भ्राता = पितृव्यः = Father's brother
मातुः भ्राता = मातुलः = Mother's brother
पितुः पिता = पितामहः = Father's father
मातुः पिता = मातामहः = Mother's father

Similarly -

वैयाकरणः = one who studies or knows व्याकरणम्
नैयायिकः = one who studies or knows न्यायशास्त्रम्
पौराणिकः = one who studies or knows पुराणम्
राष्ट्रियः = related to Nation
ग्रामीणः = living in village
दाक्षिणात्यः = born in South / southerner
पाश्चात्त्यः = born in West / westerner
पौर्वात्यः = born in east / Easterner
कुत्रत्यः = Belonging to which place ?
तत्रत्यः = from there (belonging to that place)
ह्यस्तनः = Yesterday's
अद्यतनः = Today's
श्वस्तनः = Tomorrow's
दन्ते भवः = दन्त्यः = (a syllable) produced with the help of the teeth
कण्ठे भवः = कण्ठ्यः = (a syllable) produced in the throat

मुखम् इव = मुख्यः = one who is prominent (like the face)
समाजं रक्षति = सामाजिकः = a member of society
सभायां साधुः = सभ्यः = civilized (fit for assembly)
अश्वेन तुल्यः = अश्ववत् = similar to horse

३. Now let us know about some Taddhitantha Avyayas.
था, त्र, तः, दा, दानीम् - These affixes are added to some pronouns to express different meanings.
Eg. - For the pronouns यत्, तत्, सर्व, किम्
यथा, तथा, सर्वथा, कथम् = (In the sense of mode)
यत्र, तत्र, सर्वत्र, कुत्र = (In the sense of locative case)
यतः, ततः, सर्वतः, कुतः = (In the sense of ablative case)
यदा, तदा, सर्वदा, कदा, इदानीम्, तदानीम् = (indicating time)
Here are a few sentences where in तद्धितान्त forms discussed above, are used.

१. बालकेषु सुहासः **स्थूलतमः** ।
Suhas is the fattest among boys.

२. सुमति-सरस्वत्योः सुमतिः **सुन्दरतरा** ।
Between Sumati and Saraswathi, Sumati is more beautiful.

३. निर्देशकेषु सत्यजित् **प्रसिद्धतमः** ।
Satyajit is the most famous among directors.

४. तुलसी-बिल्वपत्रयोः तुलसीपत्रं **लघुतरम्** अस्ति ।
Between Tulasi and Bilva leaves, Tulasi leaf is smaller.

५. श्रीनिधि-श्रीनन्दयोः श्रीनिधिः **कुब्जतरः** अस्ति ।
Between Srinidhi and Srinanda, Srinidhi is shorter.

६. अरुन्धत्याः **मातामहः** श्वः आगमिष्यति ।
Arundhati's maternal grandfather will come tomorrow.

७. भोः मित्र ! **श्वस्तन**कार्यम् अद्य एव चिन्तय ।
O' friend ! Plan tommorow's work today itself.

८. सः अतिथिः **कुत्रत्यः** ?

To which place does that guest belong ?

९. यः **तत्र** स्थितः सः प्रसिद्धगायकः अस्ति ।
The one standing there is a famous singer.

१०. **तदानीम्** उक्तः विषयः पुनरपि **इदानीम्** उच्यते ।
What was told then is being told again now.

अभ्यासः

I. *अधः दत्तानि समस्तपदानि, तेषां विग्रहवाक्यानि च पठित्वा यथोदाहरणं समासनाम निर्दिशत ।*

उदा - स्थूलाक्षराणि - स्थूलानि अक्षराणि - विशेषणपूर्वपदकर्मधारयः

समस्तपदम् *विग्रहवाक्यम्* *समासनाम*

१. कृष्णफलकम् - कृष्णं फलकम् - ....
२. दीर्घरज्जुः - दीर्घा रज्जुः - ....
३. सन्मित्रम् - सत् मित्रम् - ....
४. वीरपुरुषाः - वीराः पुरुषाः - ....
५. मेघश्यामः - मेघः इव श्यामः - ....
६. पुरुषव्याघ्रः - पुरुषः व्याघ्रः इव - ....
७. हिमालयपर्वतः - हिमालयः इति पर्वतः - ....
८. देवब्राह्मणः - देवपूजकः ब्राह्मणः - ....
९. यशोधनम् - यशः एव धनम् - ....
१०. मुखकमलम् - मुखम् एव कमलम् - ....
११. शाकपार्थिवः - शाकप्रियः पार्थिवः - ....
१२. नरसिंहः - नरः सिंहः इव - ....
१३. महावैयाकरणः - महान् वैयाकरणः - ....
१४. विशालप्रकोष्ठः - विशालः प्रकोष्ठः - ....
१५. दशरथराजः - दशरथः इति राजा - ....

II. *समासं कृत्वा समस्तपदं समासनाम च लिखत ।*

यथा - पूर्वः अर्धः - <u>पूर्वार्धः</u> - <u>विशेषणपूर्वपदकर्मधारयः</u>

१. कैलासः इति अद्रिः - .... - ....
२. अयोध्या इति नगरी - .... - ....
३. गुरुः एव देवः -........... - ....
४. वज्रम् इव कठोरम् - .... - ....
५. प्रथमः पुरुषः - .... - ....
६. महान् देवः - .... - ....
७. कुसुमम् इव कोमलम् - .... - ....
८. मुखं पद्मम् इव -........... - ....
९. पुराणः पुरुषः - .... - ....
१०. करः कमलम् इव - .... - ....

III. *उदाहरणे दर्शितेन क्रमेण अधोनिर्दिष्टानां तरप्प्रत्ययान्तं तमप्प्रत्ययान्तं च रूपं लिखत ।*

यथा - १. कोमलः (पुं) - <u>कोमलतरः</u> <u>कोमलतमः</u>
२. किम् (स्त्री) - <u>कतरा</u> (which of the two) <u>कतमा</u> (who among many ?)
३. विशालम् (नपुं) - <u>विशालतरम्</u> <u>विशालतमम्</u>

	तरबन्तम्	*तमबन्तम्*
१. दृढ (नपुं)	....	....
२. सुलभ (पुं)	....	....
३. वत्सल (स्त्री)	....	....
४. सुकुमार (नपुं)	....	....
५. स्थूल (स्त्री)	....	....
६. कृश (पुं)	....	....
७. शोभन (स्त्री)	....	....
८. कठिन (नपुं)	....	....

९. विशाल (स्त्री) ....
१०. कठोर (पुं) ....
११. रूक्ष (पु) (harsh) ....
१२. दुर्बल (स्त्री) ....
१३. प्रबल (न) ....
१४. तीक्ष्ण (स्त्री) ....
१५. त्वरित (पुं) ....

IV. *उदाहरणानुगुणम् आवरणे दत्तेषु उचितं तरबन्तं, तमबन्तं वा पदं चित्वा रिक्तस्थानं पूरयत ।*

उदा - अजगजयोः गजः स्थूलतरः (स्थूलतरः, स्थूलतमः)

१. नारीषु शकुन्तला .... (सुन्दरतमा, सुन्दरतरा)
२. पतिव्रतासु अरुन्धती ....(श्रेष्ठतरा, श्रेष्ठतमा)
३. नदीषु गङ्गा .... (पवित्रतमा, पवित्रतरा)
४. सुषमा-सुमत्योः सुषमा ......(कृशतरा, कृशतमा)
५. पाण्डवेषु युधिष्ठिरः ...... (गुणवत्तमः, गुणवत्तरः)
६. अरविन्दगान्धिमार्गयोः गान्धिमार्गः ......(दीर्घतमः, दीर्घतरः)
७. काकमयूरयोः काकस्य स्वरः ...... (कर्कशतमः,कर्कशतरः)
८. ग्रहेषु बुधः भूमेः ......(समीपतरः, समीपतमः)
९. पर्वतेषु हिमालयः .....(उन्नततमः, उन्नततरः)
१०. फलेषु आम्रं ......(मधुरतमम्, मधुरतरम्)
११. तूलाश्मनोः तूलः ..... (लघुतरः, लघुतमः) (तूलः = cotton)
१२. उमेशदिनेशसन्दीपेषु दिनेशः .... (पटुतमः, पटुतरः)
१३. सिंहव्याघ्रचित्रकेषु व्याघ्रः ...... (क्रूरतरः, क्रूरतमः)
१४. युधिष्ठिरभीमार्जुनेषु भीमः ...... (बलवत्तमः, बलवत्तरः)
१५. आफ्रिकामेरिकाराष्ट्रयोः अमेरिकाराष्ट्रं भारतदेशात् ...... (दूरतरम्, दूरतमम्)
१६. खगेषु पिकस्य स्वरः ...... (मधुरतरः, मधुरतमः)

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 258) After completing the exercises check your answers.)

३. सुभाषितानि

५. सुजनो न याति विकृतिं परहितनिरतो विनाशकालेऽपि ।
छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य ॥

पदविभागः

सुजनः, न, याति, विकृतिम्, परहितनिरतः, विनाशकाले, अपि, छेदे, अपि, चन्दनतरुः, सुरभयति, मुखम्, कुठारस्य ।

अन्वयः

परहितनिरतः सुजनः विनाशकाले अपि विकृतिं न याति । चन्दनतरुः छेदे अपि कुठारस्य मुखं सुरभयति ।

अन्वयार्थः

परहितनिरतः = परोपकारे मग्नः, सुजनः = सत्पुरुषः, विनाशकाले अपि = नाशसमये अपि, विकृतिं = विकारं, न याति = न प्राप्नोति, चन्दनतरुः = चन्दनवृक्षः, छेदे अपि = छेदने कृते अपि, कुठारस्य = परशोः, मुखम् = अग्रभागं, सुरभयति = सुगन्धयुक्तं करोति ।

तात्पर्यम्

लोके तावत् मनुष्यस्य एषः स्वभावः यत् यदा सः स्वयं कष्टम् अनुभवति, आपद्ग्रस्तो वा भवति, तदा सः कुपितः भवेत्, दुःखितो वा भवेत् । किन्तु सत्पुरुषाणां स्वभावः न तादृशः । ते सर्वदा परोपकारे एव निरताः सन्तः स्वस्य नाशसमये अपि कमपि विकारं न प्राप्नुवन्ति । तत्कथमिति कविः एकेन उदाहरणेन दर्शयति ।

यथा चन्दनवृक्षः छेदनसमये अपि सहजगुणं सुगन्धं न जहाति, अपि च छेदनार्थम् उपयुक्तं कुठारमपि सुगन्धयुक्तं करोति, तथैव सज्जनाः नाशसमये अपि परोपकारबुद्धिं न परित्यजन्ति ।

६. साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानः तद्भागधेयं परमं पशूनाम् ॥

पदविभागः

साहित्यसङ्गीतकलाविहीनः, साक्षात्, पशुः, पुच्छविषाणहीनः, तृणम्, न, खादन्, अपि, जीवमानः, तत्, भागधेयम्, परमम्, पशूनाम् ।

अन्वयः

साहित्यसङ्गीतकलाविहीनः (नरः) पुच्छविषाणहीनः साक्षात् पशुः (एव) । तृणं न खादन् अपि जीवमानः (इति यत्) तत् पशूनां परमं भागधेयम् ।

अन्वयार्थः

साहित्य-सङ्गीत-कला-विहीनः = काव्य-सङ्गीत-शिल्पज्ञानेन रहितः, (नरः = मनुष्यः) पुच्छविषाणहीनः = लाङ्गूलशृङ्गाभ्यां रहितः, साक्षात् पशुः = साक्षात् पशुः एव । तृणं न खादन् अपि = तृणं न भक्षयन् अपि, जीवमानः = सः जीवति (इति यत्) तत्, पशूनां, परमं = महत्, भागधेयम् = भाग्यम् ।

तात्पर्यम्

गद्यात्मकं पद्यात्मकं च काव्यं, विचारप्रधानं शास्त्रं च साहित्यशब्देन विवक्षितम् । साहित्येन ज्ञानम् अभिवर्धते, सङ्गीतेन, शिल्पेन (कलया) च आत्मसन्तोषः भवति । एषु त्रिषु एकस्य वा ज्ञानं मानवस्य आवश्यकम् । एकस्मिन् अपि विषये यस्य उत्साहः न भवति सः पशुः एव । पशोः पुच्छं शृङ्गे च भवन्ति, एतस्य मनुष्यस्य तु तानि न सन्ति इत्येव भेदः । अपरोऽपि भेदः अस्ति यत् एषः तृणं न खादति, पशवः तु खादन्ति । किन्तु एतत् पशूनां परमं भाग्यमेव । अन्यथा पशूनां तृणम् एव दुर्लभं स्यात् !

४. काव्यकथा

यदा ईश्वरः मन्मथं दग्धवान् तदा पार्वती खिन्ना ततः प्रतिनिवृत्तवती । सा स्वकीयं बाह्यसौन्दर्यं निन्दितवती । ततः तपश्शक्त्या ईश्वरः आराधनीयः इति सङ्कल्पितवती । तपः कर्तुम् अरण्यं गन्तुं निश्चितवती । इमां दृष्ट्वा माता मेनादेवी उक्तवती - ''बाले ! कठोरं तपश्चरणं क्व? तव इदं कोमलं शरीरं क्व ? तपः कर्तुं बहु दुष्करम् । मास्तु प्रयत्नः'' इति । किन्तु स्थिरनिश्चयं मनः

निम्नाभिमुखं[1] जलं च प्रतिनिवर्तयितुं कः वा शक्तः ? पार्वती जनकस्य अनुमतिं लब्ध्वा तपः आचरितुं गौरीशिखरं गतवती । तत्र राजकुलोचितानि भूषणानि परित्यज्य वल्कलं धृतवती । तपोनिरतां तां द्रष्टुम् अनेके ऋषयः समागतवन्तः । धर्मवृद्धानां विषये वयः न परिगण्यते किल[2] ? पार्वती ग्रीष्मकाले पञ्चानाम् अग्नीनां मध्ये तपः कृतवती । वृष्टिकाले शिलातले स्थित्वा वृष्टिविद्युतोः[3] मध्ये एव तपः आचरितवती । शीतकाले अहोरात्रं जलमध्ये एव स्थित्वा निराहारा तपः अनुष्ठितवती । प्रथमं फलानि खादति स्म । ततः तानि परित्यज्य पर्णानाम्[4] आहारं स्वीकृतवती । पश्चात् पर्णानाम् आहारम् अपि परित्यक्तवती । अतः एव तस्याः 'अपर्णा' इति नाम प्रसिद्धम् ।

एतादृशेन कठोरेण तपश्चरणेन परमेश्वरः सन्तुष्टः अभवत् । किन्तु सः पार्वतीं परीक्षितुम् इष्टवान् । अतः सः ब्रह्मचारिवेषं धृत्वा पार्वत्याः आश्रमम् आगतः । पार्वती तम् आदरेण सत्कृतवती । ततः हरः तां तपसः कारणम् अपृच्छत् - ''पार्वति ! तव शीलस्वभावादयः तपस्विनाम् अपि आदर्शभूताः[5] एव । किन्तु अहं तव तपसः कारणं ज्ञातुम् इच्छामि । यतः तव जननं ब्रह्मणः कुले । सौन्दर्यं लोकातिशयम् । ऐश्वर्यम् अपारम् । नवयौवनम् अपि अस्ति । कुतः वा इदं तपश्चरणम् ? सौन्दर्यम् ऐश्वर्यम् सर्वम् अस्ति । इतोऽपि किम् अधिकम् अपेक्षितम् ? यदि तपसा कश्चित् वरं प्राप्तुम् इच्छसि तर्हि तव प्रयत्नः व्यर्थः एव । वरपक्षीयाः[6] एव भवतीम् अन्विष्येयुः[7] । रत्नं कमपि न अन्विष्यति । किन्तु जनाः रत्नम् अन्विष्यन्ति खलु'' इति ।

ब्रह्मचारिणः वचनानि श्रुत्वा पार्वती तूष्णीं[8] स्थिता । पार्वत्याः सखी - ''परमेश्वरं प्राप्तुम् एव इदं तपः'' इति उक्तवती ।

पुनः अपि शिवः पार्वतीं परीक्षितुम् एवम् उक्तवान् - ''हे गौरि ! अहं तं परमेश्वरं जानामि । सः सर्वदा अमङ्गलकार्येषु आसक्तः अस्ति । सर्वथा सः तव अनुरूपो न । श्मशानभूमिः एव तस्य वासस्थानम् । चिताभस्म एव तस्य लेपनद्रव्यम् । रक्तमयं गजचर्म एव तस्य दुकूलम्[9]। सर्पाः तस्य भूषणानि ।

---

1. Flowing towards lower region 2. Age does not count in case of those who are advanced in piety or virtue, 3. Amidst rain and lightning, 4. of leaves, 5. Model 6. Belonging to bride groom's party, 7. would come in search of, 8. (kept) silent, 9. Silk-garment

वृद्धवृषभः तस्य वाहनम् । एतादृशवरस्य अपेक्षा कुतः ? सः विरूपाक्षः । सौन्दर्यं नास्ति । तस्य मातापितरौ कौ ? तस्य कुलम् अज्ञातम् । सः स्वयं दिगम्बरः । तस्य ऐश्वर्यं ज्ञातम् एव अस्ति । एवं वरेषु ये अंशाः अपेक्षिताः तेषु एकः अपि अंशः तस्मिन् नास्ति । किमर्थं भवती हरम् इच्छति ?'' इति ।

एवं हरस्य निन्दां श्रुत्वा पार्वती कुपिता । सा ब्रह्मचारिणम् उद्दिश्य - ''भोः ! त्वं हरस्य स्वरूपं यथार्थतया[10] न जानासि । सः हरः श्मशाने विद्यमानः अपि त्रिलोकनाथः । सः एव मम प्रियः । एतस्मिन् विषये त्वया सह अधिकं वक्तुं न इच्छामि । अन्यत्र गच्छामि । महापुरुषाणां निन्दा न श्रोतव्या'' इति उक्त्वा अन्यत्र प्रस्थिता ।

पार्वत्याः निष्कल्मषभक्त्या प्रीत्या च शिवः सन्तुष्टः अभवत् । सः स्वस्वरूपं धृत्वा पार्वत्याः करं गृहीतवान् । ''हे पार्वति ! तव तपसा अहं क्रीतः । तव दासः अस्मि'' इति उक्तवान् च ।

अतीव सन्तुष्टा पार्वती तपःक्लेशं विस्मृतवती । सा - ''विवाहार्थं प्रस्तावः मत्पितुः हिमालयस्य समीपे कर्तव्यः'' इति सखीमुखेन तं सूचित-वती ।

प्रश्नाः

१. मन्मथस्य दाहानन्तरं पार्वती किमिति सङ्कल्पितवती ?
२. तपसे सा कुत्र गतवती ? तदा तस्याः वेषभूषणानि कथमासन् ?
३. पार्वत्याः अपर्णा इति नाम कथम् अभवत् ?
४. परमेश्वरः केन रूपेण पार्वतीं परीक्षितुम् आगतवान् ?

५. श्लोकेषु अन्वयक्रमः

४. मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानम् ।
अवाकिरन् बाललताः प्रसूनैः आचारलाजैरिव पौरकन्याः ॥

पदविभागः

मरुत्प्रयुक्ताः[1], च[2], मरुत्सखाभम्[3], तम्[4], अर्च्यम्[5], आरात्[6],

10. Truly or properly.

अभिवर्तमानम्[7], अवाकिरन्[8], बाललताः[9], प्रसूनैः[10], आचार-लाजैः[11], इव[12], पौरकन्याः[13] ॥

अन्वयः

मरुत्प्रयुक्ताः बाललताः आरात् अभिवर्तमानं मरुत्सखाभम् अर्च्यं तं पौरकन्याः आचारलाजैः इव, प्रसूनैः अवाकिरन् ।

प्रतिपदार्थः

बाललताः = The young creepers, मरुत्प्रयुक्ताः = wafted by the wind, अवाकिरन् = showered, तं = him (Dilipa), अर्च्यम् = who was worthy of worship, अभिवर्तमानम् = as he remained, आरात् = close by, मरुत्सखाभम् = with rediance like fire, प्रसूनैः = with flowers, पौरकन्याः = as (would do) the city maidens, आचारलाजैः = with the customary fried grains.

तात्पर्यम्

यदा दिलीपः अरण्ये गच्छति स्म, तदा मार्गपार्श्वे लताः तस्य उपरि पुष्पाणि अवकीर्णवत्यः । तत्र वायुः कारणम् । यदा दिलीपः नगरात् बहिः गच्छति तदा पुरस्य बालिकाः अपि एवमेव साम्प्रदायिकलाजाः अवकिरन्ति स्म । अयं सम्प्रदायः । वनेऽपि दिलीपस्य राजोपचारः कृतः लताभिः ।

अन्वयरचना

अवाकिरन् - निक्षिप्तवत्यः - *क्रियापदम्*
काः अवाकिरन् ? - बाललताः - *कर्तृपदम्*
कीदृश्यः बाललताः ? - मरुत्प्रयुक्ताः
कैः अवाकिरन् ? - प्रसूनैः
कम् अवाकिरन् ? - तम्
कीदृशं तम् ? - अभिवर्तमानम्
कुत्र अभिवर्तमानम् ? - आरात्
पुनः कीदृशम् ? - मरुत्सखाभम्
पुनः कीदृशम् ? - अर्च्यम्
कथमिव अवाकिरन् ? - पौरकन्याः आचारलाजैः इव

विशेषः

अ) पदविवरणम्

1. आकारान्तः 'मरुत्प्रयुक्ता'शब्दः स्त्री. प्र.वि. ब.व.
2. अव्ययम् 'च'
3. अकारान्तः 'मरुत्सखाभ'शब्दः पु. द्वि.वि. ए.व.
4. दकारान्तः 'तद्'शब्दः पु. द्वि.वि. ए.व.
5. अकारान्तः 'अर्च्य'शब्दः पु. द्वि.वि. ए.व.
6. अव्ययम् 'आरात्'
7. अकारान्तः 'अभिवर्तमान'शब्दः पु. द्वि.वि. ए.व.
8. 'अव'-उपसर्गपूर्वकः 'कृ'धातुः प.प. भूतकालः(लङ्), प्र.पु. ब.व.
9. आकारान्तः 'बाललता'शब्दः स्त्री. प्र.वि. ब.व.
10. अकारान्तः 'प्रसून'शब्दः न. तृ.वि. ब.व.
11. अकारान्तः 'आचारलाज'शब्दः पु. तृ.वि. नित्यं ब.व.
12. अव्ययम् 'इव'
13. आकारान्तः 'पौरकन्या'शब्दः स्त्री. प्र.वि. ब.व.

आ) समासः

१. मरुता प्रयुक्ताः - तृतीयातत्पुरुषः

२. मरुतः सखा - मरुत्सखः - षष्ठीतत्पुरुषः
मरुत्सखस्य आभा (कान्तिः) इव आभा यस्य सः, तम् - बहुव्रीहिः

३. बालाश्च ताः लताश्च - कर्मधारयः

४. आचारार्थाः लाजाः - तैः - तत्पुरुषः

५. पौराः च ताः कन्याः च - कर्मधारयः

५. इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ॥

पदविभागः

इत्थम्[1], व्रतम्[2], धारयतः[3], प्रजार्थम्[4], समम्[5], महिष्या[6], **अन्वयः**
इत्थं प्रजार्थं महिष्या समं व्रतं धारयतः महनीयकीर्तेः दीनोद्धरणोचितस्य तस्य त्रिगुणानि सप्त दिनानि व्यतीयुः ।

प्रतिपदार्थः

इत्थम् = In this manner (Thus), प्रजार्थम् = for progeny, व्रतम् धारयतः तस्य= as he observed a vow, महिष्या समम् = along with his queen, महनीयकीर्तेः = (he) who was of great fame. दीनोद्धरणोचितस्य = who was intent on uplifting the distressed, त्रिगुणानि = three times, सप्त = seven, दिनानि = days (21 days), व्यतीयुः = passed.

तात्पर्यम्

एवं चक्रवर्ती दिलीपः पत्न्या सुदक्षिणया सह व्रतं गृहीतवान् । सन्तानप्राप्तिः एव तस्य उद्देशः आसीत् । सः दीनानाम् उद्धारे सदा दत्तचित्तः भवति स्म । तस्य कीर्तिः सर्वत्र प्रसृता आसीत् । प्रतिदिनं सः नन्दिन्याः सेवां करोति स्म । एवम् एकविंशतिः दिनानि गतानि ।

अन्वयरचना

व्यतीयुः - गतानि - *क्रियापदम्*
कानि व्यतीयुः ? - दिनानि - *कर्तृपदम्*
कति दिनानि ? - सप्त
कीदृशानि सप्त ? - त्रिगुणानि
कस्य दिनानि ? - तस्य
कीदृशस्य तस्य ? - दीनोद्धरणोचितस्य
पुनः कीदृशस्य ? - महनीयकीर्तेः
पुनः कीदृशस्य ? - धारयतः
किं धारयतः ? - व्रतम्
कया समं धारयतः ? - महिष्या समम्
किमर्थं धारयतः ? - प्रजार्थम्
कथं धारयतः ? - इत्थम्

विशेषः

अ) पदविवरणम्

1. अव्ययम् 'इत्थम्'
2. अकारान्तः 'व्रत'शब्दः न. द्वि.वि. ए.व.
3. तकारान्तः 'धारयत्'शब्दः पु. ष.वि. ए.व.
4. अकारान्तः 'प्रजार्थ'शब्दः न. द्वि.वि. ए.व.
5. अव्ययम् 'समम्'
6. ईकारान्तः 'महिषी'शब्दः स्त्री. तृ.वि. ए.व.
7. इकारान्तः 'महनीयकीर्ति'शब्दः पु. ष.वि. ए.व.
8. नकारान्तः 'सप्तन्'शब्दः त्रिलिङ्गकः न. प्र.वि. नित्यं ब.व
9. 'वि', 'अति' उपसर्गद्वयपूर्वकः 'इण्'धातुः, प.प.
   भूतकालः (लिट्), प्र.पु. ब.व.
10. अकारान्त 'त्रिगुण'शब्दः न. प्र.वि. ब.व.
11. दकारान्त 'तद्'शब्दः पु. ष.वि. ए.व.
12. अकारान्तः 'दिन'शब्दः न. प्र.वि. ब.व.
13. अकारान्तः 'दीनोद्धरणोचित'शब्दः पु. ष.वि. ए.व.

आ) समासः

१. महनीया कीर्तिः यस्य सः - तस्य - बहुव्रीहिः

२. दीनानाम् उद्धरणम् - दीनोद्धरणम् - षष्ठीतत्पुरुषः
   दीनोद्धरणे उचितः, तस्य - सप्तमीतत्पुरुषः

६. संस्कृतसाहित्यपरिचयः

इतिहासः

पुरा घटितानां घटनानां यथाक्रमम् उल्लेखः इतिहासः इति कथ्यते । ताः घटनाः व्यक्तिसम्बद्धाः समाजसम्बद्धाः भौतिकाः वा भवेयुः । तासां वर्णनम् एव इतिहासः । 'इति ह आस' (पूर्वम् एवम् आसीत् किल) इति तस्य शब्दस्य अर्थं वर्णयन्ति । पूर्वस्मिन् काले जनजीवनं कथम् आसीत् ? के के मुख्यनायकाः आसन् ? जनानाम् आर्थिक-शासकीय-धार्मिक-नैतिक-व्यवस्थासु पुरोगमनं कथम् अभवत् ? एतेषां सर्वेषां विषयाणां विवरणम्

इतिहासे भवति । यस्मिन् ग्रन्थे एतादृशवर्णनानि भवन्ति ते ग्रन्थाः इतिहासग्रन्थाः इति आधुनिकानां व्यवहारः । एतादृशग्रन्थेषु सर्वासामपि घटनानां स्थाननिर्देशः कालनिर्देशश्च यथासम्भवं क्रियते । एतादृशग्रन्थस्य लेखनं द्विधा भवति । लेखकः स्वकाले वृत्तानां घटनानां याथार्थ्येन वर्णनं करोति । एषः प्रथमः । यत्र तादृशानां घटनानां वर्णनं न उपलभ्यते तत्र तासाम् ऊहा क्रियते । एषः द्वितीयः । तत्कालीनकाव्यानि, धनमुद्राः, दानपत्राणि, शिलाशासनानि, मठदेवालयादिषु स्थितानि ताम्रपत्राणि इत्यादयः अस्माकम् ऊहायाः आधाराः भवन्ति । स्तुतिनिन्दारहितः वस्तु-स्थितिवर्णनात्मकः भवति शुद्धः इतिहासः ।

संस्कृतसाहित्ये एतादृशः शुद्धः इतिहासः विरलः एव । कवयः अपि स्वकीयकाव्येषु स्वस्य नाम केवलम् उक्तवन्तः । किन्तु कालदेशादिविषये ते मौनिनः एव । अतः एव कालिदासादीनां देशकालादिविषये वयं स्पष्टतया किमपि न जानीमः । राजमहाराजादीनां कथाः यद्यपि लभ्यन्ते, तथापि ताः अतिशयोक्तिपूर्णाः उत्प्रेक्षिताः वा सन्ति । तत्र तत्र चरित्रं व्यत्यस्तम् अपि । अस्य इदं कारणं भवितुम् अर्हति -

इतिहासविषये भारतीयानां दृष्टिरेव अन्या आसीत् । तेषां दृष्टौ तिथि-मासवर्षादीनां महत्त्वं नासीत् । यया भूतकालीनघटनया वर्तमानकालीनानां स्थितिः रूपिता भवति अथवा उत्तमा भवति सा एव घटना तेषां मुख्या आसीत् । अतः एव यया कयापि विधया तां घटनाम् उत्प्रेक्ष्य ते वर्णयन्ति स्म । वास्तविकस्वरूपापेक्षया परिणामे एव तेषां महती आसक्तिः आसीत् । 'तत्र किम् अभवत् ?' इत्यपेक्षया 'सा घटना अस्माकं कम् उपकारं कुर्यात् ?' इत्यत्र एव ते मनः दत्तवन्तः । अतः एव तैः रचिताः इतिहास-सम्बद्धाः ग्रन्थाः अपि तादृशाः एव सन्ति ।

अधुना कांश्चन संस्कृत-इतिहासग्रन्थान् अवलोकयाम -

प्रथमम् अस्माकं द्वे महाकाव्ये रामायणमहाभारते इतिहासग्रन्थेषु उल्लेखम् अर्हतः । तयोः रामायणम् काव्यमिति प्रसिद्धम् । महाभारतम् इतिहासः इत्येव प्रसिद्धम् । यद्यपि तयोः अतिशयोक्तयः अनेकाः सन्ति, तथापि ते सत्यघटनाम् अवलम्ब्य एव रचिते इति श्रद्धालूनां विश्वासः । तृतीयं तु बाणस्य हर्षचरितम् । क्रिस्ताब्दीये षष्ठशतके विद्यमानः अयं बाणः स्वस्य

आश्रयदातुः कनोजराजस्य हर्षवर्धनस्य चरितं स्वकीये काव्ये वर्णितवान् ।

चतुर्थः ग्रन्थः कल्हणस्य राजतरङ्गिणीनामकः । काश्मीरदेशीयः कल्हणः स्वग्रन्थे काश्मीरराजवंशस्य सहस्रवर्षात्मकं चरित्रं वर्णितवान् । ग्रन्थनिर्माणविषये कविरेव ''अधिकारपत्राणि, शिलालेखनानि, दान-पत्राणि, हस्तलिखितग्रन्थाः, पुराणानि, प्राचीनधनमुद्राः, जनश्रुतयः - एतेषां सर्वेषां परिशीलनं कृत्वा अहम् इमं ग्रन्थं लिखितवान्'' इति वदति । प्रायः संस्कृतसाहित्ये अयम् एकः एव शुद्धः इतिहासः भवितुम् अर्हति ।

अन्येऽपि केचन इतिहाससम्बद्धाः काव्यग्रन्थाः सन्ति । यद्यपि तेषु वर्णनाबाहुल्यं दृश्यते, तथापि ऐतिहासिकाः बहुविषयाः तत्र लभ्यन्ते । तेषां ग्रन्थानां, ग्रन्थकर्तॄणां च नामनिर्देशमात्रम् अत्र क्रियते । आवरणे तेषाम् ऊहात्मकः कालः (क्रिस्ताब्दगणनायां) दीयते ।

पद्मगुप्तस्य (१००५) 'नवसाहसाङ्कचरितम्', बिल्हणस्य (१०८८) 'विक्रमाङ्कदेवचरितम्', हेमचन्द्रस्य (११६३) 'कुमारपालचरितम्', गुर्जरसोमेश्वरस्य (१२५०) 'कीर्तिकौमुदी', गङ्गादेव्याः (१४५०) 'वीर-कम्पणरायचरितम्', तिरुमलाम्बायाः (१५३०) 'वरदाम्बिकापरिणयः', रामभद्राम्बायाः (१६५०) 'रघुनाथाभ्युदयम्' इत्यादयः अनेके ग्रन्थाः भारतीयप्राचीन-इतिवृत्तस्य प्रकाशकाः सन्ति ।

७. संस्कृतग्रन्थकारपरिचयः

ज्योतिश्शास्त्रज्ञाः

आर्यभटः - ज्योतिश्शास्त्रस्य शास्त्रीयत्वं परिकल्पितम् आर्यभटेन एव । आर्यभटम् 'आर्यभट्टः' इत्यपि निर्दिशन्ति केचन । आर्यभटस्य जन्म क्रि.श. ४७६ तमे वर्षे पाटलीपुत्रनगरे (पाटना) जातम् इति, क्रि.श. ४९९ तमे वर्षे एषः 'आर्यभटीयम्' इति ग्रन्थं लिखितवान् इति च ज्ञायते । एषः स्वस्य २३ तमे वयसि एव एतं सिद्धान्तप्रतिपादकं श्रेष्ठं ग्रन्थं रचितवान् आसीत् । एतस्मात् एव वयम् ऊहितुं शक्नुमः यत् एतस्य प्रतिभा कीदृशी आसीत् इति । आर्यभटीयग्रन्थे महासङ्ख्याः अपि संज्ञारूपेण कथं सङ्ग्रहेण लेखनीयाः इति विषयः, वर्ग-घनमूल-त्रिभुजादिगणितविषयाः, कटपयादिसंज्ञाक्रमः, काल-विभाग-नक्षत्रगति-भगण-दिनरात्र्यादिविषयाः चापि विवृताः सन्ति । 'मया

नूतनतया किमपि न उच्यते, पूर्वजैः उक्तम् एव स्फुटतया निरूप्यते' इति स्वग्रन्थे उक्तवान् अस्ति एषः । पञ्चाङ्गकर्तारः बहवः एतस्य सिद्धान्तम् एव अनुसरन्ति ।

वराहमिहिरः - खगोलं, ज्योतिषं, गणितं चेति ज्योतिश्शास्त्रस्य त्रयः विभागाः । खगोलं ग्रहचलनादिकं ज्ञापयति । मानवजीवने ग्रहादीनां प्रभावं निरूपयति ज्योतिषम् । एतेषां फलं निर्णयति गणितम् । वराहमिहिरः एतान् त्रीन् भागान् अपि अधिकृत्य ग्रन्थं विलिख्य 'फलज्योतिश्शास्त्रस्य आद्यप्रवर्तकः' इति ख्यातः अस्ति । एषः क्रि.श. ६ शतके आसीत् इति परिगण्यते । 'विक्रमादित्यस्य आस्थाने स्थितेषु नवसु रत्नेषु अन्यतमः आसीत् एषः' इत्यपि प्रतिपादयन्ति केचन । एषः अवन्तिनिवासी आसीत् इति, आदित्यदासः एतस्य पिता आसीत् इति च ज्ञायते । पञ्चसिद्धान्तिका, लघुसंहिता, वाराहीसंहिता, बृहज्जातकम् इत्येते ग्रन्थाः एतेन रचिताः सन्ति । तत्र बृहज्जातकं सुप्रसिद्धम् । बृहज्जातके ४००० श्लोकाः, १०० अध्यायाः च सन्ति । ज्योतिषिकलक्षणम्, नक्षत्रव्यूहः, वृष्टिः, वास्तुविद्या, अश्वलक्षणं, वज्रपरीक्षा, पाकाध्यायः इत्यादयः बहवः विषयाः निरूपिताः सन्ति अत्र । अतः एषः ग्रन्थः 'लघुविश्वकोषः' इत्येव परिगण्यते । पूर्वकृतीनाम् आधारेण ग्रन्थं रचितवान् एषः तत्र तत्र आधारग्रन्थान् अपि उल्लिखति । जातकस्वरूपज्ञापके ग्रीक्होराशास्त्रविभागे ग्रीक्पद्धतेः विवरणं, ग्रीक्पारिभाषिकशब्दानां प्रयोगः च विशेषतः दृश्यते अत्र ।

ब्रह्मगुप्तः - भास्कराचार्येण 'गणकचक्रचूडामणिः' इति श्लाघितः ब्रह्मगुप्तः ज्योतिश्शास्त्रे प्रसिद्धः पण्डितः । 'ब्रह्मस्फुटसिद्धान्तः' 'खण्डखाद्यकं' चेति ग्रन्थद्वयं रचितवान् अस्ति एषः । ब्रह्मस्फुटसिद्धान्ते दृश्यमानात् उल्लेखात् ज्ञायते यत् एषः क्रि.श. ५९८ तमे वर्षे जन्म प्राप्तवान् इति, विष्णुगुप्तः इति एतस्य पितुः नाम इति, आश्रयदाता राजा व्याघ्रनामकः इति, ३० तमे वयसि तेन स च ग्रन्थः रचितः इति च । ब्रह्मस्फुटसिद्धान्ते ग्रहगणितम्, पाटीगणितम्, क्षेत्रगणितम् इत्यादयः विभागाः सन्ति ।

भास्कराचार्यः - भास्कराचार्यस्य नाम्नः श्रवणात् एव सर्वे 'लीलावती' इति ग्रन्थं स्मरन्ति । किन्तु लीलावती इति स्वतन्त्रः ग्रन्थः न । 'सिद्धान्त-

शिरोमणिः' इत्येतस्य ग्रन्थस्य कश्चन भागः सः । 'भास्कराचार्यस्य लीलावतीनामिका विधवा पुत्री आसीत् । तस्याः खेदस्य निवारणार्थं यत् गणितं बोधितं तत् लीलावती इति नाम्ना एव ख्यातम् अभवत्' इति कथा श्रूयते । 'लीलावती'भागः पाटीगणितं (अङ्कगणितं) निरूपयति । सङ्कलन-व्यवकलनादीनि, गणितस्य सर्वाणि अङ्गानि च प्रतिपादयति लीलावती-भागः । भास्कराचार्यस्य अपरः ग्रन्थः 'करणकुतूहलम्' इति । अत्र पञ्चाङ्गनिर्माणार्थम् आवश्यकाः विषयाः निरूपिताः सन्ति । भास्कराचार्यः कर्णाटकदेशीयः । सह्यपर्वतसमीपस्थः ग्रामः एतस्य जन्मस्थलम् । पितुः नाम महेश्वरः इति । पिता एव एतस्य विद्यागुरुः आसीत् । एषः क्रि.श. ११ शतकस्य पूर्वार्धे आसीत् इति विदुषाम् अभिप्रायः । भास्कराचार्यस्य कृतीनां व्याख्यानानि यावन्ति सन्ति तावन्ति व्याख्यानानि ज्योतिश्शास्त्रस्य अन्यस्य कस्यापि ग्रन्थस्य न सन्ति ।

कोविदः - तृतीयः पाठः

प्रश्नाः

I. *एतेषाम् उत्तराणि लिखत ।*

१. कीदृशः मनुष्यः साक्षात् पशुः ?

२. शिवः कया तुष्टः अभवत् ?

३. 'प्रसूनम्' इत्यस्य अर्थः कः ?

४. द्वयोः ज्योतिश्शास्त्रज्ञयोः नाम लिखत ।

II. *समासं कृत्वा समस्तपदं समासनाम च लिखत ।*

१. कपिः कुञ्जरः इव

२. चरमः च असौ श्लोकः च

३. सन् च असौ वैद्यः च

४. राजा इन्द्रः इव

५. पुरुषः ऋषभः इव

III. *यथोदाहरणं निर्दिष्टलिङ्गेषु तरप्प्रत्ययान्तं तमप्प्रत्ययान्तं च रूपं लिखत ।*

उदा - सरल (स्त्री)	**सरलतरा**	**सरलतमा**
१. कठिन (पुं)	-----	-----
२. क्लिष्ट (नपुं)	-----	-----
३. दीर्घ (स्त्री)	-----	-----
४. ह्रस्व (नपुं)	-----	-----
५. मृदु (पुं)	-----	-----
६. गम्भीर (स्त्री)	-----	-----

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 258) After completing the exercises check your answers.)

कोविदः - चतुर्थः पाठः

॥ यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ॥

Even birds and animals help the one who follows the right path.

१. समासः

अ. द्विगुसमासः

If a word denoting number is found at the beginning of a compound and the compound expresses an aggregate or totality, it is called Dvigu Compound. In this compound, the last vowel usually becomes ई, and the compound word is feminine.

Eg.- त्रिलोकी - त्रयाणां लोकानां समाहारः

An assemblage of three worlds.

Similarly,

पञ्चवटी - पञ्चानां वटानां समाहारः

An assemblage of five banyan trees.

Sometimes the last vowel becomes अ and the compound word is in neuter gender.

Eg - त्रिभुवनम् - त्रयाणां भुवनानां समाहारः

पञ्चपात्रम् - पञ्चानां पात्राणां समाहारः

नवरात्रम् - नवानां रात्रीणां समाहारः

आ. द्वन्द्वसमासः

With the sense of all the words in the compound having equal

importance, if two or more words are compounded, it is a Dvandva Compound.

इतरेतरद्वन्द्व and समाहारद्वन्द्व are the two types of द्वन्द्वसमासः ।

१. इतरेतरद्वन्द्वः -

Two or more words can be compounded to form an इतरेतरद्वन्द्व । Here the words are related by a conjunction ie., च. When it is dissolved the members of the samasa are connected by means of word 'च' alone.

Eg.- (two words) - **रामलक्ष्मणौ - रामश्च लक्ष्मणश्च**

(three words) - **हरिहरगुरवः - हरिश्च हरश्च गुरुश्च**

(four words) - **रामलक्ष्मणभरतशत्रुघ्नाः - रामश्च लक्ष्मणश्च भरतश्च शत्रुघ्नश्च ।**

In this way the compound can be formed with any number of words. The number (वचनम्) of the compound is either द्विवचनम् or बहुवचनम् depending on the total number of persons meant by the words in the compound and the gender of the compound word will be the same as that of the last word in it.

२. समाहारद्वन्द्वः -

This compound also refers to a collection like Dvigu. Here the compound will be in neuter gender only.

Eg.- **पुत्रपौत्रम् - पुत्रः/पुत्राः च पौत्रश्च/पौत्राश्च अनयोः/एतेषां समाहारः**

A collection (group) of son (sons) and grandson (grandsons)

दासीदासम् - दासी/दास्यः च दासः/दासाः च अनयोः समाहारः

A collection of female and male servants.

Note : The word 'समाहारः' denoting a collection, is used in the विग्रहवाक्य of both द्विगु and समाहारद्वन्द्व. But it must be noted that the second member is predominant in द्विगु, since it is a type of तत्पुरुष, whereas in समाहारद्वन्द्व all the members are equally important as it is

a conjunctive compound.

Study the following sentences with द्विगु and द्वन्द्वसमास words in them for better understanding.

१. नारदमहर्षिः **त्रिभुवने** सञ्चरितुं शक्तः ।
Sage Narada is capable of traversing the three worlds.

२. विनायकः **त्रिलोकीं** परिक्रान्तवान् ।
Vinayaka toured the three worlds.

३. **ब्रह्मविष्णुमहेश्वराः** त्रिमूर्तयः सन्ति ।
Brahma, Vishnu and Maheshwara form the trinity of gods.

४. राजकुमारी **दासीदासेन** सह पतिगृहं गता ।
Along with her maids and servants the princess went to her husband's house.

५. **लक्ष्मीसरस्वत्यौ** धनस्य विद्यायाश्च अधिदेवते ।
Lakshmi and Saraswathi are the presiding deities of wealth and learning, respectively.

६. वैयाकरणाः **अष्टाध्यायीं** परिशीलयन्ति ।
Grammarians go through Ashtadhyayi carefully. (अष्टाध्यायी is Panini's work containing aphorisms on grammar)

७. भक्तः **सप्तशत्याः** पारायणं करोति ।
A devotee recites the Saptashati.

८. वत्स ! **पाणिपादं** प्रक्षाल्य आगच्छ !
Child ! Wash your hands and feet and come.

९. मानवः **क्रोधोद्वेगभयैः** विमुक्तः भवेत् ।
Man should be free of anger, anxiety and fear.

१०. **भीमार्जुनौ** उभौ अपि शूरौ एव ।
Both Bhima and Arjuna were heroic.

Words in bold in the above sentences are examples of Dvigu or Dvandva samasas. They are dissolved as follows.

१. त्रयाणां भुवनानां समाहारः - त्रिभुवनम्, तस्मिन् - *द्विगुः*

२. त्रयाणां लोकानां समाहारः - त्रिलोकी, ताम् - *द्विगुः*
३. ब्रह्मा च विष्णुश्च महेश्वरश्च - ब्रह्मविष्णुमहेश्वराः - *इतरेतरद्वन्द्वः*
४. दास्यः च दासाः च एतेषां समाहारः - दासीदासम्, तेन - *दासीदासेन - समाहारद्वन्द्वः*
५. लक्ष्मीः च सरस्वती च - लक्ष्मीसरस्वत्यौ - *इतरेतरद्वन्द्वः*
६. अष्टानाम् अध्यायानां समाहारः - अष्टाध्यायी, ताम् - *द्विगुः*
७. सप्तानां शतस्य समाहारः - सप्तशती, तस्याः - *द्विगुः*
८. पाणी च पादौ च एतेषां समाहारः - पाणिपादम्, तत् - *समाहारद्वन्द्वः*
९. क्रोधश्च उद्वेगश्च भयं च - क्रोधोद्वेगभयानि, तैः - *इतरेतरद्वन्द्वः*
१०. भीमश्च अर्जुनश्च– भीमार्जुनौ - *इतरेतरद्वन्द्वः*

२. विशेषविषयाः

णिजन्ताः (causal affix णिच्)

अश्वः धावति - Horse runs.

सारथिः अश्वान् धावयति - Charioteer makes the horses run.

Observe the difference in the meaning of the above sentences.

धावति - runs, धावयति - causes to run.

In the first sentence the action is not caused by anybody whereas in the second it is caused by some other person. It means the horses run being instigated by the charioteer. Thus, when the sense of instigation (action being caused - like causes to run, causes to do, causes to eat etc.) - is to be denoted the verb root takes णिच् - affix in that sense either to form a verb or a participle.

In the following table two sets of examples are given.One that does not end in णिच् and another ending in णिच्, which is either a verbal form or a participle form. Note the difference in meaning.

पठति - reads	पाठयति - causes to read.
पठितुम् - in order to read	पाठयितुम् - to cause to read
पठितवान् - read (past)	पाठितवान् - taught (caused them to read)

पठित्वा - having read **पाठयित्वा** - having taught (having made a person to read /study)

Some commonly used causal forms are shown in the sentences below. Read them carefully.

१. माता अन्नं बालकेन **खादयति** ।
Mother makes the child eat rice.

२. सारथिः अश्वान् **धावयति** ।
The charioteer drives the horses. (causes them to run.)

३. विदूषकः सर्वान् **हासयति** ।
The jester makes everybody laugh.

४. शारीरकशिक्षकः सर्वान् **क्रीडयति** ।
The physical instructor makes everybody play.

५. मम कृते एकां लेखनीं **दापय** ।
Get me a pen. (make somebody give it to me.)

६. भोः ! शिशुं क्षीरं **पायय** ।
Hey ! Make the child drink milk.

७. तत् मा **पातय** ।
Do not cause it to fall. (Do not drop it.)

८. अहं तेन पत्रं **लेखयामि** ।
I shall make him write a letter.

९. एतेभ्यः प्रदर्शिनीं **दर्शय** ।
Show them the exhibition.

१०. कृपया भवान् मां **स्मारयतु** ।
You please remind me. (cause me to remember.)

अभ्यासः

I. *विग्रहवाक्यं समस्तपदं च दृष्ट्वा समासनाम लिखत ।*

उदा - त्रयाणां भुवनानां समाहारः - त्रिभुवनम् - <u>द्विगुसमासः</u>

१. चतुर्णां युगानां समाहारः - चतुर्युगम् - ....

२. जाया च पतिश्च - जायापती - ....

३. माता च पिता च - मातापितरौ - ....

४. हेमन्तश्च शिशिरश्च वसन्तश्च - हेमन्तशिशिरवसन्ताः - ....
५. त्रयाणां वेदानां समाहारः - त्रिवेदी - ....
६. वाक् च अर्थश्च - वागर्थौ - ....
७. श्वश्रूः च श्वशुरश्च - श्वश्रूश्वशुरौ - ....
८. जननी च जनकश्च - जननीजनकौ - ....
९. पाणी च पादौ च एतेषां समाहारः - पाणिपादम् ....
१०. काकश्च उलूकश्च अनयोः समाहारः - काकोलूकम् ....
११. लाभश्च अलाभश्च - लाभालाभौ - ....
१२. जयश्च विजयश्च - जयविजयौ - ....

II. *अधः दत्तानां विग्रहवाक्यानि लिखित्वा समासनाम लिखत ।*

उदा - ब्रह्मविष्णुमहेश्वराः - ब्रह्मा च विष्णुश्च महेश्वरश्च - इतरेतरद्वन्द्वः

१. धर्मार्थकाममोक्षाः - ....
२. शब्दार्थौ - ....
३. शङ्खचक्रगदापद्मानि - ....
४. गौरीशङ्करौ - ....
५. हरिहरौ - ....
६. पञ्चरात्रम् - ....
७. अष्टाध्यायी - ....
८. ब्राह्मणक्षत्रियवैश्यशूद्राः - ....
९. घटपटम् - ....
१०. सुखदुःखे - ....
११. फलपुष्पाणि - ....
१२. त्रिपादी - ....
१३. कामक्रोधौ - ....
१४. क्षुत्पिपासे - ....
१५. जन्ममृत्यू - ....

III. *अधः दत्तानि विग्रहवाक्यानि अवलम्ब्य समस्तपदं समासनाम च लिखत ।*

१. चतुर्णां वेदानां समाहारः - .... - ....

२. सप्तानाम् अह्नां समाहारः - .... - ....
३. कन्दश्च मूलं च फलानि च - .... - ....
४. लक्ष्मीः च सरस्वती च - .... - ....
५. नटश्च नटी च सूत्रधारश्च - .... - ....
६. नवानां रात्रीणां समाहारः - .... - ....
७. जयश्च अपजयश्च - .... - ....
८. शुभं च अशुभं च अनयोः समाहारः - .... - ....
९. पापं च पुण्यं च - .... - ....
१०. वृक्षाः च पर्णानि च लताः च - .... - ....
११. युधिष्ठिरश्च अर्जुनश्च - .... - ....
१२. नकुलश्च सहदेवश्च - .... - ....

IV. *उदाहरणानुगुणं रूपाणि लिखत -*

	णिजन्तरूपम्	*भविष्यति*	*भूते*
(i) उदा - पठति -	<u>पाठयति</u>	<u>पाठयिष्यति</u>	<u>अपाठयत्</u>
१. लिखति -	----	----	----
२. मिलति -	----	----	----
३. जानाति -	----	----	----
४. श्रृणोति -	----	----	----
५. स्मरति -	----	----	----
६. गच्छति -	----	----	----
७. तिष्ठति -	----	----	----
८. पिबति -	----	----	----

(ii)	*क्त्वा*	*तुमुन्*	*क्तवतु (पुं. ए.व)*
उदा - कारयति -	<u>कारयित्वा</u>	<u>कारयितुम्</u>	<u>कारितवान्</u>
१. पाययति -	----	----	----
२. दापयति -	----	----	----
३. पाठयति -	----	----	----
४. हासयति -	----	----	----
५. दर्शयति -	----	----	----

६. चालयति - ---- ---- ----

V. उदाहरणानुसारं णिजन्तप्रयोगं कृत्वा द्वितीयं वाक्यं पूरयत ।

उदा - अणिजन्तम् - अश्वाः रथं वहन्ति ।

णिजन्तम् - सारथिः अश्वैः रथं वाहयति ।

१. शिशुः क्षीरं पिबति । माता शिशुना क्षीरं .... ।

२. वृक्षात् फलं पतति । सः वृक्षात् फलं .... ।

३. शिष्याः पठन्ति । अहं शिष्यान् .... ।

४. रामः वनम् अगच्छत् । कैकेयी रामं वनम् .... ।

५. छात्राः पाठं स्मरन्ति । गुरुः छात्रान् पाठं .... ।

६. उमेशः पुस्तकं ददाति । पिता पुस्तकं .... ।

७. सेविका कार्यं कृत्वा गच्छति । गृहिणी सेविकया कार्यं .... तां गृहं .... ।

८. बालकाः कथां शृण्वन्ति । पितामहः बालकैः कथां .... ।

९. अहं शालां प्राप्नोमि । माता मां शालां .... ।

१०. अतिथिः उपविशति । गृहस्थः अतिथिम् .... ।

११. घटः भूतले तिष्ठति । सा घटं भूतले .... ।

१२. गणेशः महाभारतम् अलिखत् । व्यासः गणेशेन महाभारतम् .... ।

१३. विनोदकणिकां श्रुत्वा सर्वे हसन्ति ।
रमेशः विनोदकणिकाम् .... सर्वान् .... ।

१४. सेवकः वस्तूनि आनयति । स्वामी सेवकेन वस्तूनि .... ।

१५. जनाः तरीतुम् उद्युक्ताः । नाविकः जनान् .... उद्युक्तः ।

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 259) After completing the exercises check your answers.)

३. सुभाषितानि

**७. गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा ।
पापं तापं च दैन्यं च घ्नन्ति सन्तो महाशयाः ।।**

पदविभागः

गङ्गा, पापम्, शशी, तापम्, दैन्यम्, कल्पतरुः, तथा, पापम्, तापम्, च, दैन्यम्, च, घ्नन्ति, सन्तः, महाशयाः ।

अन्वयः

गङ्गा पापं, शशी तापं, कल्पतरुः दैन्यं च (घ्नन्ति) । महाशयाः सन्तः पापं तापं दैन्यं च घ्नन्ति ।

अन्वयार्थः

गङ्गा = भागीरथीनदी, पापं = पापम्, शशी = चन्द्रः, तापं = तापम्, तथा, कल्पतरुः = कल्पवृक्षः, दैन्यं = दीनताम्, (घ्नन्ति = नाशयन्ति ।) किन्तु, महाशयाः = महापुरुषाः, सन्तः = सज्जनाः, पापं तापं दैन्यं च = पापं तापं दीनतां च सर्वमपि, घ्नन्ति = नाशयन्ति (निवारयन्ति) ।

तात्पर्यम्

गङ्गानद्यां यः स्नानं करोति तस्य पापपरिहारः भवति । गङ्गा तस्य पापं नाशयति । तथैव चन्द्रः अस्माकं तापं परिहृत्य शैत्यम् उत्पादयति । एवमेव कल्पवृक्षः अस्माभिः याचितान् सर्वान् अभिलाषान् पूरयति । एतत् जगति प्रसिद्धमेव । किन्तु गङ्गायाः, चन्द्रस्य, कल्पवृक्षस्य च एकस्मिन् एव विषये सामर्थ्यम् अस्ति । सज्जनाः महापुरुषाः तु न तथा । तेषां सहवासेन अस्माकं पापं, तापः, दैन्यं - सर्वमपि परिहृतं भवति । तादृशं सामर्थ्यं तेषु अस्ति ।

८. भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनः सुजनतामुपयाति तस्य ।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ।।

पदविभागः

भीमम्, वनम्, भवति, तस्य, पुरम्, प्रधानम्, सर्वः, जनः सुजनताम्, उपयाति, तस्य, कृत्स्ना, च, भूः, भवति, सन्निधिरत्नपूर्णा, यस्य, अस्ति, पूर्वसुकृतम्, विपुलम्, नरस्य ।

अन्वयः

यस्य नरस्य विपुलं पूर्वसुकृतम् अस्ति, तस्य भीमं वनं प्रधानं पुरं भवति। सर्वः जनः तस्य सुजनताम् उपयाति । कृत्स्ना भूः सन्निधिरत्नपूर्णा भवति च ।

अन्वयार्थः

यस्य, नरस्य = मनुष्यस्य, विपुलं = प्रभूतम्, पूर्वसुकृतं = पूर्व-जन्मकृतपुण्यम् अस्ति, तस्य, भीमं = भयङ्करम्, वनं = काननम् अपि, प्रधानं = प्रमुखम्, पुरं = पत्तनम्, भवति । सर्वः जनः = सर्वः अपि, तस्य = तस्य विषये, सुजनतां = सौजन्यम्, उपयाति = प्राप्नोति च । कृत्स्ना = समग्रा, भूः = भूमिः अपि, सन्निधिरत्नपूर्णा भवति = सम्पदा रत्नैः च युक्ता भवति ।

तात्पर्यम्

उपमानम् - .... उपमेयम् - ....
वाचकः - .... साधारणधर्मः - ....
३. पयोहिमं हिमम् इव शीतलम् । (पयोहिमम् - Ice Cream)
उपमानम् - .... उपमेयम् - ....
वाचकः - .... साधारणधर्मः - ....
४. तस्याः नेत्रे कमलदलसदृशे ।
उपमानम् - .... उपमेयम् - ....
वाचकः - .... साधारणधर्मः - ....
५. तस्य ध्वनिः कोकिलस्य इव ।
उपमानम् - .... उपमेयम् - ....
वाचकः - .... साधारणधर्मः - ....

(**Note:** Answers for the above exercises are given in the end of this book. (P.No 261) After completing the exercises check your answers.)

३. सुभाषितानि

११. पादपानां भयं वातात् पद्मानां शिशिराद् भयम् ।
पर्वतानां भयं वज्रात् साधूनां दुर्जनाद्भयम् ।।

पदविभागः

पादपानाम्, भयम्, वातात्, पद्मानाम्, शिशिरात्, भयम्, पर्वतानाम्, भयम्, वज्रात्, साधूनाम्, दुर्जनात्, भयम् ।

अन्वयः

पादपानां वातात् भयम् (अस्ति) । पद्मानां शिशिरात् भयम् (अस्ति) । पर्वतानां वज्रात् भयम् (अस्ति) । साधूनां दुर्जनात् भयम् (अस्ति) ।

अन्वयार्थः

पादपानां = वृक्षाणाम्, वातात् = वायुतः, भयम् (अस्ति) = भीतिः अस्ति । पद्मानां = कमलानाम्, शिशिरात् = हिमकालकारणतः, भयम् (अस्ति) = भीतिः अस्ति । पर्वतानां = गिरीणाम्, वज्रात् =

इन्द्रस्य वज्रायुधात्, भयम् (अस्ति) = भीतिः अस्ति । साधूनां = सज्जनानाम्, दुर्जनात् = दुष्टजनतः, भयम् (अस्ति) = भीतिः अस्ति ।

तात्पर्यम्

दृढमूलाः अपि वृक्षाः वेगयुक्तस्य वायोः कारणतः पतनं प्राप्तुम् अर्हन्ति । अतः वृक्षाणां वायुतः भयम् (अपायः) अस्ति । यदि हिमपातः भवति तर्हि कमलं नष्टं भविष्यति । शिशिरऋतौ हिमपातः भवति खलु ? अतः कमलानि शिशिरऋतुतः भीतानि भवन्ति । पूर्वं पर्वतानां पक्षाः आसन् इति, इन्द्रः तान् पक्षान् कर्तितवान् इति च कथा श्रूयते । अतः वज्रायुधतः पर्वतानां भीतिः । सज्जनाः यद्यपि यस्य कस्यापि अहितं न आचरन्ति, तथापि परपीडनस्वभावयुक्ताः दुष्टाः विना कारणम् अपि सज्जनान् पीडयितुम् अर्हन्ति । अतः सज्जनाः दुष्टजनेभ्यः भीताः भवन्ति । एवं लोके एकैकस्यापि एकैकविधं भयं भवति एव ।

१२. अधमा धनमिच्छन्ति धनमानौ तु मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥

पदविभागः

अधमाः, धनम्, इच्छन्ति, धनमानौ, तु, मध्यमाः, उत्तमाः, मानम्, इच्छन्ति, मानः, हि, महताम्, धनम् ।

अन्वयः

अधमाः धनम् इच्छन्ति । मध्यमाः तु धनमानौ (इच्छन्ति) । उत्तमाः मानम् इच्छन्ति, हि मानः महतां धनम् अस्ति ।

अन्वयार्थः

अधमाः = अनुत्तमाः जनाः, धनं = विनिमयसाधनरूपं द्रव्यम्, इच्छन्ति = अभिलषन्ति । मध्यमाः तु = मध्यमजनाः तावत्, धनमानौ = धनं मानं च, इच्छन्ति । उत्तमाः = श्रेष्ठाः जनाः, मानं = गौरवम्, इच्छन्ति = अभिलषन्ति, हि = यतो हि, महताम् = महापुरुषाणां दृष्ट्या, मानः = गौरवम्, धनम् = सारभूतम् ।

तात्पर्यम्

अनुत्तमाः जनाः जीवने धनमात्रम् इच्छन्ति । धनसम्पादनम् एव तेषां जीवनस्य लक्ष्यं भवति । एतादृशं जीवनं कदापि श्लाघ्यं न भवति ।

मध्यमजनाः धनं मानं च इच्छन्ति । धनेन सह मानम् अपि एते इच्छन्ति इत्यतः एतेषां जीवनं निन्द्यं न भवति चेदपि अतिप्रशस्तं तु न । महापुरुषाः सदापि मानम् एव इच्छन्ति । ते धनं तृणसमानं भावयन्ति । मानम् एव धनं भावयन्ति । मानधनानाम् एतेषां जीवनम् एव उत्कृष्टम् ।

४. काव्यकथा
नैषधीयचरितम्

संस्कृतसाहित्ये पञ्च महाकाव्यानि प्रसिद्धानि इति वयं जानीमः एव । तेषु रघुवंशम्, कुमारसम्भवम्, शिशुपालवधम्, किरातार्जुनीयम् इति चतुर्णां काव्यानां कथाः पूर्वपाठेषु दत्ताः । इदानीं पञ्चमं महाकाव्यं 'नैषधीयचरितम्' आधारीकृत्य तस्य कथा दीयते ।

महाकविः श्रीहर्षः 'नैषधीयचरितं' लिखितवान् । निषधदेशस्य राजा नलः । तस्य चरितम् एव अत्र काव्ये वर्णितम् । अत एव काव्यस्य 'नैषधीयचरितम्' इति नामधेयम् । अस्मिन् महाकाव्ये २२ सर्गाः सन्ति ।

पूर्वकाले निषधदेशे वीरसेनो नाम नृपतिः आसीत् । तस्य पुत्रः नलः । नलः सकलासु विद्यासु पारङ्गतः आसीत् । नीतिनिपुणः, अध्ययनशीलश्च आसीत् । तस्य कीर्तिः सूर्यचन्द्रयोः कीर्तिमपि अजयत् । नलः राज्यभारं स्वीकृतवान् । नलस्य राज्ये दारिद्र्यमेव नासीत् । नलः बहु सुन्दरः आसीत् । तस्य नेत्रद्वयमपि कमलद्वयमिव आसीत् । मन्देन[1] हासेन सः चन्द्रस्य कान्तिमपि जितवान् । एवं नलः गुणवान्, रूपवान्, शूरः, विद्यावान् च आसीत् । एतादृशं नृपं को वा न आद्रियते[2] ? का वा स्त्री न इच्छति ? लोके नलस्य गुणान् न केवलं निषधदेशीयाः प्रशंसन्ति स्म, किन्तु अन्यदेशीयाः अपि प्रशंसन्ति स्म ।

निषधदेशस्य समीपे एव विदर्भो नाम राज्यम् आसीत् । तत्र भीमो नाम गुणसम्पन्नः राजा आसीत् । स शूरः विवेकी च । दमयन्ती तस्य सुता । सा अत्यन्तं रूपवती आसीत् । सा विरामकाले पितुः भीमराजस्य सभाभवनम् आगच्छति स्म । तत्र सङ्गीतं शृणोति स्म । नाट्यं पश्यति स्म । पण्डितानां साहित्यश्लोकान् अपि शृणोति स्म । सभान्ते वन्दिनः[3] राज्ञां प्रशंसां वाचयन्ति स्म । तस्मिन् अवसरे विदेशीयराजानाम् अपि वर्णनं भवति स्म ।

---

1. मन्दहासः - smile, 2. will not respect, 3. Bards

तदा नलमहाराजस्य वर्णनं विशेषेण भवति स्म । तस्य एकैकोऽपि गुणः बहुकालं गम्भीरवाक्यैः वर्णितः भवति स्म । सर्वे नलविषये अतीवादरभावं प्रकटयन्ति स्म । इदं पुनः पुनः श्रुत्वा दमयन्ती मनसा एव नलम् अपेक्षितवती ।

भीमराजः दानशीलः । तत्कारणात् अपि बहवः ब्राह्मणाः राजसमीपम् आगच्छन्ति स्म । यथोचितदानानि प्राप्नुवन्ति स्म । ते अपि नलं बहुधा वर्णयन्ति स्म । तेषु केचन एकान्ते भीमराजम् उक्तवन्तः - 'राजन् ! निषधदेशाधिपः नलः एव दमयन्त्याः अनुरूपः वरः' इति । इमं विषयं सखीद्वारा दमयन्ती ज्ञातवती । अतः सा नलविषये दृढमनुरागमेव अकरोत् ।

एतस्मिन् एव समये भीमराजः चिन्तितवान् - 'पुत्र्याः दमयन्त्याः विवाहः करणीयः' इति ।

एकस्मिन् शुभदिने प्रातः नलमहाराजः अभ्यञ्जनादिकार्यं परिसमाप्य[4] प्रजाभ्यः दानानि दत्त्वा नगरस्य देवताः अर्चितुं गतवान् । तत्र केचन ब्राह्मणाः नलं दृष्ट्वा एकान्ते दमयन्त्याः रूपगुणशीलादीनि निवेदितवन्तः । एतेन नलः अपि दमयन्त्याम् अनुरागवान् जातः । यथा यथा दिनानि गतानि तथा तथा दमयन्तीविषयकः नलस्य अनुरागः तीव्रः जातः । 'दमयन्ती एव मया परिणेतव्या' इति सः निश्चितवान् ।

एकदा नलः वनस्य सौन्दर्यं द्रष्टुम् इच्छन् अश्वम् आरुह्य[5] वनं प्रति प्रस्थितवान् । वने सत्त्वैः प्राणिभिश्च तस्य राजोपचाराः कृताः । ततः सः उद्यानं गतवान् । तत्र सः सरोवरे एकं सुवर्णहंसम् अपश्यत् । 'एषः हंसः मया ग्रहीतव्यः[6]' इति नलः चिन्तितवान् । अतः सः स्वरूपं ह्रस्वं कृत्वा काष्ठमूर्तिः[7] इव स्थितवान् । तं मूर्तिः इति मत्वा सुवर्णहंसः तस्य समीपम् आगतः । तत्क्षणे एव नलः हंसं गृहीतवान् । एतत् दृष्ट्वा अन्ये सर्वे हंसाः कूजितवन्तः[8] । तथापि नलः हंसं न परित्यक्तवान् ।

तदा सुवर्णहंसः अवदत् - "यदि त्वं मां त्यजसि तर्हि भवता प्रार्थितम् उपकारम् अहं करिष्यामि" इति ।

नलः हंसं त्यक्तवान् । तं दमयन्तीवृत्तान्तं निवेद्य नलः उक्तवान् -

---

4. Having completed, 5. Having mounted 6. must be caught 7. like a wooden image, 8. cackled.

''हंसश्रेष्ठ ! दमयन्ती माम् एव यथा परिणयेत् तथा करोतु'' इति ।

नलदमयन्त्योः विवाहकार्यसाधनाय हंसः विदर्भदेशं प्रति प्रस्थितवान् ।

प्रश्नाः

१. नलः कस्य देशस्य राजा ?
२. दमयन्ती कस्य सुता ?
३. नलः सरोवरे कथम् अतिष्ठत् ?
४. हंसः किमर्थं विदर्भदेशम् अगच्छत् ?
५. नैषधीयचरितं केन लिखितम् ?

५. श्लोकेषु अन्वयक्रमः

अहं यद्यपि शिवस्य किङ्करः तथापि सिंहवेषेण अत्र अस्मि । तत्र कारणम् अस्ति यत् अहम् एतस्य देवदारुवृक्षस्य रक्षकः ।

१०. कण्डूयमानेन कटं कदाचित् वन्यद्विपेनोन्मथिता **त्वगस्य ।**
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥

पदविभागः

कण्डूयमानेन[1], कटम्[2], कदाचित्[3], वन्यद्विपेन[4], उन्मथिता[5], त्वक्[6], अस्य[7], अथ[8], एनम्[9], अद्रेः[10] तनया[11], शुशोच[12], सेनान्यम्[13], आलीढम्[14], इव[15], असुरास्त्रैः[16] ॥

अन्वयः

कदाचित् कटं कण्डूयमानेन वन्यद्विपेन अस्य त्वक् उन्मथिता । अथ अद्रेः तनया असुरास्त्रैः आलीढं सेनान्यम् इव एनं शुशोच ।

प्रदिपदार्थः

कदाचित् - Once, **वन्यद्विपेन** - by a wild elephant, **कण्डूयमानेन** that was rubbing, **कटम्** - (its) temples (against the tree) **त्वक्** - the bark (skin), **अस्य** - of this (tree), **उन्मथिता** - was peeled off, **अथ** - Then, **अद्रेः तनया** - the daughter of Mount Himavan (Parvathi), **शुशोच** - grieved over, **एनम्** - (for) this tree, **सेनान्यम् इव** - like (grieving over her own son) Shanmukha, **आलीढम्** - who had been wounded, **असुरास्त्रैः** - by the arrows of demons.

तात्पर्यम्

एकदा वनगजः अत्र आगत्य अस्मिन् देवदारुवृक्षे कण्डूयनम् आरब्धवान् । तदा वृक्षस्य त्वक् निर्मुक्ता । अस्य वृक्षस्य विषये पार्वत्याः बहु प्रीतिः । अतः सा तथा शोकं प्रकटितवती, यथा पुरा राक्षसानां बाणैः पीडितं पुत्रं षण्मुखं दृष्ट्वा शोकतप्ता आसीत् ।

अन्वयरचना

शुशोच - दुःखिता - *क्रियापदम्*
का शुशोच ? - तनया
कस्य तनया ? - अद्रेः
कं शुशोच ? - एनम्
कम् इव शुशोच ? - सेनान्यम् इव
कीदृशं सेनान्यम् ? - आलीढम्
कैः आलीढम् ? - असुरास्त्रैः
कदा शुशोच ? - अथ

उन्मथिता - उत्पाटिता
का उन्मथिता ? - त्वक्
कस्य त्वक् ? - अस्य
केन उन्मथिता ? -वन्यद्विपेन
कीदृशेन वन्यद्विपेन ? - कण्डूयमानेन
कं कण्डूयमानेन ? - कटम्
कदा उन्मथिता ? - कदाचित्

विशेषः

अ) पदविरणम्

1. अ. 'कण्डूयमान'शब्दः, पु. तृ.वि. ए.व.
2. अ. 'कट'शब्दः, पु. द्वि.वि. ए.व.
3. अव्ययम् 'कदाचित्'
4. अ. 'वन्यद्विप'शब्दः पु. तृ.वि. ए.व.
5. आ. 'उन्मथिता'शब्दः स्त्री. प्र.वि. ए.व

6. च. 'त्वच्'शब्दः स्त्री. प्र.वि. ए.व.
7. म. 'इदम्'शब्दः, पु. ष.वि. ए.व.
8. अव्ययम् 'अथ'
9. द. 'एतद्'शब्दः, पु. द्वि.वि. ए.व.
10. इ. 'अद्रि'शब्दः, पु. ष.वि. ए.व.
11. आ. 'तनया'शब्दः, स्त्री. प्र.वि. ए.व.
12. 'शुच्'धातुः प.प. भूतकालः (लिट्), प्र.पु. ए.व.
13. ई 'सेनानी'शब्दः पु. द्वि.वि. ए.व.
14. अ. 'आलीढ'शब्दः, पु. द्वि.वि. ए.व.
15. अव्ययम् 'इव'
16. अ. 'असुरास्त्र'शब्दः न. तृ.वि. ब.व.

आ) समासः

१. वन्यश्चासौ द्विपश्च, तेन - कर्मधारयः
२. असुराणाम् अस्त्राणि, तैः - ष. तत्पुरुषः

तस्य वृक्षस्य रक्षणार्थम् अहं नियुक्तः । अद्य मया समीचीनं भोजनं लब्धम् । परमेश्वरेणैव इयं गौः प्रेषिता । अतः मां मारयितुं तव प्रयत्नः व्यर्थः ।

११. स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान् दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ।।

पदविभागः

सः[1], त्वम्[2], निवर्तस्व[3], विहाय[4], लज्जाम्[5], गुरोः[6], भवान्[7], दर्शितशिष्यभक्तिः[8], शस्त्रेण[9], रक्ष्यम्[10], यत्[11], अशक्यरक्षम्[12], न[13], तत्[14], यशः[15], शस्त्रभृताम्[16], क्षिणोति[17] ।

अन्वयः

सः त्वं लज्जां विहाय निवर्तस्व ।भवान् गुरोः दर्शितशिष्यभक्तिः (अस्ति)। यत् शस्त्रेण रक्ष्यम् अशक्यरक्षं, तत् शस्त्रभृतां यशः न क्षिणोति ।

प्रतिपदार्थः

सः त्वम् - Such a person (being helpless) you, निवर्तस्व - return,

विहाय – giving up, **लज्जाम्** - (any sense of) shame, **भवान्** – you, **दर्शितशिष्यभक्तिः** – are one who has shown the devotion of a disciple, **गुरोः** – to the preceptor. **यत् रक्ष्यम्** – A thing which is to be guarded, **शस्त्रेण** – with the help of a weapon, **अशक्यरक्षम्** - (if it) cannot be protected, **तत्** – it, **न क्षिणोति** - does not affect, **यशः** - the fame, **शस्त्रभृताम्** - of those who are armed with weapons.

तात्पर्यम्

दिलीपः किं करणीयमिति ज्ञातुम् अशक्तः सन् स्थितः । तदा सिंहः एवं वदति - "राजन् ! तव वृथा परिश्रमः । निस्सङ्कोचः त्वम् आश्रमं निवर्तस्व । 'अहं गुरुधनं नाशितवान्' इति विचारः मास्तु । यतो हि रक्षणीयं वस्तु शस्त्रेणापि यदा रक्षितुम् असाध्यं तदा शस्त्रधारी अपि किं वा करोति ? त्वया शिष्यभक्तिः सम्यक् प्रदर्शिता एव अस्ति । अत्र गुरोः अपि न सन्देहः । अतः आश्रमं गच्छ ।" इति ।

अन्वयरचना

निवर्तस्व - (आश्रमं) प्रतिगच्छ - *क्रियापदम्*
कः ? - त्वम् - *कर्तृपदम्*
कीदृशः त्वम् ? - सः
किं कृत्वा निवर्तस्व ? - विहाय
कां विहाय ? - लज्जाम्

(अस्ति)
कः ? - भवान्
कीदृशः भवान् ? - दर्शितशिष्यभक्तिः
कस्य दर्शितशिष्यभक्तिः ? - गुरोः
न क्षिणोति - न्यूनं न करोति - *क्रियापदम्*
किं न क्षिणोति - तद् - *कर्तृपदम्*
कीदृशं तत् ? - रक्ष्यम्
पुनः कीदृशं तत् ? - अशक्यरक्षम्
केन अशक्यरक्षम् ? - शस्त्रेण

किं न क्षिणोति ? - यशः - *कर्मपदम्*
केषां यशः ? - शस्त्रभृताम्

विशेशः

अ) पदविवरणम्

1. द. 'तद्'शब्दः, पु. प्र.वि. ए.व.
2. द. 'युष्मद्'शब्दः, त्रि. प्र.वि. ए.व.
3. नि-उपसर्गपूर्वकः 'वृतु'धातुः, आ.प. प्रेरणा (लोट्), म.पु. ए.व.
4. अव्ययम् (प्र) 'विहाय' - वि उपसर्गपूर्वकः 'हा' धातुः ल्यप् प्रत्ययः
5. आ. 'लज्जा'शब्दः, स्त्री. द्वि.वि. ए.व,
6. उ. 'गुरु'शब्द, पु. ष.वि. ए.व.
7. त. 'भवत्'शब्दः , पु. प्र.वि. ए.व.
8. इ. 'दर्शितशिष्यभक्ति'शब्दः, पु. प्र.वि. ए.व.
9. अ. 'शस्त्र'शब्दः न. तृ.वि. ए.व.
10. अ. 'रक्ष्य'शब्दः, न. प्र.वि. ए.व.
11. द. 'यद्'शब्दः, न. प्र.वि. ए.व.
12. अ. 'अशक्यरक्ष'शब्दः, न. प्र.वि. ए.व.
13. अव्ययम् 'न'
14. द. 'तद्'शब्दः, न. प्र.वि. ए.व.
15. स. 'यशस्'शब्दः, न. द्वि.वि. ए.व.
16. त. 'शस्त्रभृत्'शब्दः, पु. ष.वि. ब.व.
17. 'क्षि'धातुः प.प. वर्तमानकालः (लट्), प्र.पु. ए.व.

आ) समासः

१. शिष्यस्य भक्तिः - शिष्यभक्तिः - ष. तत्पुरुषः
दर्शिता शिष्यभक्तिः येन सः - दर्शितशिष्यभक्तिः - बहुव्रीहिः

२. न शक्यम् - अशक्यम् - नञ्तत्पुरुषः
अशक्या रक्षा यस्य तत् - अशक्यरक्षम् - बहुव्रीहिः

यदा सिंहः एवम् उक्तवान् तदा दिलीपः किञ्चित् सङ्कोचं परित्यज्य उक्तवान् -

१२. स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥

पदविभागः

सः[1], त्वम्[2], मदीयेन[3], शरीरवृत्तिम्[4], देहेन[5], निर्वर्तयितुम्[6], प्रसीद[7], दिनावसानोत्सुकबालवत्सा[8], विसृज्यताम्[9], धेनुः[10], इयम्[11], महर्षेः[12] ।

अन्वयः

सः त्वं मदीयेन देहेन शरीरवृत्तिं निर्वर्तयितुं प्रसीद । दिनावसानोत्सुक-बालवत्सा महर्षेः इयं धेनुः विसृज्यताम् ।

प्रतिपदार्थः

सः - त्वम् - That (such an animal which has caught hold of its prey) you, प्रसीद - be pleased, शरीरवृत्तिम् निर्वर्तयितुम् - to feed yourself (to satisfy your hunger), मदीयेन - with my, देहेन - body. इयम् - This, धेनुः - cow, महर्षेः - of the great sage, दिनावसानोत्सुकबालवत्सा - which has a young calf eagerly awaiting her (mother's arrival) at the end of the day, विसृज्यताम् - may be released.

तात्पर्यम्

दिलीपः उक्तवान् - "यदि क्षुधायाः शान्तये इयं धेनुः त्वया गृहीता, तर्हि मां भक्षयित्वा क्षुधायाः शमनं कुरु । अस्याः धेनोः वत्सः बालः । सः आश्रमे मातुः प्रतीक्षां करोति । अतः इमां विसृज । मामेव भक्षय" इति ।

अन्वयरचना

प्रसीद - अनुग्रहं कुरु - *क्रियापदम्*
कः ? - त्वम् - *कर्तृपदम्*
कीदृशः त्वम् ? - सः
किमर्थं प्रसीद ? - निर्वर्तयितुम्
कां निर्वर्तयितुम् ? - शरीरवृत्तिम्
केन निर्वर्तयितुम् ? - देहेन
कीदृशेन देहेन ? - मदीयेन

विसृज्यताम् - त्यज्यताम् - *क्रियापदम्*
केन विसृज्यताम् ? - त्वया - *कर्तृपदम्*
का विसृज्यताम् ? - धेनुः
कीदृशी धेनुः ? - इयम्
पुनः कीदृशी ? - दिनावसानोत्सुकबालवत्सा
कस्य धेनुः ? - महर्षेः

विशेषः

अ) पदविवरणम्

1. द. 'तद्'शब्दः, पु. प्र.वि. ए.व.
2. द. 'युष्मद्'शब्दः, त्रि. प्र.वि. ए.व.
3. अ. 'मदीय'शब्दः. पु. तृ.वि. ए.व.
4. इ. 'शरीरवृत्ति'शब्दः, स्त्री. द्वि.वि. ए.व.
5. अ. 'देह'शब्दः, पु. तृ.वि. ए.व.
6. अव्ययम् (प्र) - निर्वर्तयितुम् - निर् + 'वृतु'धातुः तुमुन्प्रत्ययः
7. 'प्र'-उपसर्गपूर्वकः 'षद'धातुः, प.प. प्रेरणा(लोट्), म.पु. ए.व.
8. आ. 'दिनावसानोत्सुकबालवत्सा'शब्दः, स्त्री. प्र.वि. ए.व.
9. वि + सृज्, कर्मणि, आ.प. प्रेरणा (लोट्), प्र.पु. ए.व.
10. उ. 'धेनु'शब्दः, स्त्री. प्र.वि. ए.व.
11. म. 'इदम्'शब्दः, स्त्री. प्र.वि. ए.व.
12. इ. 'महर्षि'शब्दः, पु. ष.वि. ए.व.

आ) समासः

१. शरीरस्य वृत्तिः - शरीरवृत्तिः, ताम् - *ष. तत्पुरुषः*
२. दिनस्य अवसानम् - दिनावसानम् - ष. तत्पुरुषः
बालश्चासौ वत्सश्च - बालवत्सः - *कर्मधारयः*
उत्सुकश्चासौ बालवत्सश्च - उत्सुकबालवत्सः - *कर्मधारयः*
दिनावसाने उत्सुकबालवत्सः यस्याः सा - *बहुव्रीहिः*

६. संस्कृतसाहित्यपरिचयः

भारतीयदर्शनानि

यत् तात्त्विकचिन्तनं भवति तदेव दर्शनं नाम । प्रपञ्चे बहूनि वस्तूनि भवन्ति । तेषु कानिचन प्रत्यक्षाणि, पुनः कानिचन परोक्षाणि । भूमिः, जलम्, अग्निः इत्यादीनि वस्तूनि प्रत्यक्षाणि । जीवः, आत्मा, पुण्यं, पापम् इत्यादीनि परोक्षाणि । एकैकम् अपि वस्तु विचित्रं भवति । एकैकस्य स्वभावः अपि विचित्रः भवति । एतादृशानां वस्तूनां, वस्तुस्वभावानां च विषये चिन्तनम् एव 'तत्त्वविचारः' नाम । सः एव 'दर्शनम्' इत्यपि उच्यते ।

दर्शनानि आस्तिकनास्तिकभेदेन द्विधा विभज्यन्ते इति वयं जानीमः एव । 'देवे श्रद्धावन्तः आस्तिकाः, देवश्रद्धारहिताः नास्तिकाः' इति विश्वासः दृश्यते लोके । किन्तु दर्शनविषये एषः विचारः न युज्यते । दर्शनक्षेत्रे तावत् - यानि वेदस्य प्रामाण्यम् अङ्गीकुर्वन्ति तानि 'आस्तिकानि' इति उच्यन्ते । सांख्यं, योगः, न्यायः, वैशेषिकः, पूर्वमीमांसा, उत्तरमीमांसा च प्रसिद्धानि आस्तिकदर्शनानि । (तेषु सांख्ये पूर्वमीमांसायां च देवस्य प्रस्तावः नास्ति ।) यानि वेदप्रामाण्यं न अङ्गीकुर्वन्ति तानि नास्तिकानि । बौद्ध-जैन-चार्वाकादीनि दर्शनानि अत्र उदाहरणानि ।

चार्वाकदर्शनम् - चिन्तनगाम्भीर्यदृष्ट्या पश्यामः चेत् ज्ञायते यत् निम्नस्तरीयं दर्शनं चार्वाकदर्शनम् इति । बृहस्पतिः एव जनान् मोहयितुं प्रियकरैः वचनैः चार्वाकमतम् उपदिष्टवान् इति श्रूयते । चार्वाकदर्शनस्य स्वतन्त्रग्रन्थः इदानीं न उपलभ्यते । चार्वाकदर्शनं, धर्माधर्मादीनां, पापपुण्यादीनाम् आत्मादीनां वा अस्तित्वं न अङ्गीकरोति । चार्वाकाः भोगवादं विशेषतः पुरस्कुर्वन्ति । किन्तु एतावता न निर्णेतव्यं यत् ते भोगैकतत्पराः दुराचाराः च आसन् इति । अहिंसा, शान्तिप्रियता, युद्धनिषेधः इत्यादयः बहवः अंशाः तैः अपि प्रतिपादिताः ।

जैनदर्शनम् - जैनदर्शनं बौद्धदर्शनात् पूर्वतनम् । अस्मिन् दर्शने सिद्धपुरुषाः 'अर्हत्'शब्देन निर्दिश्यन्ते । अतः एव एतस्य दर्शनस्य 'आर्हतदर्शनम्' इत्यपि नाम । महावीरेण रागादयः रिपवः जिताः इत्यतः सः 'जिनः' इति ख्यातः अभवत् । ततः आगतं दर्शनं 'जैनदर्शनम्' । जैनमतप्रचारकाः 'तीर्थङ्कराः' इति उच्यन्ते । तीर्थङ्करेषु आद्यः ऋषभदेवः, महावीरश्च अन्तिमः । लौकिकम् अनुभवम् अपि ते 'स्यात्' इति वदन्ति । स्याद्वादः जैनदर्शनस्य प्रधानः वादः ।

सम्यग्दर्शनं, सम्यग्ज्ञानं, सम्यक्चारित्र्यं चेति जैनदर्शने रत्नत्रयम् । जनानां जीवनं नीतिपथे यथा स्यात्, जनाः प्रवृत्तिमार्गात् क्रमशः विमुखाः सन्तः निवृत्तिमार्गोन्मुखाः यथा स्युः तथा एतेन दर्शनेन विशेषपरिश्रमः कृतः अस्ति ।

बौद्धदर्शनम् - भगवता बुद्धेन बौद्धदर्शनं प्रवर्तितम् । भारतीयशास्त्रधारासु बौद्धदर्शनस्य प्रभावः विशेषतः दृश्यते । बौद्धमूलग्रन्थाः भारते लुप्तप्रायाः सन्ति । विदेशीयपण्डितानां संशोधनस्य फलतः इदानीं केचन ग्रन्थाः दृश्यन्ते । भगवतः बुद्धस्य अनन्तरं बौद्धेषु बह्व्यः शाखाः उत्पन्नाः । ताश्च चतस्रः प्राधान्येन - वैभाषिकाः, सौत्रान्तिकाः, योगाचाराः, माध्यमिकाः चेति । वैभाषिकाणां हीनयानसम्प्रदायः । अन्येषां त्रयाणां महायानसम्प्रदायः । बौद्धानां 'शून्यवादः' प्रसिद्धः । 'यत्र किमपि नास्ति तत्' इति अत्र शून्यपदस्य अर्थः न । बौद्धदर्शने शून्यपदस्य दार्शनिकः विशालः अर्थः अस्ति । बौद्धमतस्य धार्मिकाः बहवः अंशाः 'त्रिपिटके' निरूपिताः सन्ति ।

वैशेषिकदर्शनम् - सकलदर्शनापेक्षया वैशेषिकदर्शनं प्राचीनम् । दर्शनम् एतत् सर्वशास्त्रोपकारकम् अस्ति । एतस्य दर्शनस्य प्रवर्तकः कणादः । कश्यपवंशोत्पन्नः एषः 'काश्यपः' इत्यपि ख्यातः । एतद्दर्शनस्य चिन्तनस्य न्यायदर्शनचिन्तनस्य च विशेषभेदः न दृश्यते । लोके स्थिताः पदार्थाः सप्तधा विभक्ताः अत्र । एतस्य दर्शनस्य मुख्यं प्रतिपाद्यं निःश्रेयसम् (मोक्षः) । पदार्थाः निःश्रेयससाधनभूताः ।

न्यायदर्शनम् - न्यायदर्शनस्य प्रवर्तकः सूत्रकारः गौतमः । अन्यानि शास्त्राणि इव एतत् अपि प्राचीने काले मोक्षशास्त्रत्वेन एव प्रसिद्धम् आसीत् । चतुर्दशे शतके गङ्गेशोपाध्यायः एतत् पृथक्शास्त्रत्वेन वर्धितवान् । ततः तत् 'नवीनन्यायः' इति ख्यातम् । यद्यपि वैशेषिकदर्शनस्य न्यायदर्शनस्य च सूक्ष्मः भेदः अस्ति, तथापि इदानीम् तयोः अभेदः एव इति परिगण्यते । न्यायदर्शने ज्ञानमीमांसायाः प्रमाणानां च प्राशस्त्यम् अस्ति । ज्ञानात् मुक्तिः इति प्रतिपादयति एतत् दर्शनम् । एतस्मिन् दर्शने 'ईश्वरः' 'अनुमानेन' साध्यते ।

साङ्ख्यदर्शनम् - साङ्ख्यदर्शनस्य आद्यः आचार्यः कपिलः । तेन प्रवर्तितं साङ्ख्यदर्शनं कीदृशम् इति इदानीं न ज्ञायते । यतः एतद्दर्शनग्रन्थाः सर्वे लुप्ताः आसन् । ईश्वरकृष्णः नाम पण्डितः कारिकां पुनः निर्माय एतत् दर्शनम् उज्जीवितवान् । साङ्ख्यदर्शने प्रकृतिः पुरुषः चेति मूलतत्त्वद्वयम् । ततः एव जगतः उत्पत्तिः । प्रकृतिः जडा, पुरुषः चेतनः । पुरुषसम्बन्धात् प्रकृतौ क्रिया ।

प्रकृतिपुरुषभिन्नम् ईश्वरं न अङ्गीकरोति सांख्यदर्शनम् । इदानीं विविधानि वेदान्तचिन्तनानि यानि दृश्यन्ते तेषु सर्वेषु सांख्यदर्शनस्य प्रभावः अस्ति एव । वैद्यशास्त्रे अपि एतस्य प्रभावः दृश्यते ।

योगदर्शनम् - योगदर्शनम् अपि अतिप्राचीनम् । महर्षिणा पतञ्जलिना योगसूत्राणि रचितानि । योगदर्शनम् ईश्वरतत्त्वम् अङ्गीकरोति । 'योगः चित्तवृत्तिनिरोधः' इति वदति योगसूत्रम् । यमनियमादयः योगस्य अष्ट अङ्गानि । योगस्य परमं प्रयोजनं कैवल्यम् (मोक्षः) । भगवद्गीतायां अपि ज्ञानयोगभक्तियोगादयः सरलया शैल्या रमणीयतया निरूपिताः सन्ति । आसनानि अपि योगस्य लघु अङ्गम् । सामान्याः जनाः अपि योगदर्शनस्य केषाञ्चित् तत्त्वानाम् अनुसरणतः जीवनपरिष्कारं प्राप्तुम् अर्हन्ति ।

पूर्वमीमांसादर्शनम् - मीमांसादर्शनस्य प्रवर्तकः जैमिनिः । मीमांसा नाम जिज्ञासा (चिन्तनम्) इति अर्थः । मीमांसादर्शनं वेदस्य परमप्रामाण्यम् अङ्गीकरोति । वेदस्य पूर्वभागभूतान् 'ब्राह्मण'ग्रन्थान् ये स्वदर्शनस्य परमाधारं भावितवन्तः ते 'पूर्वमीमांसाकाराः' जाताः । वेदस्य उत्तरभागभूताः उपनिषदः ये स्वदर्शनस्य परमाधारं भावितवन्तः ते 'उत्तरमीमांसाकाराः' इति प्रसिद्धिं गताः । मीमांसादर्शने कर्मणः एव परमप्राधान्यम् । मीमांसादर्शने वेदार्थ-ज्ञानार्थं विशेषप्राधान्यं दत्तम् अस्ति । वेदः शब्दप्रमाणेन ज्ञायते इति वदति एतत् दर्शनम् । वेदस्य अपौरुषेयत्वम् अपि एतत् दर्शनं प्रतिपादयति ।

उत्तरमीमांसादर्शनम् - उत्तरमीमांसा नाम 'वेदान्तः' । उपनिषदाम् आधारेण अत्र चिन्तनं क्रियते । वेदान्तदर्शने चिन्तनस्य पराकाष्ठा दृश्यते । वेदान्तदर्शने प्रस्थानत्रयम् अस्ति । ब्रह्मसूत्राणि, भगवद्गीता, उपनिषदः च 'प्रस्थानत्रय'शब्देन निर्दिश्यन्ते । विविधाः आचार्याः एतेषां ब्रह्मसूत्रादीनां भाष्यं स्वचिन्तनानुगुणं लिखितवन्तः । ततः अद्वैतं, द्वैतं, विशिष्टाद्वैतम् इत्यादयः सम्प्रदायाः प्रवृत्ताः । वेदान्तशास्त्रे पारलौकिकचिन्तनं यथा, तथैव ऐहलौकिकचिन्तनम् अपि विशेषतः क्रियते । भारतीयं सामान्यं जनजीवनं, साहित्यं, भाषा इत्यादिषु सर्वेषु अपि वेदान्तस्य प्रभावः विशेषतः दृश्यते ।

भारतीयदर्शनानां विकासः

भारतीयदर्शनानां विकासः स्तरत्रये भवति इति वक्तुं शक्नुमः । महात्मा कश्चन ऋषिः परमात्मसाक्षात्कारम् आध्यात्मिकानुभवं वा मन्त्ररूपेण अभिव्यञ्जयति (प्रकटयति) । एषा प्रथमा आविर्भावावस्था । ततः अन्यः

महात्मा गद्यरूपाणि 'सूत्राणि' रचयित्वा, पद्यरूपाः 'कारिकाः' रचयित्वा वा एकां दार्शनिकपद्धतिं प्रतिष्ठापयति । एषा द्वितीयावस्था । ततः एतेषां विवरणं 'वृत्ति-वार्तिकादि'द्वारा प्रचलति । अन्तरार्थग्रहणं, विवरणाधारेण अनुभवद्वारा प्रयोगः, असङ्गतविषयनिवारणम् इत्यादयः अनन्तरकाले प्रचलन्ति । पूर्वपक्ष-सिद्धान्तशैल्या सर्वांशसङ्ग्रहरूपाणि 'भाष्याणि' निर्मितानि भवन्ति । एषा तृतीयावस्था । भाष्यस्य टीकाटिप्पण्यादयः व्याख्यानादयः यदा प्रचलन्ति तदा नूतनाः विचारधाराः अपि दर्शनप्रवाहे समाविष्टाः भवन्ति । एवं कालानुगुणं नूतनांशानां परिग्रहणेन परिवर्धनम् एव भारतीयदर्शनानां वैशिष्ट्यम् ।

सिद्धान्तरूपणसमये एकस्य दर्शनस्य अन्यदर्शनानि पूर्वपक्षाः भवन्ति । एतस्य तात्पर्यम् एतत् न यत् एतत् दर्शनम् अन्यदर्शनानि निन्दति, तिरस्करोति वा इति । यथा - साङ्ख्यदर्शनस्य वेदान्तदर्शनं पूर्वपक्षः । तेन वेदान्तदर्शनस्य मौल्ये न न्यूनता । एवं परमतनिराकरणं केवलं सिद्धान्तस्य स्पष्टतार्थं क्रियते, न तु परमतदूषणार्थम् । विचारस्य उपस्थापनार्थं प्रायः सर्वाणि अपि दर्शनानि न्यायशास्त्रक्रमम् एव अनुसरन्ति ।

यद्यपि दर्शनानां सिद्धान्तेषु मतभेदः अस्ति, तथापि तानि जगतः सत्यत्वम्, जगतः काल-देश-कार्यकारणभावनियतत्वम्, आत्मनः अस्तित्वं, कर्मनियमः, जन्मान्तरप्राप्तिः, संसारः, मोक्षः, प्रमाणानि इत्यादिषु अंशेषु सामान्यचिन्तनं तु कुर्वन्ति एव । एतेषां दर्शनानां कारणतः एव भारतम् इदानीम् अपि जगद्गुरुस्थानम् अर्हति ।

७. संस्कृतग्रन्थकारपरिचयः

सूत्रकाराः

गौतमः - न्यायदर्शनस्य आधारः न्यायसूत्राणि एव । न्यायसूत्राणि गौतमः रचितवान् । गौतमस्य अपरं नाम 'अक्षपादः' इति । वेदाः, उपनिषदः, महाभारतम् इत्यादिषु ग्रन्थेषु यद्यपि तर्कशास्त्रस्य मूलभूताः अंशाः दृश्यन्ते, तथापि तस्य शास्त्रस्य व्यवस्थितं स्वरूपं गौतमेन एव कल्पितम् । गौतमः १५० तमे क्रिस्ताब्दे आसीत् इति भाव्यते । 'प्रभासक्षेत्रे सोमशर्मा नाम ब्राह्मणः आसीत् । तस्य चतुर्षु पुत्रेषु ज्येष्ठः एव गौतमः' इति ब्रह्माण्डपुराणात् ज्ञायते । गौतमेन रचितानां न्यायसूत्राणाम् आधारेण एव न्यायशास्त्रं शाखोपशाखारूपेण प्रवृद्धम् । सर्वशास्त्रकाराः अपि स्वसिद्धान्तस्य

प्रतिपादनार्थं न्यायशास्त्रचिन्तनम् अवलम्बन्ते एव ।

कणादः - इदानीं न्यायशास्त्रं यत् दृश्यते तत् ११ शताब्दात् पूर्वं न्यायदर्शनं वैशेषिकदर्शनं चेति द्विधा विभक्तम् आसीत् । वैशेषिकदर्शनस्य प्रवर्तकः एव कणादः । कणादेन वैशेषिकसूत्राणि रचितानि । एतेषां वैशेषिकसूत्राणाम् आधारेण एव वैशेषिकदर्शनं प्रवृद्धम् ।

'विशेषः' इति पदार्थः कश्चन अङ्गीकृतः इत्यतः एतत् 'वैशेषिकम्' इति उच्यते । साङ्ख्यशास्त्रं प्राचीनम् । ततः एतस्मिन् शास्त्रे विशेषः अस्ति इत्यतः एतत् 'वैशेषिकम्' इति केषाञ्चित् अभिप्रायः ।

कणादः सप्तमशतकात् पूर्वम् आसीत् इति पण्डिताः वदन्ति । क्षेत्रस्थान् कणान् (धान्यानि) सङ्गृह्य एषः अत्ति (खादति) स्म इत्यतः एतस्य नाम 'कणादः' इति जातम् इति कथा प्रसिद्धा । कणादस्य तपसा सन्तुष्टः भगवान् ईश्वरः उलूकरूपेण आगत्य शास्त्रम् उपदिष्टवान् इत्यतः कणाददर्शनम् 'औलूक्यदर्शनम्' इत्यपि प्रसिद्धम् अस्ति । परमाणुः, द्व्यणुकम्, त्र्यणुकम् इत्यादीनि निरूपितानि सन्ति कणादेन ।

जैमिनिः - मीमांसाशास्त्रस्य मूलाधारः मीमांसासूत्राणि । तानि जैमिनि-महर्षिणा विरचितानि । वेदार्थविचारं पुरस्कृत्य प्रवृत्तं शास्त्रं मीमांसाशास्त्रम् । एतत् पूर्वमीमांसाशास्त्रम् इत्यपि उच्यते । (उत्तरमीमांसा नाम वेदान्तशास्त्रम्) जैमिनेः पूर्वम् अपि अनेके सूत्रकाराः आसन् इति जैमिनिग्रन्थात् एव ज्ञायते ।

जैमिनेः कालविषये इदमित्थम् इति कथनं कष्टसाध्यम् एव । जैमिनिः बादरायणस्य अभिप्रायं स्वसूत्रेषु उल्लिखति । बादरायणः अपि तथैव । अतः तौ उभौ अपि समकालीनौ इति कैश्चित् ऊहा क्रियते । कि.श. ८०० जैमिनेः कालः स्यात् इति ऊहा कृता अस्ति । जैमिनेः जीवनविषये अधिकं किमपि न ज्ञायते । भागवतं वदति - 'व्यासः वेदं चतुर्धा विभज्य सामवेदं जैमिनिम् उपदिष्टवान्' इति ।

द्वादशसु अध्यायेषु मीमांसासूत्राणि विभक्तानि सन्ति । वेदार्थस्य स्पष्टज्ञानार्थं यद्यत् आवश्यकं तत्सर्वं निरूपितम् अस्ति अत्र । मीमांसा-सूत्राणाम् आधारेण भाष्याणि, वार्तिकानि, व्याख्यानानि च बहुधा प्रवृत्तानि । मीमांसाभाष्येषु शबरस्वामिभाष्यं सुप्रसिद्धम् ।

बादरायणः - वेदान्तशास्त्रेषु 'प्रस्थानत्रयं' सुविख्यातम् । तानि च प्रस्थानानि - १. उपनिषदः, २. भगवद्गीता, ३. ब्रह्मसूत्राणि चेति । ब्रह्मसूत्राणि

बादरायणेन रचितानि । बादरायणः इति भगवतः वेदव्यासस्य अपरं नाम । उपनिषद्वाक्येषु आपाततः यः विरोधाभासः दृश्यते तं परिहृत्य समन्वयपूर्वकं तत्त्वनिर्णयं करोति ब्रह्मसूत्रकारः । ब्रह्मसूत्राणां रचनायाः अनन्तरम् वेदान्तस्य दर्शनत्वेन मान्यता प्रवृद्धा । दशाधिकानां भाष्याणां प्रवृत्तौ अपि ब्रह्मसूत्राणि एव मूलम् । भाष्यसाहाय्यं विना ब्रह्मसूत्राणाम् अर्थस्य ज्ञानं सर्वथा दुष्करम् ।

बादरायणस्य कालः क्रि.श. ४०० स्यात् इति इतिहासज्ञाः अभिप्रयन्ति । अखण्डं वेदराशिं चतुर्धा विभक्तवान् इत्यतः एतस्य 'वेदव्यासः' इत्यपि नाम जातम् । एतस्य कुलम् एषः श्लोकः विवृणोति –

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

(व्यासः पराशरस्य पुत्रः, शक्तिमहर्षेः पौत्रः । वसिष्ठः व्यासस्य प्रपितामहः, शुकमहर्षिः व्यासस्य पुत्रः ।)

भरतः – अलङ्कारशास्त्रे उपलभ्यमानेषु प्रथमः ग्रन्थः 'नाट्यशास्त्रम्' । एतस्य रचयिता एव भरतमुनिः । नाट्यशास्त्रं यद्यपि प्राधान्येन नाट्यसङ्गीताभिनयान् विवृणोति तथापि तत्र छन्दांसि, रसाः, अलङ्काराश्चापि प्रतिपादिताः एव ।

नाट्यशास्त्रस्य कालः क्रि. पू. २०० – क्रि. श. ३०० मध्ये कदाचित् स्यात् इति विमर्शकाः अभिप्रयन्ति । 'भरतः स्वपुत्रान् नाट्यशास्त्रं, नाट्यप्रयोगान् च बोधितवान्' इति कथा श्रूयते । *'विभावानुभावव्यभिचारि-संयोगात् रसनिष्पत्तिः'* इत्येतस्य नाट्यशास्त्रस्थस्य रससूत्रस्य आधारेण रससम्प्रदायः प्रवृत्तः । नाट्यशास्त्रस्य बहूनि व्याख्यानानि सन्ति । तेषु अभिनवगुप्तस्य 'अभिनवभारती' इति व्याख्यानं सुप्रसिद्धम् । भरतेन केवलं ४ अलङ्काराः निरूपिताः आसन् । इदानीम् अलङ्कारशास्त्रे शताधिकाः अलङ्काराः दृश्यन्ते ।

कोविदः - षष्ठः

प्रश्नाः

I. *एतेषां प्रश्नानाम् उत्तराणि लिखत -*

१. अलङ्काराः कति विधाः ?

२. लुप्तोपमा नाम का ?

३. दर्शनेषु के विचाराः भवन्ति ?

४. जैनबौद्धादीनि दर्शनानि किमर्थं नास्तिकदर्शनानि इति उच्यन्ते ?

II. *अधोलिखितवाक्येषु उपमायाः अंशान् निर्दिशत -*

१. लक्ष्मीः दीपशिखा इव चञ्चला ।

उपमानम् - .... उपमेयम् - ....

वाचकः - .... साधारणधर्मः - ....

२. पण्डितः बृहस्पतिः इव बुद्धिमान् ।

उपमानम् - .... उपमेयम् - ....

वाचकः - .... साधारणधर्मः - ....

३. महाराजः कुबेरवत् धनाढ्यः ।

उपमानम् - .... उपमेयम् - ....

वाचकः - .... साधारणधर्मः - ....

III. *विग्रहं समासनाम च लिखत -*

१. धनमानौ - .... - ....

२. निषधदेशः - .... - ....

३. देशाधिपः - .... - ....

४. हंसश्रेष्ठः - .... - ....

५. उपसिंहम् - .... - ....

(**Note:** Answers for the above exercises are given in the end of this book. (PNO - 261) After completing the exercises check your answers.)

कोविदः - सप्तमः पाठः

।। यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः ।।

Whatever the best of men does, others also do.

१. समासः

In the previous six lessons we have given an outline of compounds in Samskrit. In this lesson you will learn how to identify compound words.

These are two ways of identifying a compound. 1. Some compounds can be identified by seeing the words that have been compounded. 2. Another method is by examining the meaning of the words compounded.

1. Examining the words compounded

1. A Samasa in which the former word is an अव्यय, is called अव्ययीभावसमासः ।
2. When a संख्यावाचक is the former word and the compound refers to a group it is called द्विगुसमासः ।
3. A conjunctive compound (चार्थे समासः) is called इतरेतरद्वन्द्वः । A conjunctive compound that also denotes a collection or group is called समाहारद्वन्द्वः ।
4. If the two words compounded are in the same विभक्ति and the latter word is predominant in the समास it is a कर्मधारयसमास ।
5. If the two words compounded are in different विभक्ति and the latter word is predominant in the compound, it is a तत्पुरुषसमासः ।

6. If a word outside the compound is predominant it is called बहुव्रीहिः ।

[Note: There are exceptions to these general rules of Samasa.]

2. An Examining the meaning of the compoundwords.

There is a statement 'अर्थवत् समासः' which means that a compound is in accordance with its sense. Therefore a compound is identified after carefully examining its sense. Whether Tatpurusha, Karmadharaya or Bahuvrihi, it is only by examining the sense of the compound word that the compound is designated. The same compound word may be designated differently by dissolving the word in different ways to give different senses.

Thus the compound is decisively named according to the sense. Observe how the same compound word takes different names because of difference in the meaning, in the following illustrations.

(अ) मारुतिः रामदासः अस्ति । - Anjaneya is Rama's servant.
रामस्य दासः = रामदासः - the compound is dissolved as षष्ठीतत्पुरुष ।

(आ) रमेशः इति कश्चनः धनिकः । सः रामदासः ।
There is a rich man by name Ramesha. He has a servant by name Rama.
The विग्रहवाक्य is रामः दासः यस्य सः - रामदासः Here the compound is dissolved in the sense of बहुव्रीहिः ।
Thus the same compound word रामदासः is differently dissolved depending on the meaning and as a result gets different names.
Here are some more examples where in the same word is dissolved differently depending on the meaning intended.

१. (अ) पीताम्बरं विष्णुं नमस्कुरु ।
Bow to Vishnu who is wearing yellow garment.
(पीतम् अम्बरं यस्य सः, तम् - पीताम्बरम्)

(आ) मम पीताम्बरं न दृश्यते ।

My yellow dress is not to be seen.

(पीतं च तत् अम्बरं च - पीताम्बरम्)

In the first sentence above पीताम्बरम् is बहुव्रीहिसमासः because it is an adjective of विष्णुम् and hence an अन्यपदार्थप्रधानसमासः । In the second sentence it is उत्तरपदार्थप्रधान and therefore कर्मधारय ।

२. (अ) मातापित्रोः सेवां यः न करोति सः अपुत्रः ।

One who does not take care of his parents, is no son.

(न पुत्रः - no son - अपुत्रः)

(आ) राजा दशरथः अपुत्रः आसीत् ।

King Dasharatha was childless.

(न विद्यते पुत्रः यस्य सः - childless = अपुत्रः)

The compound word अपुत्रः is नञ्तत्पुरुष in the former sentences and in the latter it is नञ्बहुव्रीहिः । न पुत्रः - अपुत्रः is उत्तरपदार्थप्रधानः and न विद्यते पुत्रः यस्य सः - अपुत्रः is an adjective of दशरथः and hence अन्यपदार्थप्रधानः ।

३. (अ) रामः दीर्घबाहुः आसीत् ।

Rama was one with long arms.

(दीर्घौ बाहू यस्य सः - दीर्घबाहुः- one with long arms - बहुव्रीहिः)

(आ) व्याधः दीर्घबाहुना पक्षिशावकं गृहीतवान् ।

The hunter caught the young one of the bird with his long arms.

(दीर्घः बाहुः, तेन - दीर्घबाहुना - with a long arm

- विशेषणपूर्वपदकर्मधारयः)

४. (अ) विशालगृहे दश कर्मकराः कार्यं कुर्वन्ति ।

In the big house ten servants work.

(विशालं गृहम्, तस्मिन् - विशालगृहम् - In a big house

- विशेषणपूर्वपदकर्मधारयः)

(आ) विशालगृहः धनिकः सुखेन जीवति ।
A rich man with a large mansion lives happily.
(विशालं गृहं यस्य सः - विशालगृहः - One who has a large mansion - बहुव्रीहिः)

५. (अ) सः असन्तोषं प्राप्तवान् ।
He got disappointed.
(न सन्तोषः - असन्तोषः, तम् - असन्तोषम् - disappointment - नञ्तत्पुरुषः)

(आ) असन्तोषः धनिकः निद्रां न प्राप्नोति ।
A dissatisfied rich man does not get sleep.
न विद्यते सन्तोषः यस्य सः – असन्तोषः - One who has no satisfaction - बहुव्रीहिः)

२. विशेषविषयाः

अलङ्काराः

२. रूपकालङ्कारः (Metaphor)

When there is non-difference between Upamana and Upameya it is Rupaka. It does not, like simile, state that one thing is like another, but takes that for granted and proceeds to say that the two things are not different at all.

Eg. * मुखचन्द्रः - Moon-face
* अयं राजा परमेश्वरः । - This king is the Supreme Lord.
* अहं देवस्य पादाम्बुजं नमामि । - I bow to the lotus-feet of God.
* रामस्य मुखचन्द्रं दृष्ट्वा प्रजाः सन्तुष्टाः । - Seeing the moon face of Rama, subjects were happy.

In all these examples identity between उपमान and उपमेय - i.e., face and moon, king and Lord, feet and lotus flower is mentioned. Therefore it is called Rupakalankara.

Here are some more examples of metaphor.

१. तस्याः **करकिसलयः** कोमलः । (करः एव किसलयः)
The shoot in the form of her hand, is tender.

२. अहं **वचनकुसुमैः** अर्चयामि । (वचनानि एव कुसुमानि)
I am worshipping with the flowers in the form of words.

३. तत् **वदनसरोजं** पश्य । (वदनम् एव सरोजम्)
See that lotus in the form of the face.

४. **इयं लक्ष्मीः** अस्ति । (इयम् एव लक्ष्मीः)
She is verily the goddess of wealth.

५. **मनोभित्तौ** तत् चित्रम् अद्यापि अस्ति । (मनः एव भित्तिः)
That picture is still there on the mind - screen (literally - wall).

६. **पुण्यसूत्रम्** अवलम्ब्य जीव । (पुण्यम् एव सूत्रम्)
Live with the support of the string of punya (principles of Dharma).

७. सः **सेवाव्रतम्** आचरति । (सेवा एव व्रतम्)
He observes the vow of service.

३. अतिशयोक्तिः (Hyperbole)

Here the **उपमेय** is swallowed by the **उपमान** । ie. Without explicitly stating the Upameya only the upamana is mentioned.

Eg. * पश्य नीलोत्पलद्वन्द्वम् ।

(Pointing to the beautiful eyes of a maiden it is stated - 'Look at the pair of blue lotuses')

* सिंहः आगच्छन् अस्ति ।

(Seeing a brave man coming, one says – 'A lion is coming'.)

In the above instances the objects compared (उपमेय) namely eyes and brave man are not mentioned at all and only the objects compared to (उपमान) namely blue lotuses and lion are mentioned. Hence it is अतिशयोक्तिः ।

Here are some examples of अतिशयोक्तिः –

१. तत्र गजः याति ।
(Referring to an obese person) ' There an elephant is going !'

२. व्याघ्रं मा कोपय ।
(Referring to a cruel man) 'Do not provoke the tiger'.

३. तिमिङ्गिलस्यास्य तृप्तिः एव नास्ति ।
(Referring to a person who accepts bribes) ' This whale is never satisfied.'

४. शरोऽयं भवन्तम् एव लक्ष्यीकृत्य प्रयुक्तः ।
The arrow (in the form of words) was aimed at you.

५. कर्णेन दत्तम् एतत् ।
(Referring to a benevolent man) This was given by Karna.

४. अर्थान्तरन्यासः (Arthantaranyasa Alankara)

When a particular statement is justified by a general statement or vice-versa it is Arthantaranyasa.

Eg. हनुमान् अब्धिम् अतरत् । दुष्करं किं महात्मनाम् ?
Hanuman crossed the ocean. What is impossible for great men ?

Here a particular statement - Hanuman crossed the ocean - is justified by a general statement - What is impossible for greatmen.

See another example -

गुणवज्जनसंसर्गात् याति नीचोऽपि गौरवम् ।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते ।।

Even a mean person is respected if he is in the company of meritorious people. The thread used in making a garland, is put on the head. Here a general statement (first sentence) is justfied by the particular statement (second sentence).

A few more examples -

१. अगस्त्यः समुद्रम् अपिबत् । किम् असाध्यं महात्मनाम् ?
Sage Agastya drank the ocean. What is impossible for great men ?

२. भ्रष्टः सः आरक्षकैः गृहीतः । लवणं पीतवान् जलं पिबेत् एव !
That criminal was caught by the police. One who eats salt must necessarily drink water !

३. जनकः अष्टावक्रं सत्कृतवान् । महात्मानः खलु गुणग्राहिणः ।
Janaka extended his hospitality to Ashtavakra. After all, great people appreciate the merit of others !

४. बहूनामप्यसाराणां संहतिः कार्यसाधिका ।
तृणैरारभ्यते रज्जुः तया नागोऽपि बध्यते ।।
A group of many week men can achieve something. A rope is made of straw and it can bind an elephant also !

५. निधिप्राप्त्या निर्धनः धनिकः अभूत् । दैवम् अनुकूलं चेत् किं न साध्यते ?
The poorman became rich because he found a treasure. If luck is favourable anything is possible. (literally - what is not possible ?)

५. **श्लेषालङ्कारः** (Pun)

If a word in a sentence is capable of yielding more than one meaning in the same context, it is Slesha Alankara.

Eg. १. **कादम्बरी**रसज्ञानाम् आहारोऽपि न रोचते ।

Those who taste the sentiments of Kadambari (a famous work of Bana) do not want even food.

Here the word कादम्बरी has another meaning - 'Liquor'. So the sentence also means - Those who taste liquor do not like food.

२. **माघे मेघे** गतं **वयः** ।

Here माघः means the month called Magha and the work of poet Magha, मेघः means cloud and the work of Kalidasa 'मेघदूतम्' । वयः means bird and life span.

So the sentence conveys two meanings

1. A bird passed through the cloud in the month of Magha.

2. Whole life was spent in the study of Magha Kavya and Meghaduta Kavya.

Some more examples for Pun (श्लेषः) are as follows -

१. **सर्वदो माधवः** रक्षतु ।

सर्वदोमाधवः can be split as सर्वदा उमाधवः when it means 'May the lord of Uma (Shiva) protect (you) always. When split as सर्वदः माधवः the meaning will be - May Madhava (Vishnu - the lord of Lakshmi 'Ma') who bestows everything, (सर्वदः) protect (You).

२. **राजा मृदुलैः करैः** जनानां हृदयं हरति ।

There is pun on the words राजा and करैः ।

Thus the sentence is capable of yielding two meanings -

1. The Moon (राजा) with gentle rays (मृदुलैः करैः) - captivates the hearts of people.
2. The king captivates the heart of people by levying less taxes (मृदुलैः करैः).

३. **नीलकण्ठो** विराजते ।

1. Lord Shiva whose neck is blue (on account of the poison he has drunk), is shining.
2. The Peacock (नीलकण्ठः - whose neck is blue) is looking beautiful.

४. **वृद्धिं** को वा न वाञ्छति ?

1. Who does not want growth (वृद्धिः) ?
2. Who does not want interest (वृद्धिः) ?

५. **माधवं** सेवते लोकः ।

1. People worship Madhava, Vishnu.
2. People like Spring (माधवः - वसन्तऋतुः)

अभ्यासः

I. *संयोज्य लिखत ।*

अ	आ
१. संख्यावाचकपूर्वपदः समाहारः च	अ. इतरेतरद्वन्द्वः
२. अन्यपदार्थप्रधानः	आ. अव्ययीभावः
३. समानविभक्तिः, उत्तरपदप्राधान्यं च	इ. द्विगुः
४. असमानविभक्तिः उत्तरपदप्राधान्यं च	ई. समाहारद्वन्द्वः
५. चार्थस्य प्रतीतिः	उ. तत्पुरुषः
६. चार्थस्य प्रतीतिः, समाहारश्च	ऊ. बहुव्रीहिः
७. अव्ययस्य पूर्वपदत्वम्	ऋ. कर्मधारयः

II. *विग्रहवाक्यं दृष्ट्वा समासनाम लिखत ।*

१. अपुत्रः - (अ) न पुत्रः - ....
(आ) न विद्यते पुत्रः यस्य सः - ....

२. अनश्वः - (अ) न विद्यते अश्वः यस्य सः - ....
(आ) न अश्वः - ....

३. श्वेतवस्त्रम् - (अ) श्वेतं वस्त्रं यस्य तत् - ....
(आ) श्वेतं वस्त्रम् - ....

४. देवपूज्यः - (अ) देवः पूज्यः यस्य सः - ....
(आ) देवैः पूज्यः - ....

५. श्वेतकेशाः - (अ) श्वेताः केशाः येषां ते - ....
(आ) श्वेताः केशाः - ....

III. *यथासूचनं कुरुत ।*

(अ) सुजनो न याति विकृतिं परहितनिरतो विनाशकालेऽपि ।
छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य ॥
अत्र सामान्यः कः ? विशेषः कः ? केन कस्य समर्थनं कृतम् ?

(आ) पादकमलम् - इत्यत्र उपमानं किम् ? उपमेयं किम् ?
कयोः अभेदः अत्र वर्णितः ?

(इ) माधवं सेवते लोकः । - अत्र कस्मिन् अंशे श्लेषः अस्ति ?
श्लेषविशिष्टस्य पदस्य अर्थद्वयं किम् ?

IV. *योजयत ।*

अ	आ
१. सप्तमीतत्पुरुषः	अ. रामलक्ष्मणौ
२. कर्मधारयः	आ. लम्बोदरः (गणेशः)
३. इतरेतरद्वन्द्वः	इ. उपवृक्षम्
४. समाहारद्वन्द्वः	ई. अहिंसा
५. द्विगुः	उ. सुन्दरभवनम्
६. बहुव्रीहिः	ऊ. कुम्भकारः
७. अव्ययीभावः	ऋ. स्पष्टीकृत्य
८. नञ्तत्पुरुषः	ऌ. दाने शूरः
९. उपपदसमासः	ए. पञ्चवटी
१०. गतिसमासः	ऐ. दासीदासम्

(**Note:** Answers for the above exercises are given in the end of this book. (PNO - 262) After completing the exercises check your answers.)

३. सुभाषितानि

१३. दूरीकरोति दुरितं विमलीकरोति
चेतश्चिरन्तनमघं चुलुकीकरोति
भूतेषु किञ्च करुणां बहुलीकरोति
सत्सङ्गतिः कथय किं न करोति पुंसाम् ।

पदविभागः

दूरीकरोति, दुरितम्, विमलीकरोति, चेतः, चिरन्तनम्, अघम्, चुलुकीकरोति, भूतेषु, किम्, च, करुणाम्, बहुलीकरोति, सत्सङ्गतिः, कथय, किम्, न, करोति, पुंसाम् ।

अन्वयः

(सत्सङ्गतिः) दुरितं दूरीकरोति, चेतः विमलीकरोति, चिरन्तनम् अघं चुलुकीकरोति, किं च भूतेषु करुणां बहुलीकरोति, कथय, सत्सङ्गतिः पुंसां किं न करोति ?

अन्वयार्थः

(सत्सङ्गतिः = सज्जनानां सहवासः) दुरितं = पापकृत्यं, दूरीकरोति = निवारयति, चेतः = मनः, विमलीकरोति = स्वच्छं करोति, चिरन्तनं = पुरातनम्, अघं = पापं, चुलुकीकरोति = न्यूनीकरोति, किं च = अपि च, भूतेषु = प्राणिषु, करुणां = दयां, बहुलीकरोति = अधिकां करोति, कथय = वद, सत्सङ्गतिः = सज्जनानां सहवासः, पुंसां = पुरुषाणां, किं न करोति ? = (अन्यत्) किं न साधयति ?

तात्पर्यम्

लोके सर्वेषां जनानां स्नेहिताः भवन्ति एव । तेषु स्नेहितेषु सज्जनानां संख्या तु न्यूना एव । यतः स्वार्थपराः एव अधिकाः सन्ति लोके । तथापि अस्माभिः सज्जनानां सहवासः एव करणीयः इति वदन् सुभाषितकारः तत्र कारणमपि वदति - सज्जनानां सहवासेन पुरुषाणां मनसि स्थिताः दुष्टाः विचाराः दूरं गच्छन्ति । मनः शुद्धं भवति । पुरा कृतं पापमपि भस्म भवति । अपि च प्राणिनां विषये दया अधिका भवति । अतः सज्जनानां स्नेहः मनुष्याणां किं वा न करोति ? अर्थात् सर्वविधानि मङ्गलानि अपि जनयति ।

१४. किं चन्द्रमाः प्रत्युपकारलिप्सया
करोति गोभिः कुमुदावबोधम् ।
स्वभाव एवोन्नतचेतसां सतां
परोपकारव्यसनं हि जीवितम् ।

पदविभागः

किम्, चन्द्रमाः, प्रत्युपकारलिप्सया, करोति, गोभिः, कुमुदावबोधम्, स्वभावः, एव, उन्नतचेतसाम्, सताम्, परोपकारव्यसनम्, हि, जीवितम् ।

अन्वयः

चन्द्रमाः गोभिः कुमुदावबोधं प्रत्युपकारलिप्सया करोति किम् ? उन्नतचेतसां सतां स्वभावः एव (सः) । तेषां जीवितं परोपकारव्यसनं हि ।

अन्वयार्थः

चन्द्रमाः = चन्द्रः, गोभिः = किरणैः, कुमुदावबोधं = कुमुदपुष्पाणां विकासनं, प्रत्युपकारलिप्सया = प्रत्युपकारं प्राप्तुम् इच्छन्, करोति किम् ? उन्नतचेतसां = उदारचित्तानां, सतां = सत्पुरुषाणां, स्वभावः एव (सः) । (तेषां) जीवितं = जीवनं, परोपकारव्यसनं हि = परोपकाररूपेण व्यसनेन युक्तमेव भवति किल ।

तात्पर्यम्

चन्द्रः स्वकिरणैः कुमुदपुष्पाणि विकासयति । किन्तु 'एतानि कुमुदपुष्पाणि मम प्रत्युपकारं कुर्वन्तु' इति इच्छा तस्य मनसि कदापि न भवति । स तु अतीवसहजरूपेण तत् कार्यं करोति । एतादृशः परोपकारः उदारचित्तानां महात्मनां स्वभावः एव भवति । परोपकाररूपं व्यसनं सर्वदा तेषां जीवने भवति एव । कस्माच्चिदपि प्रत्युपकारस्य निरीक्षाम् अकृत्वा एव ते स्वभावसहजया प्रवृत्त्या सर्वेषाम् अपि उपकारं कुर्वन्ति ।

४. काव्यकथा

उपवनात्[1] प्रस्थितः हंसः विदर्भदेशं प्राप्तवान् । राजधान्यां कुण्डिनपुरे सः एकम् उद्यानं गतवान् । तत्र एव दमयन्ती सखीभिः सह आगतवती । सुवर्णहंसं दृष्ट्वा दमयन्ती आश्चर्यान्विता अभवत् । 'कोलाहलः न कर्तव्यः' इति सा सखीः सूचितवती । ततः एकाकिनी एव सा तं ग्रहीतुम् उद्युक्ता । हंसः अपि दमयन्तीं बहुदूरम् अनयत् । एकान्ते हंसदमयन्त्योः सम्भाषणम् आरब्धम् ।

हंसेन उक्तम् - 'अहं सामान्यः हंसः न । मां बन्धुं सः नलः एकः एव समर्थः । नलः विद्यावान्, रूपवान्, गुणवान् च' इति । एवं नानाप्रकारैः नलमहाराजं वर्णयित्वा नलस्य विषये दमयन्त्याः भावं ज्ञात्वा सः - 'नलः अपि भवतीम् इच्छति' इति उक्तवान् । तदा दमयन्ती नलं मनसा स्वीकृत-वती ।

तया उक्तम् - ''हंस ! मम जीवनम् एव समर्पयितुम् अहं सिद्धा । मदीयम्

---

1. from the garden

अनुरागभावं नलाय निवेदय'' इति । हंसः अपि शीघ्रं विदर्भदेशं परित्यज्य पुनः निषधदेशं प्राप्तवान् ।

हंसस्य निर्गमनात् अनन्तरं दमयन्ती प्रासादं[2] गता । सा मनसि नलम् एव चिन्तयन्ती बहु दुःखिता अभवत् । मन्मथबाधा आरब्धा । सा सर्वत्र नलमहाराजम् एव पश्यति स्म । रात्रौ चन्द्रकिरणेषु सत्सु अपि विरहतापेन पीडिता भवति स्म । एवं बहुप्रकारैः विरहपीडिता सती सा शरीरेण अपि कृशा, पाण्डुरा[3] च जाता ।

एतादृशीम् अवस्थां प्राप्तवतीं दमयन्तीं विलोक्य भीमराजस्य वैद्यः, अमात्यः[4] च राजानम् उक्तवन्तौ - ''राजन् ! तव पुत्र्याः विवाहमहोत्सवं स्वयंवरपद्धत्या निर्वर्तय[5]'' इति । भीमराजः अपि स्वयंवरं कर्तुं निश्चितवान् । अतः सः सर्वेभ्यः स्वयंवरस्य आह्वानं प्रेषितवान् ।

इयं वार्ता देवलोकम् अपि प्राप्ता । नारदः इमां वार्तां श्रुत्वा अमरावतीं[6] गतवान् । तेन सह पर्वतः नाम ऋषिः अपि आसीत् । तौ उभौ अपि इन्द्रसभां गतवन्तौ । सभाजनाः सर्वे अपि उत्थाय[7] गौरवं दर्शितवन्तः । कुशल-सम्भाषणम् आरब्धम् ।

इन्द्रः पृष्टवान् - ''नारदमहर्षे ! आत्मीयानां सहवासेन आनन्दः भवति । पुण्यवन्तः नृपाः पूर्वं स्वर्गम् आगच्छन्ति स्म, गच्छन्ति स्म च । सम्प्रति राजानः अत्र न आगच्छन्ति । इदानीं नलशासनकालः[8] । किमर्थं राज्ञां गमनागमनं[9] नास्ति ?'' इति ।

नारदेन उक्तम् - ''महेन्द्र ! यागशतेन इन्द्रपदवी लभ्यते किल ? राजानः पूर्वं यागान् अनुष्ठाय लब्धपुण्याः इह आगच्छन्ति स्म । इदानीं भूमौ भीमराजस्य पुत्री दमयन्ती अनुपमा सुन्दरी अस्ति । सर्वे राजानः तस्यां साभिलाषाः स्वर्गं न आयान्ति'' इति ।

नारदस्य इदं वचनं श्रुत्वा इन्द्रादयः देवाः बहु सन्तुष्टाः । ते अपि दमयन्तीम् अभिलषन्तः भूमिम् आगन्तुम् उत्सुकाः अभवन् । दमयन्ती-सौन्दर्यविषयं श्रुत्वा अप्सरसः लज्जिताः अभवन् । ततः इन्द्रादयः अष्ट

---

2. towards the palace (mansion), 3. pale, 4. minister, 5. (you) perform, 6. city of Indra, 7. after getting up (having got up), 8. Nala's regime, 9. coming and going (frequent visits)

दिक्पालकाः दमयन्तीं वशीकर्तुं भूमिं प्रति प्रस्थिताः । मार्गे नैषधः नलमहाराजः मिलितः । देवाः तं दृष्ट्वा स्वकीयं सौन्दर्यम् अनिन्दन् । सर्वे स्वीयपरिचयम् अवदन् । इन्द्रः नलं प्रार्थितवान् - "महाराज ! भवान् अस्माकं दूतकार्यं करोतु । दमयन्तीम् अस्माकम् इच्छां निवेदयतु" इति । नलः एतत् अङ्गीकृत्य मायाशरीरेण दमयन्तीसमीपं गतवान् ।

प्रश्नाः

१. विदर्भदेशस्य राजधानी का ?
२. दमयन्ती किमर्थं कृशा जाता ?
३. विवाहः कथं निर्वर्तनीयः इति मन्त्रिणः अवदन् ?
४. दमयन्त्याः स्वयंवरवार्तां श्रुत्वा नारदः कुत्र गतवान् ?
५. नलः कथं कुत्र गतवान् ?

५. श्लोकेषु अन्वयक्रमः

१३. अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् ।
भूयः स भूतेश्वरपार्श्ववर्ती किञ्चिद्विहस्यार्थपतिं बभाषे ।।

पदविभागः

अथ[1], अन्धकारम्[2], गिरिगह्वराणाम्[3], दंष्ट्रामयूखैः[4], शकलानि[5], कुर्वन्[6], भूयः[7], सः[8], भूतेश्वरपार्श्ववर्ती[9], किञ्चित्[10], विहस्य[11], अर्थपतिम्[12], बभाषे[13], ।।

अन्वयः

अथ भूतेश्वरपार्श्ववर्ती सः गिरिगह्वराणाम् अन्धकारं दंष्ट्राममूखैः शकलानि कुर्वन्, किञ्चित् विहस्य अर्थपतिं भूयः बभाषे ।

प्रतिपदार्थः

अथ = Then, सः = he (the lion), भूतेश्वरपार्श्ववर्ती = the attendant of Shiva, शकलानि कुर्वन् = breaking into pieces, अन्धकारम् = the darkness, गिरिगह्वराणाम् = of the caves of the mountain, दंष्ट्रामयूखैः = with the rays of his teeth (and), किञ्चित् विहस्य = smiling a little, बभाषे = spoke, भूयः = again, अर्थपतिम् = to the king.

तात्पर्यम्

दिलीपः यदा 'मदीयं जीवं दत्त्वा धेनुं रक्षामि' इति सूचितवान्, तदा तस्य वचनं श्रुत्वा सिंहः अहसत् । यदा सः हसितवान् तदा तस्य दंष्ट्राणां प्रभा प्रसृता अभवत् । सा प्रभा गिरेः गुहानाम् अन्धकारं सर्वं चूर्णीकुर्वती इव भासते स्म । ततः सिंहः किञ्चित् हसित्वा उक्तवान् ।

अन्वयरचना

बभाषे - उक्तवान् - *क्रियापदम्*
कः बभाषे ? - सः
कीदृशः सः ? - भूतेश्वरपार्श्ववर्ती
पुनः कीदृशः ? - कुर्वन्
किं कुर्वन् ? - शकलानि कुर्वन्
कं शकलानि कुर्वन् ? - अन्धकारम्
केषाम् अन्धकारम् ? - गिरिगह्वराणाम्
कैः कुर्वन् ? - दंष्ट्रामयूखैः
किं कृत्वा बभाषे ? - विहस्य
कथं विहस्य ? - किञ्चित्
कदा बभाषे ? - भूयः
कम् उद्दिश्य बभाषे ? - अर्थपतिम्

विशेषः

अ) पदविवरणम्

1. अव्ययम् 'अथ'
2. अ. 'अन्धकार'शब्दः, पु. द्वि.वि. ए.व.
3. अ. 'गिरिगह्वर'शब्दः, न. ष.वि. ब.व.
4. अ. 'दंष्ट्रामयूख'शब्दः, पु. तृ.वि. ब.व.
5. अ. 'शकल'शब्दः, न. द्वि.वि. ब.व.
6. त. 'कुर्वत्'शब्दः, पु. प्र.वि. ए.व.
7. अव्ययम् 'भूयः'

8. द. 'तद्'शब्दः, पु. प्र.वि. ए.व.
9. न. 'भूतेश्वरपार्श्ववर्तिन्'शब्दः, पु. प्र.वि. ए.व.
10. अव्ययम् 'किञ्चित्'
11. अव्ययम् 'विहस्य' (वि + 'हस्'धातुः + ल्यप्प्रत्ययः)
12. इ. 'अर्थपति'शब्दः, पु. द्वि.वि. ए.व.
13. 'भाष्'धातुः, आ.प. भूत.(लिट्) प्र.पु. ए.व.

आ) समासः

१. गिरेः गह्वराणि - गिरिगह्वराणि, तेषाम् - षष्ठीतत्पुरुषः
२. दंष्ट्राणां मयूखाः, तैः - षष्ठीतत्पुरुषः

१४. एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम् ।।

पदविभागः

एकातपत्रम्[1], जगतः[2], प्रभुत्वम्[3], नवम्[4], वयः[5], कान्तम्[6], इदम्[7], वपुः[8], च[9], अल्पस्य[10], हेतोः[11], बहु[12], हातुम्[13], इच्छन्[14], विचारमूढः[15], प्रतिभासि[16], मे[17], त्वम्[18] ।

अन्वयः

एकातपत्रं जगतः प्रभुत्वं, नवं वयः, इदं कान्तं वपुः च (तव अस्ति) ।
अल्पस्य हेतोः बहु हातुम् इच्छन् त्वं मे विचारमूढः प्रतिभासि ।

प्रतिपदार्थः

(You have) प्रभुत्वं = sovereignty, जगतः = over the (whole) world, एकातपत्रम् = (coming) under one umbrella, नवं वयः = fresh youth, च = and, इदं = this, कान्तम् = attractive, वपुः = body. बहु हातुम् इच्छन् - Willing to give up a lot, अल्पस्य = for a small, हेतोः = reason, त्वं = you, प्रतिभासि = seem, मे = to me, विचारमूढः = to be a person lacking in reasoning power.

तात्पर्यम्

राजन् ! त्वं विचारं कर्तुम् असमर्थः । मूढः इवाचरसि । यतो हि, त्वं लघुभूतायाः धेनोः कारणात् आत्मनः शरीरं, राज्यं, सम्पत्, प्रभुत्वं इत्यादिकं सर्वं त्यक्तुम् इच्छसि किल । अतः त्वं मूढः इति मे मतिः ।

अन्वयरचना

(अस्ति)

किम् अस्ति - प्रभुत्वम्

कीदृशं प्रभुत्वम् ? - एकातपत्रम्

कस्य प्रभुत्वम् ? - जगतः

पुनः किम् अस्ति ? - वयः

कीदृशं वयः ? - नवम्

पुनः किम् अस्ति ? - वपुः

कीदृशं वपुः ? - इदम्

पुनः कीदृशम् ? - कान्तम्

प्रतिभासि ? - लक्ष्यसे - *क्रियापदम्*

कः ? - त्वम्

कीदृशः प्रति भासि ? - विचारमूढः

कस्मै प्रतिभासि ? - मे

कथं भूतः त्वम् ? - इच्छन्

किं कर्तुम् इच्छन् ? - हातुम्

किं हातुम् ? - बहु

कस्य हेतोः ? - अल्पस्य

विशेषः

अ) पदविवरणम्

1. अ. 'एकातपत्र'शब्दः, न. प्र.वि. ए.व.
2. त. 'जगत्'शब्दः, न. ष.वि. ए.व.
3. अ. 'प्रभुत्व'शब्दः, न. प्र.वि. ए.व.
4. अ. 'नव'शब्दः, न. प्र.वि. ए.व.
5. स. 'वयस्'शब्दः, न. प्र.वि. ए.व.
6. अ. 'कान्त'शब्दः, न. प्र.वि. ए.व.
7. म. 'इदम्'शब्दः, न. प्र.वि. ए.व.
8. स. 'वपुस्'शब्दः, न. प्र.वि. ए.व.
9. अव्ययम् 'च'

10. अ. 'अल्प'शब्दः, पु. ष.वि. ए.व.
11. उ. 'हेतु'शब्दः, पु. ष.वि. ए.व.
12. उ. 'बहु'शब्दः, न. द्वि.वि. ए.व.
13. अव्ययम् (प्र) 'हातुम्' ('हा'धातुः तुमुन्प्रत्ययः)
14. त. 'इच्छत्'शब्दः, पु. प्र.वि. ए.व.
15. अ. 'विचारमूढ'शब्दः, पु. प्र.वि. ए.व.
16. 'प्रति'-उपसर्गपूर्वकः 'भा'धातुः, प.प. वर्त(लट्), म.पु. ए.व.
17. द. 'अस्मद्'शब्दः, त्रि. ष.वि. ए.व.
18. द. 'युष्मद्'शब्दः, त्रि. प्र.वि. ए.व.

आ) समासः

१. एकम् आतपत्रम् यस्मिन् तत् एकातपत्रम् - बहुव्रीहिः
२. विचारे मूढः विचारमूढः - सप्तमीतत्पुरुषः

**१५. भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदन्ते ।
जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ।।**

पदविभागः

भूतानुकम्पा[1], तव[2], चेत्[3], इयम्[4], गौः[5], एका[6], भवेत्[7], स्वस्तिमती[8], त्वदन्ते[9], जीवन्[10], पुनः[11], शश्वत्[12], उपप्लवेभ्यः[13], प्रजाः[14], प्रजानाथ[15], पिता[16], इव[17], पासि[18] ।।

अन्वयः

तव भूतानुकम्पा अस्ति चेत्, त्वदन्ते इयम् एका गौः स्वस्तिमती भवेत् । प्रजानाथ ! जीवन् पुनः पिता इव प्रजाः शश्वत् उपप्लवेभ्यः पासि ।

प्रतिपदार्थः

तव अस्ति चेत् = If you have, भूतानुकम्पा = compassion for beings (and you save the life of this one cow by sacrificing your own), त्वदन्ते = after your death, इयम् एका गौः = only this one cow, स्वस्तिमती भवेत् = will remain safe. प्रजानाथ ! = Oh Lord of the people ! जीवन् पुनः = (on the other hand) by staying alive, पासि = you will protect, प्रजाः = the people, उपप्लवेभ्यः = from calamities, शश्वत् = for ever, पिता इव = like a father.

तात्पर्यम्

हे राजन् । यदि त्वं भूतदयां प्रदर्श्य धेनुं रक्षितुं प्रयत्नं करोषि तर्हि सः प्रयत्नोऽपि युक्तिहीनः । यदि त्वम् आत्मनः जीवं दत्त्वा धेनुं रक्षसि तर्हि तव मरणानन्तरम् इयम् एका गौः क्षेमेण जीवति । यदि त्वं जीवसि तर्हि अनेकाः प्रजाः रक्षसि । स्वकीयप्राणैः एकस्याः धेनोः रक्षणम् उचितम्, उत जीवता त्वया कोटिशः जनानां रक्षणम् उचितम् ? अत्र युक्तं किम् ? त्वमेव चिन्तय ।

अन्वयरचना

(अस्ति) चेत् - *क्रियापदम् (अध्याहारः)*
का ? - भूतानुकम्पा
कस्य भूतानुकम्पा ? - तव
भवेत् - *क्रियापदम्*
का भवेत् ? - गौः
कीदृशी ? - इयम्
पुनः कीदृशी ? - एका
कीदृशी भवेत् ? - स्वस्तिमती
कदा भवेत् ? - त्वदन्ते
प्रजानाथ ! = राजन् !
पासि - रक्षसि - *क्रियापदम्*
कः ? - (त्वम्)
कीदृशः त्वम् ? - जीवन्
काः पासि ? - प्रजाः
कः इव पासि ? - पिता इव
कदा पासि ? - शश्वत्
केभ्यः पासि ? - उपप्लवेभ्यः

विशेषः

अ) पदविवरणम्

1. आ. 'भूतानुकम्पा'शब्दः, स्त्री. प्र.वि. ए.व.
2. द. 'युष्मद्'शब्दः, त्रि, ष.वि. ए.व.

3. अव्ययम् 'चेत्'
4. म. 'इदम्'शब्दः, स्त्री. प्र.वि. ए.व.
5. ओ. 'गो'शब्दः, स्त्री. प्र.वि. ए.व.
6. आ. 'एका'शब्दः, स्त्री. प्र.वि. ए.व.
7. 'भू'धातुः प.प. *सम्भावना (लिङ्), प्र.पु. ए.व.
8. ई. 'स्वस्तिमती'शब्दः, स्त्री. प्र.वि. ए.व.
9. अ. 'त्वदन्त'शब्दः, न. स.वि. ए.व.
10. त. 'जीवत्'शब्दः, पु. प्र.वि. ए.व.
11. अव्ययम् 'पुनः'
12. अव्ययम् 'शश्वत्'
13. अ. 'उपप्लव'शब्दः, पु. पं.वि. ब.व.
5. त. 'उत्पश्यत्'शब्दः, पु. ष.वि. ए.व.
6. अ. 'सिंहनिपात'शब्दः, पु. द्वि.वि. ए.व.
7. अ. 'उग्र'शब्दः, पु. द्वि.वि. ए.व.
8. अ. 'अवाङ्मुख'शब्दः, पु. ष.वि. ए.व.
9. अव्ययम् 'उपरि'
10. इ. 'पुष्पवृष्टि'शब्दः, स्त्री. प्र.वि. ए.व.
11. 'पत्ऌ'धातुः प.प. भूत.(लिट्) प्र.पु. ए.व.
12. आ. 'विद्याधरहस्तमुक्ता'शब्दः स्त्री. प्र.वि. ए.व.

आ. समासः

१. सिंहस्य निपातः, तम् - *षष्ठीतत्पुरुषः*
२. पुष्पाणां वृष्टिः - *षष्ठीतत्पुरुषः*
३. विद्याधराणां हस्ताः - *षष्ठीतत्पुरुषः*
विद्याधरहस्तेभ्यः मुक्ता - *पञ्चमीतत्पुरुषः*
४. अवाक् मुखं यस्य सः, तस्य - *बहुव्रीहिः*

**२०. उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन्।
दर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ।।**

पदविभागः

उत्तिष्ठ[1], वत्स[2], इति[3], अमृतायमानम्[4], वचः[5], निशम्य[6], उत्थितम्[7], उत्थितः[8], सन्[9], ददर्श[10], राजा[11], जननीम्[12], इव[13], स्वाम्[14], गाम्[15], अग्रतः[16], प्रस्रविणीम्[17], न[18], सिंहम्[19] ।।

अन्वयः

राजा ''वत्स ! उत्तिष्ठ'' इति उत्थितं अमृतायमानं वचः निशम्य उत्थितः सन्, अग्रतः प्रस्त्रविणीं गां स्वां जननीम् इव ददर्श, सिंहं न ददर्श ।

प्रीतपदार्थः

राजा - The king, **निशम्य** - on hearing, **अमृतायमानम्** - the nectar-like, **वचः** = words, **उत्थितम्** - that came forth, **इति** - thus, "**वत्स** ! - Oh ! Child ! **उत्तिष्ठ** - get up", **उत्थितः सन्** - stood up, **ददर्श** - (and) saw, **अग्रतः** - in front (of him), **गाम्** - the cow, **प्रस्त्रविणीम्** - with milk oozing, **स्वां जननीम् इव** - like (seeing) his own mother, **सिंहं न** - (and) not the lion.

तात्पर्यम्

तस्मिन् एव क्षणे 'वत्स ! उत्तिष्ठ' इति वचनं दिलीपः श्रुतवान् । तद्वचनम् अमृतमिव आसीत् । ततः दिलीपः उत्थितवान् । अग्रतोऽपश्यत् । आश्चर्यम् !! तत्र सिंहः नास्ति । दुग्धं स्त्रावयन्तीं नन्दिनीमेव राजा अपश्यत् । धेन्वाः दर्शनं तस्य स्वमातृदर्शनमिव आसीत् ।

अन्वयरचना

ददर्श - अपश्यत् - *क्रियापदम्*
कः ददर्श ? - राजा
कथं भूतः सन् ? - उत्थितः
कां ददर्श ? - गाम्
कीदृशीं गाम् ? - प्रस्त्रविणीम्
काम् इव ददर्श ? - जननीम् इव
किं कृत्वा ददर्श ? - निशम्य
किं निशम्य ? - वचः
कीदृशं वचः ? - अमृतायमानम्
पुनः कीदृशम् ? - उत्थितम्
किमिति वचः ? - 'उत्तिष्ठ वत्स' इति
कुत्र ददर्श ? - अग्रतः
न ददर्श - न अपश्यत्

कः न अपश्यत् ? - राजा

कं न अपश्यत् ? - सिंहम्

विशेषः

अ. पदविवरणम्

1. उत्-उपसर्गपूर्वकः 'स्था'धातुः, प.प. प्रेरणा (लोट्), म.पु. ए.व.
2. अ. 'वत्स'शब्दः, पु. सं.प्र. ए.व.
3. अव्ययम् 'इति'
4. अ. 'अमृतायमान'शब्दः, न. द्वि.वि. ए.व.
5. स. 'वचस्'शब्दः, न. द्वि.वि. ए.व.
6. अव्ययम् (प्र) निशम्य (नि + शम् + ल्यप्)
7. अ. 'उत्थित'शब्दः, न. द्वि.वि. ए.व.
8. अ. 'उत्थित'शब्दः, पु. प्र.वि. ए.व.
9. त. 'सत्'शब्दः, पु. प्र.वि. ए.व.
10. 'दृश्'धातुः प.प. भूतकालः (लिट्), प्र.पु. ए.व.
11. न. 'राजन्'शब्दः, पु. प्र.वि. ए.व.
12. ई. 'जननी'शब्दः, स्त्री. द्वि.वि. ए.व.
13. अव्ययम् 'इव'
14. आ. 'स्वा'शब्दः, स्त्री. द्वि.वि. ए.व.
15. ओ. 'गो'शब्दः, स्त्री. द्वि.वि. ए.व.
16. अव्ययम् (प्र) अग्रतः (अग्र + तस्)
17. इ. 'प्रस्त्रविणी'शब्दः, स्त्री. द्वि.वि. ए.व.
18. अव्ययम् 'न'
19. अ. 'सिंह'शब्दः, पु. द्वि.वि. ए.व.

आ. समासः

अस्मिन् पद्ये समस्तपदानि न सन्ति ।

२१. तं विस्मितं धेनुरुवाच साधो !
मायां मयोद्भाव्य परीक्षितोऽसि ।
ऋषिप्रभावान्मयि नान्तकोऽपि
प्रभुः प्रहर्तुं किमुतान्यहिंस्राः ॥

पदविभागः

तम्[1], विस्मितम्[2], धेनुः[3], उवाच[4], साधो[5], मायाम्[6], मया[7], उद्भाव्य[8], परीक्षितः[9], असि[10], ऋषिप्रभावात्[11], मयि[12], न[13], अन्तकः[14], अपि[15], प्रभुः[16], [17]प्रहर्तुम्, किमुत[18], अन्यहिंस्राः[19] ।

अन्वयः

विस्मितं तं धेनुः ''साधो ! मायाम् उद्भाव्य मया परीक्षितः असि । ऋषिप्रभावात् मयि अन्तकः अपि प्रहर्तुं न प्रभुः, अन्यहिंस्राः किमुत'' इति उवाच ।

अन्वयार्थः

धेनुः - The cow, उवाच - spoke, इति - thus, तम् - to him, विस्मितम् - who was astonished, साधो ! - oh! gentleman, उद्भाव्य - by creating, मायां = an illusion, परीक्षितः असि - you have been put to test, मया - by me. ऋषिप्रभावात् - Owing to the greatness (power) of the sage, अन्तकः अपि - even the god of death, न प्रभुः - is not capable, प्रहर्तुं - of striking. मयि - at me किमुत - What remains to be said of, अन्यहिंस्राः - other harmful animals ?

तात्पर्यम्

सिंहम् अपश्यन्, पुष्पधारां च अनुभवन् दिलीपः आश्चर्यचकितः अभवत् । तादृशं तम् उद्दिश्य धेनुः वदति - ''राजन् ! बुद्धिपूर्वकम् अहमेव त्वां परीक्षितवती । सिहः मायानिर्मितः, न वास्तवः । भगवान् वसिष्ठः माम् अतिशयेन अनुगृहीतवान् अस्ति । तस्य अनुग्रहः अस्ति इति कारणतः साक्षात् यमोऽपि मां हन्तुम् असमर्थः । एते प्राणिनः किं वा कर्तुं शक्नुयुः ?'' इति ।

अन्वयरचना

उवाच - उक्तवती - *क्रियापदम्*

का उवाच ? - धेनुः

कम् उवाच ? - तम्

कीदृशं तम् ? - विस्मितम्

  असि - *क्रियापदम्*

  कः ? - (त्वम्)

कीदृशः त्वम् ? - परीक्षितः
किं कृत्वा परीक्षितः ? - उद्भाव्य
काम् उद्भाव्य ? - मायाम्
केन परीक्षितः ? - मया
न प्रभुः अस्ति - समर्थः नास्ति
कः न प्रभुः ? - अन्तकः
किं कर्तुं न प्रभुः ? - प्रहर्तुम्
कस्मिन् प्रहर्तुम् ? - मयि
कस्मात् न प्रभुः ? - ऋषिप्रभावात्
किमुत ? - न प्रभवन्ति - (अध्याहार्थम्)
के न प्रभवन्ति ? - अन्यहिंस्राः

विशेषः

अ) पदविवरणम्

1. द. 'तद्'शब्दः, पु. द्वि.वि. ए.व.
2. अ. 'विस्मित'शब्दः, पु. द्वि.वि. ए.व.
3. उ. 'धेनु'शब्दः, स्त्री. प्र.वि. ए.व.
4. 'वच्'धातुः प.प. भूतकालः (लिट्), प्र.पु. ए.व.
5. उ. 'साधु'शब्दः, पु. सं.प्र.वि. ए.व.
6. आ. 'माया'शब्दः, स्त्री. द्वि.वि. ए.व.
7. द. 'अस्मद्'शब्दः, त्रि. तृ.वि. ए.व.
8. अव्ययम् (प्र) 'उद्भाव्य' (उत् + भाव् + ल्यप्)
9. अ. 'परीक्षित'शब्दः, पु. प्र.वि. ए.व.
10. 'अस्'धातुः प.प. वर्तमानकालः (लट्), म.पु. ए.व.
11. अ. 'ऋषिप्रभाव'शब्दः, पु. पं.वि. ए.व.
12. द. 'अस्मद्'शब्दः, त्रि. स.वि. ए.व.
13. अव्ययम् 'न'
14. अ. 'अन्तक'शब्दः, पु. प्र.वि. ए.व.
15. अव्ययम् 'अपि'
16. उ. 'प्रभु'शब्दः, पु. प्र.वि. ए.व.
17. अव्ययम् (प्र) 'प्रहर्तुम्' (प्र + हृ + तुमुन्)

18. अव्ययम् 'किमुत'
19. अ. 'अन्यहिंस्र'शब्दः, पु. प्र.वि. ब.व.

आ) समासः

१. ऋषेः प्रभावः, तस्मात् - *षष्ठीतत्पुरुषः*
२. अन्ये च ते हिंस्राश्च - *कर्मधारयसमासः*

६. संस्कृतसाहित्यपरिचयः
संस्कृतकोषसाहित्यम्

भाषाध्ययने शब्दकोषाणाम् आवश्यकता विशेषतः भवति । अतः सर्वासु अपि भाषासु बहुविधाः कोषाः उपलभ्यन्ते । संस्कृतभाषा यथा अतिप्राचीना तथैव संस्कृतकोषसाहित्यम् अपि अतिप्राचीनम् ।

वेदार्थज्ञानार्थं प्राचीने काले निघण्टवः भवन्ति स्म । इदानीम् उपलभ्यमानः निघण्टुः नाम यास्कस्य 'निरुक्तम्' । वैदिकनिघण्टवः आसन् ततः पूर्वम् । किन्तु ते इदानीं न उपलभ्यन्ते । यास्कस्य निरुक्तं तावत् वैदिकनिघण्टोः भाष्यम् इति परिगण्यते । यथा यथा कालः गतः तथा तथा लौकिकी भाषा प्रवृद्धा । ततः शब्दप्रपञ्चः अपि विस्तृतः जातः । शब्दानाम् अर्थपरिज्ञानार्थं, लिङ्गज्ञानार्थं, पर्यायादिज्ञानार्थं च निघण्टूनाम् आवश्यकता आपतिता । ततः बहवः निघण्टवः (शब्दकोषाः) उत्पन्नाः ।

इदानीं सर्वे शब्दकोषाः अकारादिक्रमेण शब्दान् सूचयन्ति । किन्तु संस्कृतक्षेत्रस्य प्राचीनकोषाः तथा न आसन् । प्राचीनकालीनकोषेषु द्वैविध्यं दृश्यते ।

१. शब्दान् वर्गशः विभज्य तत्तद्वर्गसम्बन्धिनां पर्यायपदानां लिङ्गसहितं निर्देशं कुर्वाणाः ।

   एतादृशाः कोषाः यथा - अमरकोषः, अभिधानचिन्तामणिः, हारावलिः, त्रिकाण्डकोषः, कल्पद्रुमकोषः इत्यादयः ।

२. शब्दानाम् अन्तिमान् वर्णान् ककारादिक्रमेण सङ्गृह्य हकारान्तपर्यन्तानां शब्दानां लिङ्गसहितनिर्देशं कुर्वाणाः ।

   ते च यथा - मेदिनीकोषः, नानार्थरत्नमाला, अनेकार्थसङ्ग्रहः इत्यादयः ।

उपरिनिर्दिष्टाः उभयविधाः अपि कोषाः श्लोकरूपेण एव भवन्ति । प्राचीने काले लेखनसौलभ्यम् एतावत् न आसीत् इत्यतः स्मरणशक्तेः आनुकूल्यार्थं

शास्त्रकोषादयः सर्वे श्लोकरूपेण एव भवन्ति स्म ।

लौकिकसंस्कृतक्षेत्रे प्रायः ७५ निघण्टवः (कोषाः) इदानीम् उपलभ्यन्ते (ज्ञातकर्तृकाः) । एतदतिरिच्य अज्ञातकर्तृकाः १०-१५ निघण्टवः अपि उपलभ्यन्ते ।

भाषाभ्यासदृष्ट्या अधिकतया उपयुज्यमानः कोषः - 'अमरकोषः' । एतस्य वास्तविकं नाम 'नामलिङ्गानुशासनम्' इति । एतस्य रचयिता अमरसिंहः । गच्छता कालेन एषः कोषः 'अमरकोषः' इत्येव प्रसिद्धः जातः । आ प्राचीनकालात् अपि भाषाभ्यासिभिः अमरकोषस्य कण्ठस्थीकरणं क्रियमाणं दृश्यते । पर्यायपदज्ञानार्थं, लिङ्गज्ञानार्थं, शब्दार्थज्ञानार्थं च अमरकोषस्य अध्ययनं नितान्तम् उपकरोति । एतस्य पञ्चत्रिंशदधिकानि (३५) व्याख्यानानि सन्ति इत्येतत् एव एतस्य परिष्कृततां, जनप्रियतां च द्योतयति ।

अकारादिक्रमेण रचितेषु कोषेषु आदिमः 'शब्दकल्पद्रुमः' नाम कोषः । एषः राजराधाकान्तदेवेन विरचितः । सकलशास्त्रसम्बद्धाः शब्दाः अपि अत्र सङ्गृहीताः सन्ति । एतादृशः अपरः कोषः 'वाचस्पत्यम्' इति । शब्द-कल्पद्रुमे यावन्तः शब्दाः सन्ति ततोऽपि अधिकाः शब्दाः सन्ति अत्र । निरूपणक्रमः अपि परिष्कृतः अस्ति । एतस्य रचयिता तारानाथतर्कवाचस्पतिः ।

संस्कृताध्ययनार्थम् उपकारकाः कोषाः केचन -

* संस्कृत-इंग्लीष्-शब्दकोषः - वि. एस्. आप्टे
* संस्कृत-इंग्लीष्-शब्दकोषः - मोनियर् विलियम्स्
* संस्कृत-इंग्लीष्-शब्दकोषः - मेक्डोनल्
* इंग्लीष्-संस्कृत-शब्दकोषः - वि. एस्. आप्टे

छात्रोपयोगार्थं प्रादेशिकभाषया अल्पमूल्यकाः कोषाः अपि तत्तत्प्रदेशे उपलभ्यन्ते एव ।

७. संस्कृतग्रन्थकारपरिचयः

नाटककाराः

अश्वघोषः - संस्कृतसाहित्यस्य उपलब्धम् अतिप्राचीनं नाटकं 'शारिपुत्र-प्रकरणम्' इति । तस्य कर्ता एव अश्वघोषः । एषः बौद्धदार्शनिकः कविः च आसीत् । यद्यपि बहवः ग्रन्थाः एतेन लिखिताः इत्येव प्रसिद्धाः, तथापि बुद्धचरितं, सौन्दरनन्दं चेति महाकाव्यम् एतस्य इत्यत्र न सन्देहः । जर्मन्देशीयः

लूडर्स्महोदयः एतस्य त्रीणि नाटकानि सङ्गृह्य प्रकाशितवान् । तेषु अन्यतमम् एव - 'शारिपुत्रप्रकरणम्' । अत्र षड् अङ्काः सन्ति ।

अश्वघोषः प्रथमायां क्रिस्तशताब्द्यां आसीत् इति ऊह्यते । एतस्य ग्रन्थानां समाप्तिवाक्यतः ज्ञायते यत् एतस्य माता सुवर्णाक्षी इति, एतस्य जन्मस्थलं 'साकेतः' इति च । वेदं, रामायणं, महाभारतम्, आर्हतं, सांख्यं, वैशेषिकादिदर्शनानि च एषः सम्यक् जानाति स्म । एतस्य सङ्गीतपरिचयः अपि सम्यक् आसीत् । अश्वघोषस्य नाटकानि लक्षणशास्त्रानुगुणानि एव सन्ति । अश्वघोषस्य कालिदासस्य च काव्येषु साम्यं दृश्यते ।

भासः - यद्यपि भासस्य प्रशंसा कालिदासबाणादिभिः कृता, तदीयानि सुभाषितानि बहुषु सुभाषितसङ्ग्रहेषु दृश्यन्ते, तथापि तस्य कृतयः तु गतस्य शतकस्य आदिभागे लब्धाः । केरलीयेन टि. गणपतिशास्त्रिवर्येण तदीयानि १३ रूपकाणि सङ्गृह्य प्रकाशितानि - १९१० तमे क्रिस्ताब्दे । तेषां शैली, तन्त्रं, कथासंविधानं, रसपोषणं, वर्णनम् इत्यादिषु यत् सादृश्यं दृश्यते तद्बलात् एककर्तृकत्वं भासकर्तृकत्वं च निर्णीतम् । 'यज्ञफल'नामकं रूपकम् अपि भासकृतम् इति प्रसिद्धम् । एवं भासस्य १४ रूपकाणि इदानीम् उपलभ्यन्ते ।

भासस्य देशकालादिविषये सर्वम् अपि विवादास्पदम् अस्ति । केचन भासं क्रिस्तात् पूर्वं स्थितं मन्यन्ते, पुनः केचन क्रिस्तात् अनन्तरं जातम् । बहूनां पण्डितानाम् आशयं मनसि निधाय इदं निर्णेतुं शक्यते यत् भासः तृतीये शतके आसीत् इति । भासस्य रूपकाणां शैली न कठिना। सर्वेषु रूपकेषु दृश्यरमणीयता श्रव्यरमणीयता च अपूर्वा । पात्रचित्रणे भासस्य अनुपमं सामर्थ्यम् । एतस्य सर्वाणि रूपकाणि रसपरिपुष्टानि सन्ति ।

भवभूतिः - 'उत्तररामचरितं' भवभूतिना रचितं प्रसिद्धं नाटकम् । भवभूतिः 'महावीरचरत'नामकम् अपरं नाटकं, 'मालतीमाधवम्' इति प्रकरणं* चापि रचितवान् अस्ति । एतस्य रूपकाणां प्रस्तावनातः ज्ञायते - 'एतस्य श्रीकण्ठः इत्यपि नाम । एतस्य पिता नीलकण्ठः, माता च जतुकर्णी, जन्मस्थलं च दक्षिणापथस्थं पद्मपुरम्' इति । एषः बहुशास्त्रविशारदः आसीत् । भवभूतेः कालः क्रि.श. ७ इति पण्डिताः अभिप्रयन्ति ।

महावीरचरितम्, उत्तररामचरितं च रामायणस्य आधारेण लिखितम् ।

---

* अन्यभाषासु यत् नाटकम् इति उच्यते तत् संस्कृते 'रूपकम्' इति उच्यते । रूपकेषु अन्यतमम् अस्ति नाटकम् । प्रकरणं चापि रूपकेषु अन्यतमम् ।

मालतीमाधवं कल्पितकथायाः आधारेण लिखितम् । उत्तररामचरिते रामायणस्य उत्तरकाण्डस्य कथा अस्ति । भवभूतेः शैली प्रौढा । 'उत्तरे रामचरिते भवभूतिः विशिष्यते' इति प्रशंसा प्राप्ता अस्ति भवभूतिना ।

शूद्रकः - 'मृच्छकटिकम्' इत्यस्य रूपकस्य रचयिता शूद्रकः । एषः राजा आसीत् । सत्त्वशाली कविः अपि आसीत् । वेदशास्त्रादिषु अपि एतस्य पाण्डित्यम् आसीत् । शूद्रकः दाक्षिणात्यः इति बहवः विद्वांसः अभिप्रयन्ति । एतस्य कालः क्रि.श. ४ स्यात् इति ऊह्यते ।

मृच्छकटिकं शृङ्गारप्रधानं रूपकम् । अत्र हास्यरसः विशेषतः दृश्यते । शूद्रकेण चित्रितः विदूषकः शकारः इत्यादयः पठितृषु श्रोतृषु च हासं जनयन्ति एव । चारुदत्तवसन्तसेनयोः वृत्तान्तं वर्णयन् शूद्रकः तत्कालीन-राजकीयवृत्तान्तम् अपि वर्णयति । पात्रचित्रणं, रसपोषणम् इत्यादयः गुणाः मृच्छकटिके विशेषतः दृश्यन्ते ।

भट्टनारायणः - 'वेणीसंहार'नामकस्य प्रसिद्धस्य नाटकस्य रचयिता भट्टनारायणः । एषः अष्टमे शतके आसीत् इति पण्डिताः अभिप्रयन्ति । एषः कान्यकुब्जप्रदेशे जातः इत्यत्र तु न कस्यापि विमतिः ।

वेणीसंहारः महाभारतस्य कथाम् आधारीकृत्य लिखितः । संहारः = संहरणम् = एकत्रानयनम् । दुर्योधनादीनां संहारं कृत्वा द्रौपद्याः केशान् भीमः वेणीरूपेण बध्नाति इत्यतः एतस्य नाटकस्य नाम 'वेणीसंहारः' इति जातम् । एतत् नाटकं वीररसप्रधानम् । समग्रं नाटकं नाटकलक्षणानुगुणम् एव रचितम् अस्ति । अतः लक्षणनिरूपणावरे बहवः लक्षणकाराः वेणीसंहारस्य श्लोकान् एव अधिकतया उदाहरन्ति । पात्रचित्रणं, तत्रापि भीमाश्वत्थामादीनां चित्रणम् अपूर्वम् अस्ति । भट्टनारायणस्य शैली प्रौढा । एतस्य भाषाप्रभुत्वं पाण्डित्यं च श्लाघनीयम् अस्ति । एकया कृत्या अपि सः विशेषप्रसिद्धिं प्राप्तवान् अस्ति ।

कोविदः - नवमः पाठः

प्रश्नाः

I. *उत्तराणि लिखत ।*

१. प्रकृतिः का ? विकृतिश्च का ?

२. सारः कथं ग्रहीतव्यः ?

३. अमृतायमानं वचनं किम् ?

४. अनुष्टुप्छन्दसि कति अक्षराणि भवन्ति ?

५. अमरकोषस्य वास्तविकं नाम किम् ?

II. *विग्रहवाक्यं समासनाम च लिखत ।*

१. दिक्पालाः .... - ....

२. पुष्पवृष्टिः .... - ....

३. दशकण्ठनीता .... - ....

४. रघुनाथदूतः .... - ....

५. भीमराजपुत्री .... - ....

III. *संयोज्य लिखत ।*

अ.	*आ*
१. अमरकोषः	अ. अकारादिक्रमयुक्तः प्रथमः कोषः
२. निरुक्तम्	आ. शृङ्गाररसप्रधानम्
३. शब्दकल्पद्रुमः	इ. यास्कः
४. मृच्छकटिकम्	ई. भासनाटकप्रकाशकः
५. टि. गणपतिशास्त्री	उ. नामलिङ्गानुशासनम्

(**Note:** Answers for the above exercises are given in the end of this book. (PNO - 264) After completing them, check your answers.)

कोविदः - दशमः पाठः

।। योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ।।

Ascetics do their duty, having given up all attachment
(to wordly matters) for self purification

१. समासः

In the previous lessons, we learnt about the different types of compounds, how they are dissolved and how words in a sentence can be combined to form compounds.

Let us note of the changes that take place when certain words are compounded and know some more rules connected with समास ।

1. When the words राजन् and सखि are compounded to form Tatpurusha they end in a short अ (अकारान्त)

   Eg. देवानां राजा - देवराजः, कृष्णस्य सखा - कृष्णसखः

2. When two words are compounded to form a Dvandva the word with less number of vowels will be placed first in the compound.

   Eg. शिवश्च केशवश्च - शिवकेशवौ

3. You know that the पूर्वपद in a compound is in its प्रातिपदिक form. If that प्रातिपदिक is नकारान्त its final नकार will disappear in the samasa. This rule applies to all samasas.

   Eg. गुणिनः + सेवा = गुणिसेवा

   'गुणिनः' is the षष्ठ्यन्त form of गुणिन्शब्द । In the compound

the नकार disappears and only गुणि remains.

Other examples -

करिणः + शुण्डा - करिशुण्डा
शास्त्री + वर्यः - शास्त्रिवर्यः
घनपाठिनः + गृहम् - घनपाठिगृहम्
गुणानुरागी + जनः - गुणानुरागिजनः

4. Samahara (Aggregate) Dvandva and Dvigu compounds are in neuter.

Eg. पाणी च पादौ च - एतेषां समाहारः - पाणिपादम् (समाहारद्वन्द्वः)

पञ्चानां गवां समाहारः - पञ्चगवम् (द्विगुः)

5. Both in Dvandva and Tatpurusha the compound word will have the same gender as that of the second (latter) word.

Eg. लता च वृक्षश्च - लतावृक्षौ - Masculine
वृक्षश्च लता च - वृक्षलते - Feminine
अर्धं पिप्पल्याः - अर्धपिप्पली - Feminine

6. Avyayibhava compound will always be an indeclinable.

Eg. शक्तिम् अनतिक्रम्य - यथाशक्ति

7. In a Bahuvrihi compound, the compound will get the gender of the third word whose sense is predominant

Eg. नष्टं पुस्तकं यस्य सः - नष्टपुस्तकः (छात्रः) (Masculine)
नष्टं पुस्तकं यस्याः सा - नष्टपुस्तका (छात्रा) (Feminine)
नष्टं पुस्तकं यस्य तत् - नष्टपुस्तकम् (मित्रम्) (Neuter)

Note - Compounds are briefly explained in KOVIDA lessons. For more information you may refer to "समासः" a book published by Samskrita Bharathi. This book contains a detailed exposition of compounds in Samskrit.

Address

Samskrita Bharathi, 'Aksharam', 8th cross, 2nd phase, Girinagar, Bangalore - 560 085 Ph : 26721052

२. विशेषविषयः

णत्वम्

Observe the two words रामेण and बालेन । Both these words end in तृतीयाविभक्तिः । But there is a difference betweeen the two forms. In रामेण 'न' has changed to 'ण' while in बालेन it has not. When does 'न' change to 'ण'? Where does णत्व not take place ? To understand this you must know the following rules in connection with णत्वम् ।

1. **निमित्तम्** - where there is light there is either the Sun or a lamp. The Sun or the lamp is the निमित्तम् - cause of light. Similarly, for णत्वम् to occur there has to be one of the letters रेफः (the letter 'र') षकारः and ऋकारः । So these letters are the निमित्तम् for णत्वम् ।

Eg.	**शब्दः**		**निमित्तम्**
	कीर्णः	-	रेफः
	कृष्णः	-	षकारः
	पितॄणाम्	-	ऋकारः

2. **Intervention of other letters between the निमित्तम् and 'न' ।** In the above examples नकार is found right after the निमित्तम् । Between the two letters there is no intervention of any other letter and hence 'न' is replaced with 'ण' । But in the example रामेण between the letter 'र' which is the निमित्त and नकार there are three intervening letters आ, म् and ए and still णत्वम् has taken place.
So it must be understood that even when there is the intervention of certain letters between the 'निमित्त' and 'न', णत्वम् occurs. These letters are known as अव्यवधायकवर्णाः । Those letters that impede the change of 'न' into 'ण' are called व्यवधायकवर्णाः । Those that do not come in the way of the

change are अव्यवधायकवर्णाः ।

अव्यवधायकाः - All vowels (ह्रस्व and दीर्घ), ह, य, व and the letters of कवर्ग & पवर्ग ie.,

* अ इ उ ऋ ए ऐ ओ औ and the दीर्घ of the first four.
* ह,य,व
* क,ख,ग,घ,ङ and प,फ,ब,भ,म

If there is a letter other than these, intervening the निमित्त and नकार, णत्व does not take place.

Eg. राहुणा - आ, ह्, and उ are not व्यवधायक and hence णत्वम् has taken place.

महाराजेन - There is a जकार which is a व्यवधायक between र and न and hence there is no णत्वम् ।

Here are some more exmples -

		निमित्तम्	अव्यवधायकवर्णाः
• with णत्वम् -	१. क्षत्रियाणाम्	रेफः	इ, य्, आ
	२. ब्रह्मणः	रेफः	अ, ह्, म्, अ
	३. रूप्यकाणि	रेफः	ऊ,प्,य्,अ,क्,आ
	४. गृहाणि	ऋकारः	ह्, आ
	५. वृषभाणाम्	षकारः	अ,भ्,आ

		निमित्तम्	व्यवधायकवर्णाः
• without णत्वम् -	१. मारीचेन	रेफः	च्
	२. रश्मिना	रेफः	श्
	३. कार्यदर्शिना	रेफः	श्
	४. वार्तालापेन	रेफः	त्, ल्
	५. दृश्यमानम्	ऋकारः	श्

अभ्यासः

I. *अधोनिर्दिष्टानि विग्रहवाक्यानि अवलम्ब्य समस्तपदानि लिखत ।*

१. देवरायः इति राजा = ...

२. गणानां राजा = ...

३. अयोध्यायाः राजा = ...

४. शास्त्रिणः गृहम् = ...

५. शर्मा + वर्यः = ...

६. फलं च पुष्पं च = ...

७. शाखा च उपशाखा च = ...

८. गोविन्दस्य सखा = ...

९. उत्तमः सखा = ...

१०. मुखं च नासिका च अनयोः समाहारः = ...

II. *अधोनिर्दिष्टेषु पदेषु णत्वस्य किं निमित्तं पूर्वतनवर्णश्च कः इति लिखत ।*

	निमित्तम्		*पूर्वतनवर्णः*
उदा - क्षत्रियेण =	रेफः	-	तकारः
१. विष्णुः =	....	-	....
२. नमस्कारेण =	....	-	....
३. मुष्णाति =	....	-	....
४. गुरुणा =	....	-	....
५. रामाणाम् =	....	-	....
६. कुमारेण =	....	-	....
७. मातॄणाम् =	....	-	....
८. चित्रकाराणाम् =	....	-	....
९. कर्मकराणाम् =	....	-	....
१०. क्षामेण =	....	-	....

III. *निमित्तनकारयोः मध्ये के वर्णाः सन्ति इति लिखत ।*

उदा - रामाणाम् - आ + म् + आ

१. सर्वेण = ... + ...

२. कृमीणाम् = ... + ...

३. मृगाणाम् = ... + ...

४. भारविणा .... + ... + ...

५. पारायणम् .... + ... + ...

६. भ्रमणम् .... + ... + ...

७. वराहाणाम् = ... + ... + ...

८. द्रव्येण = ... + ... + ...+........

९. क्रियमाणः = ... + ... + ... + ... + ...

१०. रूप्यकाणाम् = ... + ... + ... + ... +.... + ...

IV. *अधः दत्तानाम् अशुद्धरूपाणां पुरतः शुद्धानि रूपाणि लिखत ।*

उदा - राजारामेन (राजारामेण)

१. चक्रवाकानाम् (..........................)

२. नरेशेण (.................................)

३. वाहकाणाम् (.............................)

४. कारकानाम् (.............................)

५. धर्मदर्शिणा (.............................)

६. बन्धकाणाम् (............................)

७. मरीचिकाणाम् (..........................)

८. अर्हानाम् (...............................)

९. महिषीनाम् (..............................)

१०. वारिजेण (................................)

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 265) After completing the exercises check your answers.)

३. सुभाषितानि

१९. प्रणयो मरणान्तः स्यात् कोपस्तु क्षणभङ्गुरः ।
उपदेशो यथाकालं विद्वेषो न कदाचन ॥

पदविभागः

प्रणयः, मरणान्तः, स्यात्, कोपः, तु, क्षणभङ्गुरः, उपदेशः, यथाकालम्, विद्वेषः, न, कदाचन ।

अन्वयः

प्रणयः मरणान्तः स्यात् । कोपः तु क्षणभङ्गुरः (स्यात्) । उपदेशः यथाकालं (स्यात्) । विद्वेषः कदाचन न (स्यात्) ।

अन्वयार्थः

प्रणयः= स्नेहः, मरणान्तः = आमरणम्, स्यात् = भवेत् । कोपः तु = कोपस्वभावः तु, क्षणभङ्गुरः (स्यात्) = क्षणकालमात्रं भवेत् । उपदेशः = परोपदेशः, यथाकालं (स्यात्) = यदा आवश्यकः तदा एव भवेत् । विद्वेषः = द्वेषभावना, कदाचन न (स्यात्) = कदाचित् अपि न भवेत् ।

तात्पर्यम्

अस्माकं जीवने स्नेहः आजीवनं भवेत् । यदि वयं स्नेहं न कुर्मः तर्हि जनाः अपि अस्मासु स्नेहं न्यूनीकुर्वन्ति । अतः जीवने सदा अपि स्नेहः भवेत् एव । किन्तु कोपः क्षणकालमात्रं भवेत् । कोपः यदि दीर्घकालं तिष्ठति तर्हि द्वेषासूयादयः दुर्गुणाः अस्मासु वासं कुर्वन्ति । अतः आगतः कोपः प्रयत्नेन क्षणमात्रेण एव निवारणीयः । यदि सर्वदा अपि उपदेशमात्रं क्रियते तर्हि जनाः अस्मासु अनादरं प्रकटयन्ति । अतः यदा आवश्यकं तदा एव (योग्ये काले) उपदेशः करणीयः । विद्वेषः तु जीवने कदापि न करणीयः एव । एवं सदा स्नेहं प्रदर्शयन्तः, द्वेषं कदापि अकुर्वन्तः, आगतं कोपं क्षणकालाभ्यन्तरे एव विस्मरन्तः, यथाकालं यथोचितम् उपदेशं कुर्वन्तः यदि वयं जीवेम तर्हि अस्माकं जीवनम् उत्तमं स्यात् ।

२०. कामान् दुग्धे विप्रकर्षत्यलक्ष्मीं
कीर्तिं सूते दुष्कृतं या हिनस्ति ।
तां चाप्येतां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः ॥

पदविभागः

कामान्, दुग्धे, विप्रकर्षति, अलक्ष्मीम्, कीर्तिम्, सूते, दुष्कृतम्, या, हिनस्ति, ताम्, च, अपि, एताम्, मातरम्, मङ्गलानाम्, धेनुम्, धीराः, सूनृताम्, वाचम्, आहुः ।

अन्वयार्थः

या कामान् दुग्धे, अलक्ष्मीं विप्रकर्षति, कीर्तिं सूते, दुष्कृतं हिनस्ति,

मङ्गलानां मातरं तां सूनृतां वाचं धीराः धेनुम् आहुः ।

अन्वयार्थः

या = वाक् (सज्जनानां), कामान् = इच्छाः, दुग्धे = पूरयति, अलक्ष्मीं = दारिद्र्यम्, विप्रकर्षति = दूरीकरोति, कीर्तिं = प्रसिद्धिम्, सूते = उत्पादयति, दुष्कृतं = दुष्कार्यम्, हिनस्ति = नाशयति, तां = तादृशीम् एतां = इमाम्, सूनृतां = मधुरम्, वाचम् = वचनम्, मङ्गलानां = शुभानाम्, मातरं = जननीम्, धीराः = पण्डिताः, धेनुं = कामधेनुः इति, आहुः = कथयन्ति ।

तात्पर्यम्

लोके सर्वैः सज्जनानां सहवासं प्राप्तुं यत्नः करणीयः । तेषां सम्पर्केण अस्माकम् अनेके उपकाराः भवन्ति । सर्वेषां मङ्गलानां जननी इव स्थिता एषा सतां वाणी कामधेनुः इव अस्माकं सर्वाः इच्छाः पूरयति । अनिष्टात् अस्मान् दूरीकरोति । अतः एव पण्डिताः सज्जनानां वाचं कामधेनुं वदन्ति ।

४. काव्यकथा

स्वयंवरविधेः अनन्तरं सर्वे अपि राजपरिवारजनाः दम्पतीभ्यां सह विदर्भराजधानीं कुण्डिनपुरं प्रति प्रस्थिताः । राजधान्यां नलदमयन्त्योः विवाहविधयः वैभवेन प्रवर्तिताः । सर्वे सहर्षं, सोत्साहं च भोजोत्सवे[1] भागम् अवहन् । ततः नलमहाराजः पत्न्या सह स्वदेशं प्रति प्रस्थितः । गमनमार्गे एव नलस्य सचिवाः अमिलन् । नलः दमयन्त्या सह पुरप्रवेशम् अकरोत् । आकाशमार्गे स्थिताः देवाः इन्द्रादयः तम् उत्सवं दृष्ट्वा देवलोकम् अगच्छन् । देवलोकप्रयाणसमये सरस्वती वीणावादनेन सर्वान् आनन्दयामास ।

देवानां स्वर्गप्रयाणसमये मार्गे कलिपुरुषः मिलितः । तस्य सैन्यसमूहे चार्वाकः, बौद्धः, द्वापरः, अन्ये च आसन् । यदा परस्परं मेलनं संवृत्तं, तदा कलिसैन्ये स्थिताः चार्वाकादयः देवेन्द्रादिभिः सह - 'वेदाः अप्रमाणम्, शास्त्राणि निन्द्यानि' इति विषये महान्तं वाग्वादम् अकुर्वन् । इदं वचनं श्रुत्वा देवेन्द्रः कुपितः अभवत् । सः स्ववचनैः वेदानां प्रामाण्यं, धर्मस्य आवश्यकताः च प्रतिपादितवान् । चार्वाकं निन्दितवान् च ।

---

1. Banquet (Dinner party)

चार्वाकः उक्तवान् - "अहं पराधीनः, परसैन्ये स्थितः । परानुग्रहाय इत्थम् उक्तम्" इति ।

तदा स्वयं कलिपुरुषः एव पुरतः आगतः । तेन उक्तम् - "भूलोके भैमीस्वयंवरः प्रवर्तिष्यते । तदर्थं प्रस्थिताः वयम्" इति ।

दिक्पालाः तस्य वचनं श्रुत्वा - "भोः ! कलिपुरुष ! तव प्रयाणं व्यर्थम् । भैमीस्वयंवरः अवसितः[2] । दमयन्ती नलमहाराजं वरयामास" इति अकथयन् ।

'भैमी नलं वृतवती' इति वचनं श्रुत्वा कलिः अतीव क्रुद्धः अभवत् । सः - "नलमहाराजं राज्यात् भ्रष्टं करोमि । भैमीवियोगं च तस्य साधयामि[3]" इति प्रतिज्ञाम् अकरोत् ।

कलिपुरुषस्य वयस्यः[4] द्वापरः अपि "साधु,साधु[5]" इति कलिपुरुषं प्रशंसितवान् ।

तस्मिन् अवसरे इन्द्रः कलिपुरुषम् उद्दिश्य - "एवं न कर्तव्यं, नल-महाराजः साधुपुरुषः । भैमी अपि साध्वीमणिः । अतः इमम् उद्यमं परित्यज" इति उक्तवान् ।

किन्तु कलिः तस्य वचनम् अविगणय्य[6] निषधदेशं गतवान् । तत्र देशे सर्वत्र धर्मप्रभावः आसीत् । अतः कलिः तत्र निस्तेजस्कः[7] अभवत् । कुत्रापि स्थातुम् अवकाशम् अलब्ध्वा, नलस्य दोषाणां प्रतीक्षां कुर्वन् सः कस्मिंश्चित् उद्याने स्थितः ।

अत्रान्तरे नलमहाराजः भैम्या सह आनन्देन कालं यापयति स्म । देवताराधनं, विद्वत्सम्माननं, प्रजारञ्जनम् इत्यादीनि राजोचितानि कार्याणि निर्वर्तयन्[8] सः बहुकालं राज्यशासनम् अकरोत् ।

प्रश्नाः

१. कलिपुरुषस्य सैन्ये के आसन् ?

२. कलिः किमिति प्रतिज्ञाम् अकरोत् ?

३. कलिः किमर्थं निस्तेजस्कः अभवत् ?

४. नलः कानि राजोचितकार्याणि निर्वर्तयति स्म ?

---

2. Completed (concluded) 3. achieve (effect), 4. Friend, 5. well done !, 6. Disregarding, 7. pale (powerless), 8. Accomplishing (doing).

३. श्लोकेषु अन्वयक्रमः

नन्दिनी पुनः कथयति ।

२२. भक्त्या गुरौ मय्यनुकम्पया च
प्रीतास्मि ते पुत्र ! वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिम्
अवेहि मां कामदुघां प्रसन्नाम् ॥

पदविभागः

भक्त्या[1], गुरौ[2], मयि[3], अनुकम्पया[4], च[5], प्रीता[6], अस्मि[7], ते[8], पुत्र[9], वरम्[10], वृणीष्व[11], न[12], केवलानाम्[13], पयसाम्[14], प्रसूतिम्[15], अवेहि[16], माम्[17], कामदुघाम्[18], प्रसन्नाम्[19] ।

अन्वयः

पुत्र ! गुरौ भक्त्या मयि अनुकम्पया च ते प्रीता अस्मि । वरं वृणीष्व । मां केवलानां पयसां प्रसूतिं न अवेहि । प्रसन्नां मां कामदुघाम् अवेहि ।

प्रतिपदार्थः

पुत्र ! - Oh! my son ! प्रीता अस्मि - I am pleased, ते - with you, भक्त्या - because of (your) devotion, गुरौ - towards the preceptor (Vasishtha), च - and, अनुकम्पया - compassion, मयि - towards me. वृणीष्व - Ask for (choose), वरम् - a boon. न अवेहि - Do not think, माम् - of me, प्रसूतिम् - as producing, केवलानां पयसाम् - only milk, माम् अवेहि - know me, कामदुघाम् - to be a wish-yielding (cow), प्रसन्नाम् - (when I am) pleased.

तात्पर्यम्

गुरोः वसिष्ठस्य विषये दिलीपस्य भक्तिः अनुपमा आसीत् । तथैव धेनोः विषये तस्य दयापि । नन्दिनी इदम् उभयमपि मनसि निधाय कथयति - ''पुत्र ! अहं प्रसन्ना । यं वरम् इच्छसि, तं स्वीकर्तुम् अर्हसि । इयं धेनुः कं वा वरं दद्यात् इति संशयः मास्तु । यथा अहं क्षीरदायिनी अस्मि, तथैव प्रसन्ना अहम् अपेक्षितं वस्तु अपि दातुं समर्था अपि । अहं कामदुघा अस्मि, अतः वरं स्वीकुरु'' इति ।

अन्वयरचना

अस्मि - *क्रियापदम्*
का अस्मि ? - अहम्
कीदृशी अस्मि ? - प्रीता
कस्मै प्रीता ? - ते
कया प्रीता ? - भक्त्या ?
कस्मिन् भक्तिः ? - गुरौ
पुनः कया प्रीता ? - अनुकम्पया
कस्याम् अनुकम्पया ? - मयि

वृणीष्व - स्वीकुरु - *क्रियापदम्*
कः ? - त्वम्
किं वृणीष्व ? - वरम्

न अवेहि - ज्ञातवान् न भव - *क्रियापदम्*
कः ? - (त्वम्)
किं न अवेहि ? - प्रसूतिम्
केषां प्रसूतिम् ? - पयसाम्
कीदृशानां पयसाम् ? - केवलानाम्
कां न अवेहि ? - माम्

(अवेहि) - ज्ञातवान् भव - *क्रियापदम्*
कः ? - (त्वम्)
काम् अवेहि ? - माम्
कीदृशीं माम् ? - कामदुघाम्
पुनः कीदृशीम् ? - प्रसन्नाम्

विशेषः

अ) पदविवरणम्

1. इ. 'भक्ति'शब्दः, स्त्री. तृ.वि. ए.व.
2. उ. 'गुरु'शब्दः, पु. स.वि. ए.व.
3. द. 'अस्मद्'शब्दः, त्रि. स.वि. ए.व.

4. आ. ‘अनुकम्पा’शब्दः, स्त्री. तृ.वि. ए.व.
5. अव्ययम् ‘च’
6. आ. ‘प्रीता’शब्दः, स्त्री. प्र.वि. ए.व.
7. ‘अस्’धातुः, प.प. वर्तमानकालः(लट्), उ.पु. ए.व.
8. द. ‘युष्मद्’शब्दः, त्रि. च.वि. ए.व.
9. अ. ‘पुत्र’शब्दः, पु. सं.प्र.वि. ए.व.
10. अ. ‘वर’शब्दः, पु. द्वि.वि. ए.व.
11. अ. ‘वृ’धातुः, आ.प. प्रेरणा(लोट्), म.पु. ए.व.
12. अव्ययम् ‘न’
13. अ. ‘केवल’शब्दः, न. ष.वि. ब.व.
14. स. ‘पयस्’शब्दः, न. ष.वि. ब.व.
15. इ. ‘प्रसूति’शब्दः, स्त्री. द्वि.वि. ए.व.
16. ‘अव’-उपसर्गपूर्वकः ‘इण्’धातुः, प.प. प्रेरणा(लोट्) म.पु. ए.व.
17. द. ‘अस्मद्’शब्दः, त्रि. द्वि.वि. ए.व.
18. आ. ‘कामदुघा’शब्दः, स्त्री. द्वि.वि. ए.व.
19. आ. ‘प्रसन्ना’शब्दः, स्त्री, द्वि.वि. ए.व.

आ) समासः

अस्मिन् पद्ये समस्तपदानि न सन्ति ।

नन्दिनीधेनोः वचनं श्रुत्वा राजा विनीतः अञ्जलिं बद्ध्वा वंशोद्धारार्थं सुदक्षिणायां सन्तानं प्रार्थितवान् । ततः -

२३. सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥

पदविभागः

सन्तानकामाय1, तथा2, इति3, कामम्4, राज्ञे5, प्रतिश्रुत्य6, पयस्विनी7, सा8, दुग्ध्वा9, पयः10, पत्रपुटे11, मदीयम्12, पुत्र13, उपभुङ्क्ष्व14, इति15, तम्16, आदिदेश17 ॥

अन्वायः

सा पयस्विनी सन्तानकामाय राज्ञे तथा इति कामं प्रतिश्रुत्य, पुत्र ! मदीयं पयः पत्रपुटे दुग्ध्वा उपभुङ्क्ष्व इति तम् आदिदेश ।

अन्वयार्थः

सा पयस्विनी - The cow, **प्रतिश्रुत्य** - having granted, **राज्ञे** - the king, **कामं** - his wish, **तथा इति** - (saying) 'so be it', **आदिदेश** - commanded, **तम्** - him, **इति** - thus, **पुत्र** - Oh son ! **पत्रपुटे** - into a vessel made of leaves, **दुग्ध्वा** - having milked, **मदीयं** - my, **पयः** - milk, **उपभृङ्क्ष्व** - drink (it).

तात्पर्यम्

चक्रवर्ती दिलीपः सन्तानार्थं धेनुं नन्दिनीं प्रार्थयामास । सन्तुष्टा सा गौः 'तथास्तु' इति वरं दत्तवती । कार्यमपि सूचितं तया । 'मदीयं क्षीरं पर्णानां पात्रे दुग्ध्वा, ततः पिब' इति राजानं सा असूचयत् ।

अन्वयरचना

आदिदेश - आज्ञापितवती - *क्रियापदम्*
का आदिदेश ? - सा
कीदृशी सा ? - पयस्विनी
कम् आदिदेश ? - तम्
किं कृत्वा आदिदेश ? - प्रतिश्रुत्य
किं प्रतिश्रुत्य - कामम्
कस्मै प्रतिश्रुत्य - राज्ञे
कीदृशाय राज्ञे ? - सन्तानकामाय
किमिति प्रतिश्रुत्य ? - तथा इति
उपभुङ्क्ष्व - स्वीकुरु - क्रियापदम्
कः ? - (त्वम्)
किम् उपभुङ्क्ष्व ? - पयः
कीदृशं पयः ? - मदीयम्
किं कृत्वा उपभुङ्क्ष्व ? - दुग्ध्वा
कुत्र दुग्ध्वा ? - पत्रपुटे
पुत्र ! - वत्स !

विशेषः

अ. पदविवरणम्

1. अ. 'सन्तानकाम'शब्दः पु. च.वि. ए.व.

2. अव्ययम् ‘तथा’
3. अव्ययम् ‘इति’
4. अ. ‘काम’शब्दः, पु. द्वि.वि. ए.व.
5. न. ‘राजन्’शब्दः, पु. च.वि. ए.व.
6. अव्ययम् (प्र) प्रतिश्रुत्य (प्रति + ‘श्रु’धातुः + ल्यप्)
7. ई. ‘पयस्विनी’शब्दः, स्त्री, प्र.वि. ए.व.
8. द. ‘तद्’शब्दः, स्त्री, प्र.वि. ए.व.
9. अव्ययम् (प्र) दुग्ध्वा (‘दुह्’धातुः + क्त्वाप्रत्ययः)
10. स. ‘पयस्’शब्दः, न. द्वि.वि. ए.व.
11. अ. ‘पत्रपुट’शब्दः, न. स.वि. ए.व.
12. अ. ‘मदीय’शब्दः, न. द्वि.वि. ए.व.
13. अ. ‘पुत्र’शब्दः, पु. सं.प्र.वि. ए.व.
14. उप-उपसर्गपूर्वकः ‘भुज्’धातुः, आ.प. प्रेरणा(लोट्), म.पु. ए.व.
15. अव्ययम् ‘इति’
16. द. ‘तद्’शब्दः पु. द्वि.वि. ए.व.
17. आङ्-उपसर्गपूर्वकः ‘दिश्’धातुः प.प. भूतकालः (लिट्) प्र.पु. ए.व.

आ. समासः

१. सन्तानं कामयते इति सन्तानकामः, तस्मै सन्तानकामाय

२. पत्राणां पुटम् - पत्रपुटम् - तस्मिन् - *षष्ठीतत्पुरुषः*

धेनोः वचनं श्रुत्वा दिलीपः - ‘‘मातः । होमार्थं तव क्षीरस्य उपयोगः भवति । वत्सोऽपि क्षीरं पिबति । ततः अहं शेषं क्षीरं वसिष्ठस्य अनुमतिं प्राप्य पास्यामि’’ इत्युक्तवान् । ततः धेनुः सुप्रीता अभवत् । दिलीपः धेन्वा सह आश्रमं प्रत्यागतवान् । सुदक्षिणाम् आचार्यं वसिष्ठं च वृत्तान्तं निवेदितवान् । ततः -

२४. स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ।।

पदविभागः

सः[1], नन्दिनीस्तन्यम्[2], अनिन्दितात्मा[3], सद्वत्सलः[4], वत्सहुतावशेषम्[5],

पपौ[6], वसिष्ठेन[7], कृताभ्यनुज्ञः[8], शुभ्रम्[9], यशः[10], मूर्तम्[11], इव[12], अतितृष्णः[13] ।।

अन्वयः

अनिन्दितात्मा, सद्वत्सलः, वसिष्ठेन कृताभ्यनुज्ञः सः वत्सहुतावशेषं नन्दिनीस्तन्यं, शुभ्रं मूर्तं यशः इव अतितृष्णः (सन्) पपौ ।

अन्वयार्थः

सः – He (Dilipa) अनिन्दितात्मा – who possessed a blemishless character, सद्वत्सलः – who was kind to the pious, कृताभ्यानुज्ञः – being permitted, वसिष्ठेन – by Vasishtha, पपौ – drank, अतितृष्णः(सन्) – with great hope (desire), नन्दिनीस्तन्यं – Nadini's milk वत्सहुतावशेषम् - left over after the calf had been offered, यशः इव – as though (drinking) fame, शुभ्रं – that is pure (white), मूर्तम् – and has taken a concrete form (in the milk).

तात्पर्यम्

अन्येद्युः वसिष्ठाश्रमे अग्निहोत्रविधिः समाप्तः । वत्सोऽपि क्षीरं पीतवान् । ततो दिलीपः अवशिष्टं क्षीरं वसिष्ठस्य अनुमतिं सम्प्राप्य अपिबत् । क्षीरम् अतीव स्वच्छं, श्वेतश्च आसीत् । कीर्तिः एव शरीरं धृत्वा समागता इव भासते स्म । तादृशम् अपूर्वं क्षीरम् अतीव आशापूर्वकं दिलीपः पीतवान् ।।

अन्वयरचना

पपौ – पीतवान् – *क्रियापदम्*

कः पपौ ? – सः

कीदृशः सः ? – अनिन्दितात्मा

पुनः कीदृशः ? – सद्वत्सलः

पुनः कीदृशः ? – कृताभ्यनुज्ञः

केन कृताभ्यनुज्ञः ? – वसिष्ठेन

कीदृशः (सन्) पपौ ? – अतितृष्णः (सन्)

किं पपौ ? – नन्दिनीस्तन्यम्

कीदृशं नन्दिनीस्तन्यम् ? – वत्सहुतावशेषम्

पुनः कीदृशम् ? - शुभ्रम्
किम् इव पपौ ? - यशः इव
कीदृशं यशः ? - मूर्तम्

विशेषः

अ. पदविवरणम्

1. द. 'तद्'शब्दः, पु. प्र.वि. ए.व.
2. अ. 'नन्दिनीस्तन्य'शब्दः, न. द्वि.वि. ए.व.
3. न. 'अनिन्दितात्मन्'शब्दः, पु. प्र.वि. ए.व.
4. अ. 'सद्वत्सल'शब्दः, पु. प्र.वि. ए.व.
5. अ. 'वत्सहुतावशेष'शब्दः, न. द्वि.वि. ए.व.
6. 'पा'धातुः, प.प. भूतकालः(लिट्), प्र.पु. ए.व.
7. अ. 'वसिष्ठ'शब्दः, पु. तृ.वि. ए.व.
8. अ. 'कृताभ्यनुज्ञ'शब्दः, पु. प्र.वि. ए.व.
9. अ. 'शुभ्र'शब्दः, न. द्वि.वि. ए.व.
10. स. 'यशस्'शब्दः, न. द्वि.वि. ए.व.
11. अ. 'मूर्त'शब्दः, न. द्वि.वि. ए.व.
12. अव्ययम् 'इव'
13. अ. 'अतितृष्ण'शब्दः, पु. प्र.वि. ए.व.

आ) समासः

१. नन्दिन्याः स्तन्यम्, तत् - *ष.तत्पुरुषः*
२. न निन्दितः - अनिन्दितः - *नञ्तत्पुरुषः*
अनिन्दितः आत्मा यस्य सः - *बहुव्रीहिः*
३. सत्सु वत्सलः - *सप्तमीतत्पुरुषः*
४. कृता अभ्यनुज्ञा यस्य सः - *बहुव्रीहिः*
५. अतिशयिता तृष्णा यस्य सः - *बहुव्रीहिः*

अन्येद्युः आचार्यः वसिष्ठः व्रतसमाप्तिं कृतवन्तं राजानं, तस्य पत्नीं सुदक्षिणां चापि स्वस्तिकथनपूर्वकं राजधानीं प्रति प्रेषितवान् । पत्नीसहितो दिलीपः धेनुम्, आचार्यम्, अरुन्धतीं च प्रदक्षिणीकृत्य नगरं प्रति प्रस्थितः ।

पत्नीसहितः प्राप्तवरः राजा राजधानीं प्राप्तवान् । सर्वे जनाः सन्तुष्टाः

अभवन् । पुनरपि राज्यभारं स्वीकृतवान् दिलीपः । किञ्चित्कालानन्तरं पत्नी सुदक्षिणा गर्भं धृतवती । मुनीनाम् आशीर्वादः धेनोर्वरः च सफलः अभवत् ।

४. संस्कृतसाहित्यपरिचयः

अ) आधुनिकं संस्कृतसाहित्यम्

संस्कृतसाहित्यस्य आदिकविः वाल्मीकिः । ततः आरब्धा काव्यपरम्परा निरन्तरं प्रवहन्ती अस्ति । प्राचीने काले बहवः कवयः स्वकाव्यप्रतिभया संस्कृतसाहित्यं यथा समृद्धं कृतवन्तः, तथैव आधुनिककाले अपि बहवः कृतवन्तः, कुर्वन्तः सन्ति अपि । गतशतकस्य एतच्छतकस्य च साहित्यं वयम् 'आधुनिकसाहित्यम्' इति परिगणयितुं शक्नुमः । गते शतकद्वये महाकाव्यानि, लघुकाव्यानि, रूपकाणि, स्तोत्रकाव्यानि इत्यादीनि बहूनि यद्यपि निर्मितानि, तथापि तानि सर्वाणि न प्रकाशितानि ।

आधुनिकेषु संस्कृतकाव्येषु कानिचन रामायण-महाभारत-पुराण-प्रभृतीनां कथाम् आश्रित्य लिखितानि । हरिवंशचम्पूः (वेङ्कटसूरिः), रुक्मिणीपरिणयः (रामकविः), गोविन्दवैभवम् (मधुरानाथशास्त्री), कृष्णविलासः (शेषदीक्षितः), अद्भुतदूतम् (जग्गूवकुलभूषणः), सीता-स्वयंवरः (के. एस्. नागराजन्), स्वराज्यविजयः (क्षमाराव्) इत्यादीनि अत्र कानिचन उदाहरणानि ।

आधुनिकं भारतं, राजकीयनायकान्, सामाजिकराजकीयवृत्तान्तं च आश्रित्य देशभक्तिवर्धनार्थं, सामाजिकजागरणार्थं, जनजागरणार्थं च काव्यरचनाप्रयत्नः अपि कृतः दृश्यते । श्रीतिलकयशोर्णवः (मा.ह.अणे), श्रीनेहरूचरितम् (ब्रह्मानन्दशुक्लः), स्वाधीनभारतम् (रामनिरीक्षणसिंहः), विशालभारतम् (श्यामवर्णद्विवेदी) इत्यादीनि अत्र उदाहरणानि ।

बहूनि रूपकाणि अपि आधुनिककाले रचितानि अभवन् एव । तेषु कानिचन -

निष्किञ्चनयशोधरम् - डा॰ जतीन्द्रविमलचौधरी

उद्गातृदशाननम् - महालिङ्गशास्त्री

पृथ्वीराजविजयः - मथुरानाथशास्त्री

विवेकानन्दविजयः - श्री. भा. वर्णेकर्
रमामाधवम् - वि. पि. बोकिल्
सरोजिनीसौरभम् - महीधरवेङ्कटरामशास्त्री

आधुनिके काले विविधानि विडम्बनकाव्यानि अपि रचितानि अभवन् । तानि कानिचन - काकदूतम् (सहस्त्रबुद्धे), शुनकदूतम् (के. वि. कृष्णमूर्तिः), कपीनामुपवासः (ताताचार्यः), कण्टकाञ्जलिः (कण्टकार्जुनः) इत्यादीनि ।

एतदतिरिच्य अन्यभाषाभिः रचितानां कथापुस्तकानाम् अनुवादः अपि संस्कृतेन बहुधा जातः । संस्कृतपत्रिकासु विविधासु ताः प्रकाशिताः अभवन् अपि । इदानीम् अपि समग्रे देशे संस्कृतकवयः ग्रन्थान् रचयन्तः प्रकाशयन्तः च सन्ति । विविधाः संस्थाः पुरस्कारदानेन सम्माननेन च तान् प्रोत्साहयन्ति । एवं संस्कृतगङ्गाधारा इदानीम् अपि अनुस्यूततया प्रवहति ।

आ) संस्कृतपत्रिकाः

संस्कृतभाषायाः इतिहासः अतिप्राचीनः । किन्तु संस्कृतपत्रिकाक्षेत्रस्य इतिहासः केवलं शतकाधिकवर्षात्मकः, तावदेव । संस्कृतस्य प्रथमा पत्रिका १८६६ तमे वर्षे प्रकाशिता । प्रथमपत्रिकायाः नाम - 'काशीविद्या-सुधानिधिः' (एतस्याः अपरं नाम 'पण्डितपत्रिका' इति ।) एषा काशीतः प्रकाश्यमाना आसीत् । संस्कृतभाषया आङ्लभाषया च युक्तायाम् एतस्याम् अप्रकाशितग्रन्थानां प्रकाशनम् अधिकतया भवति स्म ।

संस्कृतक्षेत्रे अद्यावधि प्रायः ३०० पत्रिकाः जन्म प्राप्तवत्यः । तासु काश्चन कानिचन वर्षाणि संस्कृतसेवां कृत्वा विलयं गतवत्यः । इदानीं संस्कृतक्षेत्रे ५० - ६० पत्रिकाः प्रकाश्यमानाः सन्ति । साप्ताहिक्यः, पाक्षिक्यः, मासिक्यः, द्वैमासिक्यः, त्रैमासिक्यः, षाण्मासिक्यः इत्येवं सर्व-विधपत्रिकाः अपि सन्ति संस्कृतक्षेत्रे । 'सुधर्मा'नामिका दिनपत्रिका कर्णाटकराज्यस्य मैसूरुनगरात् प्रकाश्यते । एतस्य स्थापकसम्पादकः श्री के. एन्. वरदराजय्यङ्गार्यवर्यः २० वर्षाणि यावत् महता परिश्रमेण एतां पत्रिकां सञ्चाल्य संस्कृतसेवाम् अकरोत् । इदानीं सा साप्ताहिकरूपेण प्रकाश्यते ।

संस्कृतपत्रिकाणाम् उद्देशाः विभिन्नाः । काश्चन विमर्शप्रौढचिन्तनादीनां प्राधान्यं कल्पयन्ति । पुनः काश्चन नवसाहित्यसृष्टेः अप्रकाशितकृतीनां

प्रकाशनस्य वा विशेषप्राधान्यं कल्पयन्ति । काश्चन सरलशैल्या विषयं निरूप्य सामान्यजनानाम् अभिरुचिं तर्पयितुं प्रयत्नं कुर्वन्ति । एवं संस्कृत-पत्रिकाणां विषयाः विभिन्नाः भवन्ति ।

काश्चन संस्कृतपत्रिकाः विश्वविद्यालयादिभिः अन्याभिः प्रसिद्ध-संस्थाभिः वा प्रकाश्यन्ते । अन्याः काश्चन समर्पितचित्तैः कैश्चित् विद्वद्भिः प्रकाश्यन्ते । एवं व्यक्तिप्रयत्नः संस्थाप्रयत्नः चापि पत्रिकाक्षेत्रे दृश्यते । यद्यपि संस्कृतक्षेत्रे बह्व्यः पत्रिकाः दृश्यन्ते, किन्तु बह्वीनां पत्रिकाणां ग्राहकाः तावत् अत्यल्पाः । यासां ग्राहकसङ्ख्या ३००० तः अधिका स्यात् तादृश्यः पत्रिकाः विरलाः एव इति वक्तुं शक्यते । 'संस्कृतचन्दमामा' संस्कृतभारत्याः सम्पादनसहकारेण प्रकाश्यमाना सचित्रमासपत्रिका । (ग्राहकसङ्ख्या ५०००) संस्कृतक्षेत्रे एतादृशी पत्रिका अन्या नास्ति । सरला भाषा, सुन्दराणि चित्राणि, अल्पं मूल्यम् इत्यादयः एतस्याः वैशिष्ट्यानि । 'सम्भाषणसन्देशः' नाम बहुवर्णात्मकमुख-पुटयुक्ता पत्रिका 'सन्देश-प्रतिष्ठान'द्वारा प्रकाश्यते, यस्याः च ग्राहकाः दशसहस्राधिकाः (१०,०००) सन्ति । सरला भाषा, आकर्षकाः विविधाः विषयाः, आकर्षकतया विषयनिरूपणं च एतस्याः वैशिष्ट्यम् ।

इदानीं प्रकाश्यमानाः काश्चन पत्रिकाः –

पत्रिकानाम	*प्रकाशनस्थलम्*
सम्भाषणसन्देशः (मासिकी)	बेङ्गलूरु
सुधर्मा (दैनिकी)	मैसूरु
भारती (मासिकी)	जयपुरम्
गौर्वाणी (मासिकी)	चित्तूरु
लोकसंस्कृतम् (षाण्मासिकी)	पाण्डिचेरी
विश्वभाषा (त्रैमासिकी)	वाराणसी
गाण्डीवम् (पाक्षिकी)	वाराणसी
व्रजगन्धा (त्रैमासिकी)	मथुरा
भारतमुद्रा (द्वैमासिकी)	पुरानाट्टुकुरा
सत्यानन्दम् (मासिकी)	कलकत्ता
संस्कृतामृतम् (मासिकी)	देहली
संस्कृतश्रीः (मासिकी)	चेन्नै
संस्कृतमञ्जरी (त्रैमासिकी)	देहली

संस्कृतभवितव्यम् (पाक्षिकी)	नागपुरम्
भारतोदयः (मासिकी)	हरिद्वारम्
दिव्यज्योतिः (मासिकी)	शिमला
संस्कृतसम्मेलनम् (त्रैमासिकी)	पटना

६. संस्कतग्रन्थकारपरिचयः

गद्यकाराः

सुबन्धुः - एषः प्रसिद्धस्य 'वासवदत्ता'नामकस्य गद्यकाव्यस्य रचयिता। एतस्य कालः क्रि.श. षष्ठं शतकम् आसीत् इति श्रूयते । सुबन्धुः स्वस्य ग्रन्थे 'श्रीपर्वतः इव सन्निहितः मल्लिकार्जुनः' इति श्रीशैलविषये उक्तवान् इत्यतः एषः दाक्षिणात्यः स्यात् इति विदुषाम् अभिप्रायः । अस्य काव्ये वर्णनात्मकः भागः अधिकः । यद्यपि सुबन्धुना स्वकाव्ये उपमा, रूपकम्, उत्प्रेक्षा, विरोधाभासः, परिसंख्या इत्यादीनाम् अलङ्काराणाम् उपयोगः कृतः, तथापि श्लेषालङ्कारविषये एतस्य महती प्रीतिः । अस्य भाषा सुलभा, सरला च । 'वासवदत्ता' एका एव अस्य कृतिः ।

बाणः - गद्यकाव्यस्य स्मरणात् सर्वे 'कादम्बरी'ग्रन्थम् अवश्यं स्मरन्ति । तस्याः कादम्बर्याः रचयिता बाणभट्टः । तस्य अपरा कृतिः हर्षचरितम् । संस्कृतस्य बहूनां कवीनां देशकालादिकं सुस्पष्टं न ज्ञायते । किन्तु बाण-भट्टस्य देशादिकं तावत् सुस्पष्टम् । शोणानदीतीरे विद्यमानं चित्रकूटम् एतस्य जन्मस्थलम् । एतस्य पिता चित्रभानुः, माता च राज्यदेवी । एषः सप्तमे शतके आसीत् । स्थाणेश्वरराज्यस्य हर्षदेवस्य आस्थाने आसीत् एषः । एषः स्ववंशपरिचयादिकं हर्षचरितनामके ग्रन्थे उल्लिखितवान् अस्ति । बाणस्य लोकानुभवः विशेषतः आसीत् । तस्य जीवनं दारिद्र्यमयं न आसीत् । राजाश्रयादपि तस्य सम्पत्तिः अवर्धत । अतः तदीयं जीवनं सुखमयम् आसीत् ।

गुणाढ्येन बृहत्कथायाम् उक्तां कथाम् आधारीकृत्य बाणेन 'कादम्बरी' रचिता । कादम्बर्याः समाप्तितः पूर्वम् एव बाणः दिवं गतः इति श्रूयते । ततः कादम्बर्याः उत्तरार्धं तदीयः पुत्रः भूषणभट्टः रचितवान् । गद्यरचनायां बाणभट्टस्य अपूर्वं सामर्थ्यम् । कादम्बर्यां दीर्घाणि वर्णनानि यथा, तथैव सामान्यानि वर्णनानि अपि सन्ति एव । तथापि दीर्घवाक्ययुक्तानि वर्णनानि दृष्ट्वा केचन चिन्तयन्ति यत् कादम्बरी गहनारण्यायते इति ।

'हर्षचरितम्' आख्यायिका इति उच्यते । (आख्यायिका गद्यकाव्यस्य कश्चन

प्रभेदः ।) हर्षचरिते चक्रवर्तिनः हर्षस्य चरितं वर्ण्यते । यद्यपि अत्र चरित्रवर्णनं क्रियते तथापि काव्यगुणाः समग्रे काव्ये दृश्यन्ते एव । हर्षचरितस्य आदौ बाणेन उच्छ्वासत्रये स्वीया कथा उक्ता अस्ति ।

'बाणोच्छिष्टं जगत्सर्वम्' इति वचनं श्रूयते बाणविषये । एतत् वाक्यम् एव तस्य श्रेष्ठतां द्योतयति ।

दण्डी – प्रसिद्धस्य 'दशकुमारचरितम्' इत्येतस्य ग्रन्थस्य कर्ता एषः । अस्य कालः षष्ठं शतकम् । दामोदरस्य पौत्रः एषः 'काव्यादर्शः' इति प्रसिद्धम् अलङ्कारलक्षणग्रन्थम्, 'अवन्तिसुन्दरीकथा' इति कथाग्रन्थं चापि लिखितवान् । अस्य कवेः भाषा मधुरा, सरला, सुबोधा च । *'दण्डिनः पदलालित्यम्'* इति लोकोक्तिः अपि अस्ति । उपमादीनाम् अलङ्काराणां प्रयोगे कविः अतीव समर्थः । दण्डी काञ्च्यां वासं करोति स्म इति श्रूयते । गद्यकाव्यक्षेत्रे यथा बाणस्य नाम, तथैव दण्डिनः नाम अपि सुप्रसिद्धम् ।

धनपालः – 'तिलकमञ्जरी' इत्येतस्य ग्रन्थस्य रचयिता धनपालः । एषः दशम्यां क्रिस्तशताब्द्याम् आसीत् इति विदुषाम् अभिप्रायः । तिलकमञ्जर्यां समरकेतुतिलकमञ्जर्योः प्रणयकथा वर्णिता । धनपालः बाणस्य कृतिं प्राधान्येन अनुसृतवान् अस्ति । अतः तिलकमञ्जरी कादम्बर्याः वेषान्तरम् इति पण्डिताः वदन्ति । धनपालेन 'पैयलच्छि'नामकः प्राकृतकोषः, 'ऋषभपञ्चाशिका'-नामकः प्राकृतस्तोत्रग्रन्थश्चापि रचितः ।

कोविदः - दशमः पाठः

प्रश्नाः

I. *विग्रहवाक्यानि अवलम्ब्य समस्तं पदं लिखत ।*

१. विदर्भदेशस्य राजा = ...
२. धनिनः कार्यालयः = ...
३. त्रिपाठिनः कथनम् = ...
४. चतुर्वेदी + महोदयः = ...
५. वाजपेयी + वर्यः = ...

II. *णत्वाभावस्य कारणभूतान् व्यवधायकवर्णान् निर्दिशत ।*

(व्यवधायकाः वर्णाः)

१. वार्तिकेन ....
२. विषादेन ....
३. प्रतिमानाम् ....
४. औषधानि ....
५. राजकीयानि ....
६. मारीचेन ....
७. भेषजानि ....

III. *उत्तरयत ।*

१. प्रीतिः कोपः च कियत्कालं स्यात् ?
२. सूनृता वाक् कां दूरीकरोति, कां च प्रसूते ?
३. इदानीं संस्कृतक्षेत्रे कति पत्रिकाः सन्ति ?
४. कादम्बरी कां कथाम् आधारीकृत्य लिखिता ?
५. नन्दिन्याः तोषकौ दिलीपस्य उभौ गुणौ कौ ?

(**Note:** Answers for the above exercises are given in the end of this book. (PNo - 265) After completing the exercises check your answers.)

कोविदः - एकादशः पाठः

।। न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।।

प्रियबन्धो,

संस्कृतव्याकरणसम्बद्धाः बहवः अंशाः एतावता अस्माभिः ज्ञाताः । श्लोकार्थज्ञानक्रमः अपि ज्ञातः । एकादशे एतस्मिन् पाठे नूतनः कोऽपि अंशः न बोध्यते । प्रबन्धलेखनक्रमः पत्रलेखनक्रमः च सङ्क्षेपेण अत्र निरूप्यते ।

आधिक्येन दीयमानः पाठः एषः । अतः एतस्य पाठस्य अन्ते प्रश्नपत्रिका न भवति ।

अ. प्रबन्धरचना

सरलैः सुन्दरैः वाक्यैः कस्यचित् विषयस्य विस्तरेण निरूपणम् एव 'प्रबन्धः' इति उच्यते । प्रबन्धलेखनस्य आरम्भात् पूर्वं लेखनीयं विषयम् अधिकृत्य मुख्यबिन्दवः चिन्तनीयाः, ते एकत्र लेखनीयाः च । एतेन प्रबन्धस्य परिपूर्णता सिद्ध्यति, सौन्दर्यं च वर्धते ।

प्रबन्धे आरम्भः, शरीरम्, उपसंहारः च इति त्रयः मुख्यभागाः । आरम्भे उपोद्घातरूपेण किञ्चित् उक्त्वा विषयस्य महत्त्वं निरूपणीयम् । शरीरभागे विषयस्य विश्लेषणम्, उदाहरणादिभिः विषयस्य प्रतिपादनं च करणीयम् । अन्ते उपसंहारभागे प्रयोजनादिकं निरूप्य प्रबन्धः समापनीयः ।

विचारात्मकाः, वर्णनात्मकाः, कल्पनात्मकाः, विमर्शात्मकाः - इत्येवं प्रबन्धे बहवः प्रकाराः सम्भवन्ति ।

प्रबन्धलेखनसमये यदा विषयभेदः भवति तदा पृथक् अनुच्छेदः (Para) करणीयः । महात्मनाम् उक्तिः, दृष्टान्तश्लोकाः, सूक्तयः इत्यादयः यथा-

योग्यं योजिताः चेत् प्रबन्धः रमणीयः भवति ।

प्रबन्धलेखनसमये वाक्यानि सरलानि भवन्तु । वाक्यनि दीर्घाणि चेत् मध्ये दोषाः भवेयुः कदाचित् । अतः लघूनि वाक्यानि भवन्तु । मनसि दीर्घवाक्यरूपेण भावः स्फुरेत् । तदा अपि तं भावं लघुभिः वाक्यैः लिखन्तु । तदा भवद्भिः लिखितं शुद्धं (भाषादोषरहितं) भविष्यति ।

अत्र उदाहरणरूपेण केचन प्रबन्धाः उल्लिखिताः ।

१. संस्कृतभाषा

भारतस्य अतिप्राचीना भाषा संस्कृतभाषा । संस्कृतभाषा भारतीय-भाषाणां जननी । संस्कृतभाषा अतीव समृद्धा, परिष्कृता च अस्ति । अतः एव एतस्याः भाषायाः नाम 'संस्कृतम्' इति ।

इदानीं भारते याः भाषाः दृश्यन्ते ताः सर्वाः क्रिस्तात् परम् उत्पन्नाः प्रायः । ततः पूर्वं तु संस्कृतभाषा एका एव आसीत् समग्रे भारते । एतया एव भाषया सर्वे व्यवहाराः प्रचलन्ति स्म अपि । वेदोपनिषदादयः, गीता-ब्रह्मसूत्रादयः, इतिहासपुराणादयः, स्मृतिशास्त्रादयः च सर्वे संस्कृत-भाषायाम् एव सन्ति । संस्कृतभाषायाः काव्यसम्पत्तिः अपि अपूर्वा । एवं संस्कृतं ज्ञानानां भाण्डागारम् अस्ति । अतः एव संस्कृतविषये एवं वचनं श्रूयते - *'भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती'* इति ।

यदा वयं काञ्चित् भाषां स्मरामः तदा कञ्चित् प्रदेशम् अपि स्मरामः । किन्तु संस्कृतं यदा स्मरामः तदा अखण्डं भारतम् एव स्मरामः, न तु भारतस्य कञ्चन खण्डम् । एवं संस्कृतं भारतस्य अखण्डतां स्मारयति । अतः एव 'राष्ट्रियैकतासम्पादने संस्कृतं प्रमुखं साधनम्' इति प्राज्ञाः वदन्ति । अतः एव बहवः राष्ट्रनायकाः वैदेशिकाश्च संस्कृतं मुक्तकण्ठं प्रशंसितवन्तः दृश्यन्ते बहुधा ।

संस्कृतभाषायाः व्याकरणम् एव अनुकुर्वन्ति सर्वाः भारतीयभाषाः । संस्कृततः शब्दराशिः एव स्वीकृतः अस्ति सर्वाभिः भाषाभिः । अन्यासां भाषाणां शब्दनिर्माणसामर्थ्यम् अल्पम् इत्यतः शब्दनिर्माणार्थम् इतः परम् अपि संस्कृतम् एव अवलम्बनीयं सर्वाभिः भाषाभिः । विदेशीयभाषासु अपि संस्कृतशब्दाः तद्भवशब्दाः च दृश्यन्ते - यथा माता (Mother), पिता (Father), भ्राता (Brother) इत्यादयः ।

भारतस्य अपूर्वा सम्पत्तिः नाम तत्त्वशास्त्रम् । तच्च तत्त्वशास्त्रं संस्कृते एव अस्ति । संस्कृते वैज्ञानिकसाहित्यम् अपि बहु अस्ति ।

भारते एकैकस्मिन् प्रदेशे एकैका भाषा अस्ति । तत्तत्प्रदेशे तस्याः एव प्राबल्यम् । एतत्कारणतः, राजनीतेः कारणतः, प्रचारस्य अभावतः च संस्कृतस्य ह्रासः इदानीं दृश्यते । अपरिष्कृता पाठनपद्धतिः अपि ह्रासस्य अपरं कारणम् ।

जनेषु संस्कृतप्रीतिः सुप्तरूपेण अस्ति । योग्यः प्रचारः कृतः चेत्, जनाः यथा अपेक्षां कुर्वन्ति तथा आधुनिकपद्धतीभिः पाठनं कृतं चेत् च संस्कृतस्य अभिवृद्धिः अवश्यं शीघ्रम् एव भविष्यति । *'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिः तथा'* इति प्राचीनैः उक्तम् । अतः भारतस्य प्रतिष्ठाभूतं संस्कृतम् अवश्यं पोषणीयं सर्वैः अपि ।

२. वार्तापत्रिकाः

जगत् यद्यपि सुविशालम् अस्ति, तथापि इदानीं तत् कुटुम्बकम् इव जातम् अस्ति । दक्षिणध्रुवप्रदेशे रात्रौ यत् प्रवृत्तं तत् अनन्तरदिने उषःकाले एव समग्रः प्रपञ्चः जानाति । एवं प्रदेशानां मध्ये स्थितं दूरम् अविगणय्य क्षिप्रगत्या वार्ताः प्रसारिताः भवन्ति । अत्र प्रमुखं कारणम् 'वार्तापत्रिकाः' । यद्यपि एषु दिनेषु आकाशवाणी, दूरदर्शनम् इत्यादीनि वार्ताप्रसारकसाधनानि वृद्धिं गतानि, तथापि पत्रिकाणां यत् स्थानम् अस्ति तत् अतिक्रान्तुं केनापि न शक्तम् ।

पत्रिकासु दैनिक्यः, साप्ताहिक्यः, पाक्षिक्यः, मासिक्यः, त्रैमासिक्यः च इति बहुविधाः सन्ति । दिनपत्रिकाः प्रायः वार्ताप्रसारणोद्देशेन एव प्रवर्तन्ते । मनोरञ्जनम्, ज्ञानवृद्धिः इत्यादयः तासाम् आङ्गिकफलानि भवितुम् अर्हन्ति ।

साप्ताहिक्यः पत्रिकाः तु प्रायः विचारोद्दीपनप्रधानाः, मनोरञ्जनप्रधानाः च भवन्ति । काश्चन एव पत्रिकाः गवेषणसम्बद्धाः अपि स्युः ।

वार्ताप्रसारः, विचारोद्दीपनं, मनोरञ्जनम् इति एतानि त्रीणि प्रधान-प्रयोजनानि भवन्ति पत्रिकायाः । या वार्ता जनेभ्यः रोचते तां प्राधान्येन प्रकाशयन्ति पत्रिकाः । जनानां रुचिम् अवलम्ब्य विशेषलेखनानि अपि ताः प्रकाशयन्ति । सर्वेषु प्रदेशेषु वार्ताहराः भवन्ति । ते तत्तद्दिनस्य प्रमुखघटनाः

दृष्ट्वा वार्ताः सङ्गृह्य पत्रिकाकार्यालयं प्रति प्रेषयन्ति । एवम् आगताः वार्ताः सङ्गृह्य प्राधान्यानुगुणं पत्रिका प्रकाशयति । वार्तासङ्ग्रहार्थम् एषु दिनेषु टेलिप्रिण्टर्, फेक्स् इत्यादीनि आधुनिकतन्त्राणि उपयुज्यन्ते । अतः एव काश्चन पत्रिकाः युगपत् एव बहुभ्यः प्रदेशेभ्यः प्रकाशिताः भवन्ति । ग्राहकाः पत्रिकायाः जीवतुल्याः चेत् प्रकटनानि (Advertisement) तु लाभोत्पादकानि भवन्ति ।

संस्कृते अपि दैनिकी-पाक्षिकी-मासिक्यादयः सर्वविधाः अपि पत्रिकाः सन्ति । सामान्यतः ५० अधिकाः संस्कृतपत्रिकाः इदानीं प्रकाश्यमानाः सन्ति । इतः पूर्वं शताधिकाः पत्रिकाः कानिचन वर्षाणि प्रवृत्ताः, ततः विलयं गताः च । इदानीं विद्यमानासु पत्रिकासु, 'सुधर्मा'नामिका दिनपत्रिका कर्णाटकात् एव प्रकाश्यते । भारती, गैर्वाणी, लोकसंस्कृतम्, विश्वभाषा इत्यादयः काश्चन सरलसंस्कृतेन युक्ताः । 'चन्दमामा'मासिकी सरल-भाषायुक्ता, सचित्रा कथाप्रधाना च । 'सम्भाषणसन्देशः' अपि मासिकी पत्रिका, सरला सुन्दरी च ।

पत्रिकाः जीवनस्य आवश्यकवस्तुषु अन्यतमाः सन्ति । अतः पत्रिकाणां पोषणम् अपि अस्माकं दायित्वम् । सर्वैः अपि पत्रिका पठनीया, किन्तु क्रीत्वा पठनीया ।

३. दूरदर्शनम्

इदानीं प्रपञ्चे वार्तादिकं ज्ञातुं, मनोरञ्जनार्थं, ज्ञानविकासार्थं च बहुविधानि साधनानि सन्ति । तेषु दूरदर्शनम् अपि अन्यतमम् । एतत् दृश्यं श्रव्यं च इति कारणतः एतस्य प्रभावः अत्यधिकः । अतः दूरदर्शनं जनप्रियम् अस्ति ।

दूरदर्शनस्य कार्यक्रमाः केचन शैक्षणिकाः, पुनः केचन मनोरञ्जकाः, अन्ये केचन व्यक्तिदेशादिपरिचायकाः, इतरे केचन इतिवृत्तात्मकाः । दूरदर्शनं क्रीडादीनां प्रत्यक्षविवरणम् अपि प्रसारयति । इदानीं दूरदर्शन-कार्यक्रमाः उपग्रहसाहाय्येन प्रसार्यन्ते । अतः देशस्य कोणे कुत्रचित् प्रवृत्ता अपि घटना घण्टाभ्यन्तरे समग्रेण देशेन ज्ञायते । एवम् अतिशीघ्रतया वार्तां प्रसारयति दूरदर्शनम् ।

वार्तां ज्ञातुं मनोरञ्जनं प्राप्तुं च यथा, तथैव ज्ञानवर्धनार्थम् अपि दूरदर्शनं सहायकं भवति । बालाः, तरुणाः, वृद्धाः इत्यादयः सर्वे इतः ज्ञानवर्धनं

प्राप्तुम् अर्हन्ति । एवं दूरदर्शनतः बहुविधाः लाभाः सन्ति ।

किन्तु इदानीं भारते ये दूरदर्शनकार्यक्रमाः प्रदर्श्यन्ते तेषु उत्तमाः विरलाः इति जनानाम् अभिप्रायः अस्ति । धारावाहिन्यः कथाः नीरसाः भवन्ति इति, वार्ताप्रसारे बहुधा पक्षपातः प्रदर्श्यते इति, शैक्षणिककार्यक्रमाणां स्तरः न्यूनः इति च जनाः आक्षेपं कुर्वन्ति ।

जनानाम् अभिप्रायभेदः यः कोऽपि स्यात् नाम, दूरदर्शनं ज्ञानवर्धने उपकारकम् इत्यत्र तु नास्ति सन्देहः । भारते या दूरदर्शनव्यवस्था अस्ति तस्यां योग्यं परिवर्तनं यदि स्यात् तर्हि वरं भवेत् ।

* * *

अधः केचन प्रबन्धविषयाः दत्ताः सन्ति । प्रतिविषयं केचन बिन्दवः निर्दिष्टाः सन्ति अपि । एकैकं बिन्दुम् अधिकृत्य कानिचन वाक्यानि लिखन्तः भवन्तः प्रबन्धान् रचयन्तु ।

१. धेनुः - धेन्वाः अङ्गानि, धेनुषु जातयः, आहारः, उपयोगः, गोपालः, तस्य कर्तव्यम्, गोभक्तिः, अस्माकं कर्तव्यम् ।

२. विद्या - विद्यायाः महत्त्वम्, विद्यार्जनक्रमः, श्रद्धया विद्या प्राप्यते, विद्यासाधनानि, विद्यादानम्, अस्माकं कर्तव्यम् ।

३. भारतदेशः - भारतस्य भौगोलिकस्वरूपम्, भारतम् इति नाम किमर्थम्, सांस्कृतिकवैशाल्यम्, भारतस्य श्रेष्ठता, भारतस्य प्राकृतिकसमृद्धिः, देशभक्तिः ।

४. आरोग्यम् - आरोग्यस्य महत्त्वम्, आरोग्यं दैहिकं मानसिकम् आध्यात्मिकं च, आरोग्यं भोजनाधीनम्, भगवद्गीतायाः वचनानि, चिकित्सा, जल-वायु-नैर्मल्यम्, आरोग्यरक्षणात् देशाभिवृद्धिः ।

५. नदी - नदी जीवनस्य आधारः, नद्याः उपयोगः (पानार्थं, कृष्यर्थं, विद्युदर्थं च), नदीनां पावित्र्यम्, स्नानसमये नदीनां स्मरणम्, नदीनां नैर्मल्यरक्षणम्, सस्यवृद्धिः नदीषु जलम्, महापूरसमस्या, नदीरक्षणम् ।

६. परिसरमालिन्यम् – जीवने परिसरस्य आवश्यकता, परिसरमालिन्यस्य कारणानि, जनानाम् अनादरः, यान्त्रिकजीवनात् हानिः, परिसरसंरक्षणार्थम् उपायाः, दैनन्दिनजीवने परिसरस्य हानिकारकाणि वस्तूनि त्याज्यानि, जनानाम् अज्ञानम् उपेक्षा च निवारणीया ।

७. सदाचारः – आचारः परमो धर्मः, सदाचारः नाम कः, प्राचीन-साहित्येषु सदाचारस्य निरूपणम्, सदाचारः उपदेशार्थं न, आचरणार्थम्, सदाचारात् जीवनस्य उन्नतिः ।

८. देशभक्तिः – स्वरूपम्, प्राचीने काले स्वातन्त्र्यकाले च देशभक्ताः कथं व्यवहृतवन्तः, इदानीं देशभक्तिः कथं लुप्ता, देशभक्तितः एव देशोद्धारः, मातृत्वभावनया देशभक्तेः उदयः, देशभक्तिः सर्वैः अपि करणीया ।

आ. पत्रलेखनम्

एषु दिनेषु विना पत्रव्यवहारं जीवनं कष्टमेव । प्राचीने काले बान्धवाः सर्वेऽपि एकत्र एव वसन्ति स्म । उद्योगम् अपि स्वग्रामे एव कुर्वन्ति स्म । किन्तु इदानीन्तने काले उद्योगम् अन्विष्यन्तः प्रायः बहवः जनाः दूरदेशं गच्छन्ति । तेषां सम्पर्कः पत्रद्वारा एव ।

अस्माकं कुशलवार्ताः बन्धुभ्यः मित्रेभ्यः च निवेदयितुं, व्यवहारे अनेकविषयसंवहनार्थं, विरामादिविषयं सूचयितुम्, उद्योगप्राप्त्यर्थं च पत्रलेखनम् आवश्यकम् एव ।

